CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आ. ५१

॥ श्री राधासर्वेश्वरो जयति ॥

* श्रीभगवन्निम्बार्क महामुनीन्द्राय नमः *

ईशाद्यष्टोपनिषदः

श्रीभगवन्निम्बार्क मतानुयायि महानुभाव विद्वद्भिर्विरचिता

"उपनिषत्प्रकाशिकाख्य"

टीकोपेताः ।

ताश्च

ब्यावर नगरवास्तव्य जोशीत्युपाह्व-विद्यानिधि—

—भूतपूर्व—

नागपुरस्थ गवर्नमेण्ट मौरिस कॉलेजेतिसंज्ञक

महाविद्यालय-प्रधान संस्कृताध्यापकैः

तथा

नागपुरस्थ विश्वविद्यालयीयानेकसमित्यध्यक्ष

संस्कृतपाली प्राकृतादि विभागाधिपति

श्रीनिम्बार्क सम्प्रदायाश्रिताश्रितैः

प्रोफेसर-—श्रीरामप्रताप शास्त्रि विद्याभूषण महोदयैः

मथुरा नगरीस्थ प्रभाकर मुद्रणालये

मुद्रापयित्वा प्रकाशिताः

प्रथमावृत्ति १०००	विक्रम संवत् १९९४ ख्रिस्ताब्दाः १९३७	मूल्यम् श्री आचार्यपदेनिष्ठा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रक— पं० माता प्रसाद शर्मा,
प्रभाकर प्रेस, मथुरा ।

SANSKRIT UNIVERSITY 1986 A.D.
विद्यापीठ-पुस्तकालय
विद्यापी...
20x92

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मू० ८५१ —

MAHENDRA SANSKRIT UNIVERSITY 1986 A.D.
विद्यापीठ-पुस्तकालय

शुद्धा-शुद्धिपत्रम्

अशुद्ध	शुद्ध		
पलन	पालन	३	१६
अच्छादिताः	आच्छादितः	४	७
ओश्विर	ओश्विः	४	२६
निष्पन्नापशब्दस्य	निष्पन्नाटशब्दस्य	५	२
स्वाभाविकम् भेद	स्वाभाविको भेद	६	२३
भूलसंस्थानः	भूतसंघसंस्थानः	७	१३
पोण	पोषण	१०	२०
यमथः	यमर्थः	११	२६
रधीनी	रधीनो	१२	६
सन्धास्यै	सन्धानस्यै	१३	१४
प्राथना	प्रार्थना	१४	१
अप्पायन्तु	आप्यायन्तु	१५	११
चतुरा	चतुरा	१८	१
जीवादन्यं	जीवादन्यत्	१८	१४
खण्ड	खण्डः	१६	१३
ब्रह्मज्ञा	ब्रह्मज्ञाः	१६	१५
श्रुत्यतरात्	श्रुत्यन्तरात्	१६	१७
”	”	”	१६
”	”	”	२३
दभ	इर	२०	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
ब्रह्मे त्युक्ता	ब्रह्मेत्युक्त्वा	२०	१०
तद्वचनेनं	तद्वचनेन	२०	१७
कथँ	कथं	२१	१४
स्मृत्या य	स्मृत्या ऽय	२१	१६
एषः	एषां	२३	१७
भावेन	भावे न	४१	१२
मुक्ता	मुक्त	४१	२४
त्यर्थे	त्यर्थः	४२	२४
वर्तमान	वर्तमाना	४३	७
पाश्चान्	पश्चान्	४३	१२
ह्मित	ह्मिति	४४	१६
तयोरश्र्येयः	तयोः श्रेयः	४५	११
मनुष्या	मनुष्याः	४६	१४
शतैः स्वयं	शतैः ? स्वयं	४७	११
अन्धै	अन्धे	४७	१४
बहूभि	बहुभि	४७	२४
त्वादृङ्नो	त्वादृङ्नो	४६	५
धैय्यवानसि	धैर्यवानसि	४६	१२
यस्माद्	यस्माद	४६	२१
पृष्टं	पृष्टवान्	५०	१६
यं त्वं	यत् (यस्य) त्वं	५०	२०
रूप सम्पद्य	रुप सम्पद्य	५१	१६
तदेव	तदेवं	५२	६
धर्मसदान्यत्र	धर्मादन्यत्र	५२	११
प्रष्टमिति	प्रष्टव्यमिति	५२	१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
दुपास्या	दुपास्यस्या	५२	१८
श्रयमपि	श्रयणमपि	५२	१६
हन्तुम्	हन्ता	५३	६
कथयन्निति	कथयद्भिरिति	५३	२३
ब्रह्मण स्व	ब्रह्मणः स्व	५३	१७
दिच्छतिस्य	दिच्छतस्य	५४	६
नियते	म्रियते	५४	२०
,,	,,	५४	२१
निरवयवा	निरवयवो	५५	१
स्वव्याप्ता	स्वाव्याप्त	५५	१६
सिद्ध	सिद्धः	५५	१६
ग्रह्य	ग्रह	५५	२५
पंस	पुंस	५५	२५
यति	याति	५६	१
ग्रहीत	गृहीत	५६	४
मनसो	मानसो	५७	२
भाव्यत्वात्	युक्तत्वात्	५८	१०
गौ	गो	५८	१०
भोक्तृ	भोक्तरि	५८	११
युक्त	युक्तः	५६	६
गौ	गो	५६	१८
चर्त्त	चर्त	५६	२१
पारंम्	पारम्	६०	५
येतो	येवा	६२	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
सतत	सततं	६२	२
पर	परः	६२	१७
गति	गतिः	६२	१८
त्वग्रया	त्वग्र्या	६२	२०
द्दष्टं	द्रष्टुं	६२	२५
पठितः	पठितं	६४	३
नाचिकेतं	नाचिकेतम्	६६	४
प्रथमोऽध्यायः	प्रथमाध्यायस्य	६६	१८
अस्तते	अतस्ते	६७	१२
सम्यरभृतो	सम्यग्भृतो	६९	१२
रासनं	रसनं	७३	५
सत्यलोकं	सत्यलोको	७३	२१
यज्ञेन	ऋतेन	७३	२४
वरत ध्यायमानस्य	वरतं ध्यायतः	७४	१४
श्रत्यनु	श्रुत्यनु	७४	१५
परब्रह्म	परब्रह्मणः	७४	१८
संयत्य	संयन्त्य	७५	१६
यैयाद्दशं	यैर्याद्दशं	७५	१८
रभते	रभेते	७५	२१
यत् प्रतिज्ञातम्	यः प्रतिज्ञातः	७५	२२
सुषुप्तेषु	सुप्तेषु	७६	१
व्यावृति	व्यावृत्ति	७६	४
आश्रिता	आश्रिताः	७६	५
मिष्टव्यं	मेष्टव्यं	७६	२३
चक्षुमलादि	चक्षुर्मलादि	७७	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
व्रह्म	व्रह्मा	७८	६
उर्द्धमूलमिति	उर्ध्वमूल इति	७६	११
भक्तस्या सर्व	भक्तस्य सर्व	७६	१२
प्रभृति	प्रभृतयः	७६	१४
टीक	टीका	८०	१७
नियन्ता	नियता	८०	२२
प्रवृति	प्रवृत्ति	८०	२२
विसंस्रः	विस्रसः	८१	२
दुर्बा	दुर्बो	८१	७
प्याया	प्याया	८१	१५
गुपाल	गुपल	८१	१७
धिगमा	धिगममा	८१	१८
इन्द्रियाण	इन्द्रिया	८१	२२
स्वस्य	स्वस्व	८१	२२
इद्रि	इन्द्रि	८२	१
न्यो	न्यः	८२	८
रूपं	रूपा	८२	१५
प्रपत्या	प्रपत्यो	८३	६
सौलभ्यमि	सुलभ इ	८३	७
नीन्द्रयाणि	नीन्द्रियाणि	८३	१८
अहमेव विधो	अहमेवंविधो	८३	६
यञ्च	पञ्च	८३	१८
मन्यते	मन्यन्ते	८३	२३
अवध्याय	अध्यवसाय	८३	१६
प्रसत्तया	प्रमत्ततया	८४	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
वो लब्ध	वोपलब्ध	८४	३
तस्योप	तस्यौप	८४	८
तत्वं-तत्त्वभावो	तत्त्वं-तत्त्वभावो	८४	६
ज्ञातवतो	ज्ञातवतः	८४	१२
ब्राह्मण	ब्राह्मणा	८४	१३
दोषो	दोषं	८४	१४
राद्य	राघ	८४	२२
भूत्या	भूत्यां	८४	२३
योष्मेव	पोष्यैव	८५	२
सङ्ख्का	सङ्ख्याकाः	८५	१७
उत्क्रान्तौ	उत्क्रान्ता	८५	२५
भूत	भूता	८५	२५
तेनैवाहा	तेनैव ह्या	८६	८
यञ्च	यच्च	८६	२४
श्रयते	श्रूयते	८६	२५
तत्व	तत्त्व	८७	१
पाद	पादि	८७	३
मरणञ्चे	मरणश्चे	८७	१७
परब्रह्मा	परबुध्या	८७	६
चार्याया	चार्य्या	८८	४
अन्त्र	अत्रा	८८	१५
सिद्धान्त	सिद्धान्तः	८८	२३
वित्युर	वित्युत्तर	८९	२
शारीर	शारीरः	८९	३
नेक	नैक	८९	८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
प्रतिपादन्न	प्रतिपादनान्न	८९	३
भावः	भाव	८९	१०
सौकर्यायै	सौकर्यायै	८९	१३
दृष्टव्या	द्रष्टव्याः	८९	२३
,,	,,	९०	७
चार्वोक्ति	चार्योक्ति	९०	१०
लभा	लभते	९१	१७
आश्वालायनः	आश्वलायनः	९१	२०
वक्ष्यामी	वक्ष्याती	९२	१
शैयः	शैव्यः	९२	४
कबन्धि	कबन्धी	९२	७
ब्रह्मनिष्ठा	ब्रह्मनिष्ठाः	९२	१०
सम्पत्स्यथ	सम्वत्स्यथ	९२	१८–२३
यथाक्रमं	यथाकामं	९२	१८
पृच्छत	पृच्छथ	९२	१८
पृष्टव्यर्थान्	प्रष्टव्यार्थान्	९२	२४
यथेष्ठं	यथेष्टं	९२	२४
तपो तप्यत	तपोऽतप्यत	९३	२
सिद्धिता	सिद्धता	९३	८
कत्वात् प्रयो	कत्वादितिप्रयो	९३	९
श्रुत्वा	श्रुत्या	९३	१४
मनक्त	मनन्त	९३	१७
प्रसङ्गान्त	प्रसङ्गान्न	९३	१७
कारेण पूर्व	कारेण शिवस्यपूर्व	९३	२२
ग्रसत	ग्रसते	९३	२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
अपि स्वत	अपितु स्वत	६४	६
पृच्छते	पृच्छ्यते	६४	७
चोपचा	चौपचा	६४	६
मानस्य भावा	मानस्य अभावस्य भावा	६४	११
पादनेन	पाद्ने	६४	११
सामजस्य	सामञ्जस्य	६४	११
प्रजा	प्रजाः	६४	१६
उत्पादयत्	उद्पादयत्	६४	२१
,,	,,	,,	२२
दित्या	दित्य	६५	१
तस्त	तस्तद्	६५	३
वाच्यत्व	वाच्यत्वं	६५	११
व्यवाहृतः	व्यवहृतः	६५	१५
दिग	दिग्	६५	१६
धायको एव	धायका एवं	६५	१६
एषो	एष	६६	७
तन्मा	तनमा	६८	२
परायण	परायणं	६८	३
कस्य पुन	कस्य न पुन	६८	८
शिखौ	शिरयो	६८	१२
शब्द	शब्दः	६८	१५
विदो	त्रिदः	६८	१६
षड्रे	षडरे	६८	१७
प्रजायते	प्रजापते	६८	२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती
यत्तो	यत्तः	६८	२४
चड्डुक्ल	चूड्डुक्लः	६८	२५
द्दष्टारः सर्व	द्रष्टारः तस्मिन् सर्व	६८	२५
नोक्रुष्ट	नोत्क्रुष्ट	६८	२५
संज्युन्वते	संयुज्यन्ते	६६	३
त्रो	त्रौ	६६	३
रेतावस्थं	रेतोऽवस्थ	६६	१३
यशा	यशो	१००	१
माय	माया	१००	३
मनो	मनः	१००	१०
शब्दाः	शब्दः	१००	६
वलीष्ठ	बलिष्ठ	१००	१३–१८
यत्ते	यन्ते	१००	१७
प्रकाशन्ते	प्रकाशयन्ते	१००	१८
पद्दितानि	पलद्दितानि	१०१	३
महात्म्यं	माहात्म्यं	१०१	५
वतौ	वतो	१०१	११
वरीष्ठो	वरिष्ठो	१०१	११
मैव	मैवं	१०१	१२
वेत	वैत	१०१	१३
क्रामन्त	क्रामत	१०१	१६
कत्वं	कत्व	१०१	२४
प्रावस्तुन्वन्ति	प्राणंस्तुवन्ति	१०२	७
कण्य	करण्य	१०२	१२
द्दष्टः	द्रष्टव्यः	१०२	१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती
तस्य	तस्या	१०२	१७
यति	पत्ति	१०२	१४
तथचौं	तथर्चो	१०२	१६
तूयेते	तूयते	१०२	२३
प्रणेमा	प्रण इ	१०३	२
सदृशं	सदृशः	१०३	२
यावत	याचत	१०४	५
पुरूषा	पुरुषा	१०५	२
भवती	भवन्ती	१०५	१३
क्रतेना	कृतेना	१०५	१७
महात्म्यो	माहात्म्यो	१०५	१८
यथेषा	यथैषा	१०५	२१
मेव	मेवं	१०५	२३
मेवेत	मेवैत	१०५	२२
प्रथक्	पृथक्	१०५	२५
कृतान्ति	कृतान्नि	१०६	६
नातिंष्ठे	नाधितिष्ठस्वे	१०६	६
पृथिगि	पृथति	१०६	१६
भुतं	भूतं	१०६	२३
रय	रप	१०६	१७
मन्न	मन्नं	१०६	२३
भवत्या	भवन्त्या	१०७	२
अस्मि	अस्मिन्	१०७	५
मेकोलर	मेकोत्तर	१०७	५
सहस्रानां	सहस्राणां	१०७	६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती
निमिती	निमित्ती	१०७	१६
ह्यनं	ह्येनं	१०७	२३
गृहान	गृह्णन्	१०८	१
पृथिव्यौ	पृथिव्यो	१०८	५
स्वा	स्या	१०८	७
मूर्षजीवो	मूषुर्जीवो	,,	१५
सहसयोग	सहसंयोग	,,	१८
यच्चितो	यच्चित्तो	,,	१५
जीव	जीर्वं	,,	१६
नत्व	नत्वं	,,	२३
परिश्रद्ध	परिशुद्ध	१०९	३
मश्नुत	मश्नुते	,,	६
विभू	विभु	,,	६
डेकधि	डेकाधि	,,	१०
विषयेण	विशेषेण	,,	१२
भवति	भवन्ति	,,	१७
मण्डल	मण्डले	११०	२
मन्यस्य	मनस्य	,,	३
पृष्ठ	पृष्ट	,,	७
रत्तीव	रन्त्य इव	,,	११
दृश्यते	दृश्यन्ते	,,	११
णेश्चेत	णेष्वेत	११०	२३
उद्गीतेति	उद्गातेति	१११	१३
मन्नैव	मन्नेव	,,	१५
मन्यभू	मन्यनुभू	११२	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती
मन्नैव	मन्नेव	,,	२
मुतर	मुत्तर	,,	३
पश्यतिः	पश्यति	,,	५
पटिशष	परिशेष	,,	१५
एव	एवं	,	२१
सोभार्ह	सोमार्हः	,,	२२
पञ्जम	पञ्चम	११३	१२
युचन्ते	युच्यन्ते	,,	१२
टीक	टीका	,,	१२
सर्वरवं	सर्वस्य	,,	१७
दीनामेत	दीनामेते	,,	१७
मेव	मेवं	,,	२४
शून्वं	शून्यम्	११४	३
प्रश्न	प्रश्नः	,,	१७
देहयाता	देहयता	११५	१८
बुद्धया	बुद्धया	,,	२२
मनास	मनसि	११६	१
सङ्गतो	सङ्गतं	,,	२
एव	एवं	,,	१०
सर्व स्त्वचा	सर्पस्त्वचा	,,	१३
पाधित्य	पाधित्वं	,,	१६
मात्रा	मात्राः	,,	२२
मात्र	मात्रा	११७	६
किं	किम्	११८	७
मात ! हि	मन हि	,,	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती
वेदिष	वेदिसं	११८	११
इहैवन्तः	इहैवान्तः	११९	३
प्तितिष्ठिते	प्रतिष्ठिते	११९	७
प्रा।णेति	प्राण इति	११९	१४
ज्ञानदि	ज्ञानादि	११९	१८
हेतुवः	हेतवः	११९	१९
कला	कलाः	११९	२०
भिद्यंते	भिद्येते	११९	२३
स	तत्र	१२०	१
स्रवन्त्य	स्रवन्त्यः	,,	१
समुद्रायनं	समुद्रः अयनं	,,	२
पृथक्	पृथग्	,,	३
परिद्रष्ट	परिद्रष्टु	,,	५
निरूपा	निरुपा	,,	६
नस्तः	नश्यतः	,,	९
इत्यर्थ	इत्यर्थः	,,	११
एव मख्या	एवमाख्या	१२१	३
बिदुषां	विदुषा	१२१	६
रु	रुः	१२४	१२
नामगतिं	नामागतिं	१२४	१४
गृहीतुम	ग्रहीतुम	१२६	२
लक्षणा	लक्षण	१२७	१३
षयके	षयिके	१२८	३
निवर्ति	निर्वर्ति	१२८	१४
हुतिर्हो	हुतीर्हो	१२९	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
वाश्च	वासश्च	१२६	२१
दीप्तमत्यः	दीप्तिमत्यः	१३०	१
मूर्खा	मूर्खाः	१३१	१०
लोकाद्येष	लोकैद्येष	१३३	२
सूर्यो	सूर्यौ	१३४	१२
योषद्रू	योषिद्रू	१३५	१०
वह्वयः	वह्वयः	,,	१०
येषु पवते	येषुसूर्यः पवते	,,	२०
नियोगे	योनियोगे	१३६	१
सप्तमे	सप्त मे	१३६	१०
निहिता	निहिताः	१३६	१२
शिष्या	शिष्याः	१३७	१६
भावनातद्गतेत	तद्भावनागतेन	१३८	१५
भावनातद्गतेत	तद्भावनागतेन	३१८	१७
विषयो	विषया	१३६	७
महोधेः	महोदधे	१३६	८
महोधेः	महोदधे	१३६	१६
औङ्	औङ	१४२	१८
प्राप्नुवन्	प्राप्नुवन्	१४३	१०
आत्मरेतः	आत्मरति	१४३	२१
परुयो	पश्यः	१४३	२२
भूतेरा	भूतैरा	१४४	१४
इहन्तिके	इहान्तिके	१४५	२१
भूतत्वं	भूतंत्वं	१४६	७
दर्शाति	दर्शयति	१४७	१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
कामः	कामाः	१४७	१६
संप्रात्यै	संप्राप्त्यै	१४८	१८
विमुक्तः	विमुक्ति	१४६	१६
सन्त्यो	सत्या	१४६	२४
प्राश्नो	प्रश्नो	१५०	२
लोकं	लोके	१५०	८
ह्मविद	ह्मविद्	१५०	११
षि	षिः	१५०	२२
द्य	द्यु	१५१	१०
द्रष्टव्यः	द्रष्टव्यम्	१५१	१०
पदर्शितं	पदर्शित	१५४	३
त्तं किमिति	त्तं तस्य किमिति	,,	४
ष्यमिति	ष्यदिति	,,	७
विष्ये	विष्यदि	,,	६
विष्ये	विष्यदि	,,	१०
त्वति	त्वस्ति	,,	१६
मात्मेवे	मात्मैवे	१५४	१४
मात्सेवे	मात्मैवे	,,	,,
शब्दोक्तं	शब्दार्थ	१५५	१३
अनशनान्तरः	अनशनान्नरः	,,	१४
पादकत्वेन	पाद्यकत्वेन	,,	२२
रूप इति	रूपस्थान इति	१५६	६
इति	इतिधातोः	१५६	१२
एतो	एतौ	१५७	३
तृप्ति	तृप्तिः	१५८	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
विनिश्चित्य	विनिश्चय	,,	२२
इत्यत्र	इत्यत्रा	,,	२२
विविधया	विविधतया	१५६	३
मायाभिरेषा	मायावादिभिरेषा	,,	५
वासुदेव	वासुदेवः	,,	२४
जनापेक्षाः	जनापेक्षा	१६०	६
प्रवृत्तिली	प्रवृत्तिर्ली	,,	११
आत्मकामस्य	आप्तकामस्य	,,	१२
कार्यात्यर्थः	कार्पीत्यर्थः	,,	१२
देहान्तस्थिता	देहान्तःस्थिताः	,,	२२
वहिस्थिता	वहिस्थिाः	,,	२४
नञ्च	यञ्च	१६१	१
नावृत्तस्य	नावृतस्य	,,	४
वस्था काल	वस्थातस्याः काल	,,	४
गच्छन्तां	गच्छतां	,,	८
चिन्त वि	चिन्तन वि	,,	१३
शव्द उच्छ	शव्दोच्छ	,,	१६
इत्यर्थ	इत्यर्थः	,,	२६
वन्धनात्	वन्धनवान्	१६२	२२
दृष्टव्यम्	द्रष्टव्यम्	१६३	८
भयों	ययो	१६४	१
भूता	भूत	,,	४
खातन्त्र्यादि	स्वातन्त्र्यादि	,,	२४
ज्ञातः	ज्ञातं	१६५	२६
उक्तं	उक्तो	१६६	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशोद्ध	शुद्ध	पृष्ठ	पंक्ति
किन्त्वतरे	किन्त्वितरे	,,	१२
व्यापत्व	व्याप्यत्व	,,	१८
वणारूपात्	वर्णारूपात्	१६७	१
आकार	आकारः	,,	२४
तैजसस्योंका	तैजसस्यौंका	१६८	१९
मकारप्रवृतौ	मकारप्रवृत्तौ	१६९	२
वाच्यत्व	वाच्यत्त्वम्	,,	६
विश्व	विश्वः	,,	१७
इत्येव	इत्येवं	,,	१७
अस्यधातु	अस्यध्यातु	,,	१९
आकाराद्य	अकाराद्य	१७०	१८
मत्त	मन्त	१७०	२०
उपासकः	उपासकेन	१७१	१२
मित्यनोक्तं	मित्यनेनोक्त	,,	१७
त्वं दर्शयति	त्वंच दर्शयति	,,	१८
स्त्रीतीयः	स्तुरीयः	,,	२२
त्वत्रोंकारं	तत्रौंकारं	१७२	६
पश्चातूनो	पश्चात्तनः (पाश्चात्यः)	,,	२४
पूर्णः	पूर्णम्	,,	२५
न्यूतनेति	न्यूनतेति	,,	२५
आदिकारणं	आदिः कारणं	१७३	१४
अन्तं	अन्तः	,,	१४
तं	तम्	,,	२३
भवत्यर्यमा	भवत्वर्यमा	१७६	१
अध्यात्मिक	आध्यात्मिक	,,	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
यमर्थमि	योऽर्थस्तमि	,,	२५
ब्रह्मवर्चसं	ब्रह्मवर्चसम्	१७७	१२
व्याख्यान	व्याख्याना	,,	२०
अकाशः	आकाशः	१७८	४
अग्निः पूर्वरूपं	अग्निः भौमः पूर्वरूपं	१७६	२
विद्युत	विद्युत्	,,	३
,,	,,	,,	११
मीत्यादि	नीत्यादि	१८०	११
	,,	,,	१७
स्वीकुरुत	स्वीकुरुते	,,	२२
स	सा	,,	२३
आमाया	आमाय	१८१	१२
सर्वजगधार	सर्वजगदाधार	१८२	७
पूर्व	पूर्वं	,,	१६
आदित्या	आदित्यः	१८३	१६
शब्दोयम्	शब्दोऽयम्	,,	१७
तत्रथितः	तत्रस्थितत्वात	,,	२३
,,	,,	,,	२५
गीतिमंत्यो	गीतिमत्यः	१८४	३
ब्रह्मोंकारः	ब्रह्मौंकारः	१८४	४
प्रधानो	प्रधानः	१८५	११
सुखं	सुखम्	,,	१३
विलक्षण	विलक्षणः	,,	१३
यत्र सा	यत्रासा	,,	१८
बन्धिनीये	बन्धिनिये	,,	२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
वाधिष्ठाने	वधिष्ठाने	१८६	३
भूरित्यम्न्या	भूरित्यग्ना	,,	४
करण पतिं	करणस्यपतिं	,,	१०
फलयितारं	फलयितारम्	,,	११
आकाशशरीर	आकाशशरीरम्	,,	२३
मन	मनु	,,	२५
दिशाः	दिशः	१८७	८
सम्बन्धशङ्क्तम्	सम्बन्धिपाङ्क्तम्	,,	१७
सहितं	सहितम्	,,	१६
मुद्दिश्य	मुदिश्य	१८८	१४
अध्वर्य्यादि	अध्वर्य्वादि	,,	१४
शेनोमित्युचा	शेनौमित्युचा	,,	१८
पाठनोमि	पाठनौमि	,,	१६
प्रतिगिर	प्रतिगिग	१८६	१
मन्त्रं	मन्त्र	,,	२
संज्ञ	संज्ञं	१८६	२
पुसौति	पुस्तौति	,,	३
प्राप्तसया	प्राप्तामया	,,	२४
द्दष्टव्यम्	द्रष्टव्यम्	१६०	३
तत्वस्य	तत्त्वस्य	,,	२०
श्रते	श्रुते	१६१	१०
रेरिव	रेरिवा	,,	१३
भवन्नैव	भवन्नेव	,,	१४
अभिव्यक्तं	अभिव्यक्ता	,,	१७
पितु	पितुः	,,	२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
स्मावत्	स्यावत्	१६३	६
नातितव्यं	नासितव्यं	१६३	१०
त	ते	१६४	१
वेदेत्यादि	वदेत्यादि	,,	१५
मात्रमिदं	मात्रमिदम्	,,	१६
वादिषं	वादिषम्	१६५	५
प्रसिद्धिमिति	प्रसिद्धिरिति	,,	१७
चा	च	१६६	८
ववेनेति	त्वेनेति	,,	६
निरूपाधिक	निरुपाधिक	,,	११
व्यवृतं	व्यावृत्तत्वं	,,	२०
मित्येनेन	मित्यनेन	,,	२२
वल्ल्याध्याये	वल्ल्यध्याये	१६७	१८
धातुस्तत्पुरुषं	धातुः स पुरुषो	,,	२१
ब्राह्मणोक्तेऽयं	ब्राह्मणोक्तेर	१६८	७
या	याः	,,	१४
जोद्भिजा	जोद्भिज्जा	,,	१४
श्रिता	श्रिताः	,,	१५
,,	,,	,,	२५
पेच्छाया	पेच्छायाम्	१६९	१३
सूद्मारु	सूद्मरु	,,	१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रोफेसर—श्रीरामप्रतापजी शास्त्री,
ब्यावर, (राजपूताना)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिका

इह खलु अनादिकर्मात्मिकाविद्यासम्मोहितानामतिभीषणे संसारचक्रे परिवर्तमानानां प्रेक्षावतां जनानां परमपुरुषार्थोपायस्यान्वेषणात् तावदादौ भवत्येषो निर्विवादः पन्थाः । अत्र संसारदुःखपङ्कनिमग्नस्य लोकस्य शास्त्रमेव प्रकाशस्तदेव च दिव्यंचक्षुरस्मदादेरिति । तदेवाधिगन्तव्यम् । तच्च कर्मज्ञानोपासनाकाण्डत्रयात्मकम् तत्प्रतिपादकाः स्वतः प्रमाणभूता वेदाश्चत्वारस्तत्रैकविंशति शाखा ऋचः । नवाधिकशतशाखा यजुषः । सहस्रशाखाः साम्नः । पञ्चाशच्छाखा अथर्वणस्य । तत्रैकैकस्याः शाखाया एकैकोपनिषदित्याहत्याऽशीतिसहितशताधिकसहस्र सङ्ख्याकाभिरुपनिषद्भिर्भाव्यम् । तासु सारतरा उपनिषदोऽष्टोत्तर शतसंख्याका उपलभ्यन्ते । तदेवं मुमुक्षूणामितरपुरुषार्थापेक्षया परमपुरुषार्थो मोक्षाख्यो वेदितव्यः । सचोपनिषज्ज्ञानसाध्यः । उपनिच्छब्दश्च मुख्यवृत्या ब्रह्मविद्यामभिदधाति । तथाहि-उपनिपूर्वकस्य विशरणगत्यवसादनार्थकस्य षद्लृधातोः क्विप्प्रत्ययान्तस्येदं रूपमुपनिषदिति । पूज्यपादानामस्मदाचार्याणमनन्ताचिन्त्यकल्याणगुणशक्तिवैभवपुरुषोत्तमकरस्थ शङ्खावताराणां भाष्यकारश्रीश्रीनिवासाचार्यचरणानामुपदिष्टश्चायमर्थः वेदान्तकौस्तुभे "श्रुतोपनिषत्कगत्यभिधानाच्च" ब्र० । सू० १।२।१७ इति सूत्र व्याख्यानावसरे । तथाहि, उपनिषीदति विशीर्यते बन्धनं यस्याः सकाशात्सा उपनिषत्परमात्मविद्या । यद्वा उपनिषीदति परमात्मानं प्रापयति या परमात्मविद्या सा उपनिषत् । तत्सम्बन्धाद्ग्रन्थोऽप्युपनिषदिति ।

ईशाद्यष्टोपनिषदां भाष्यमनादिनिवृत्तिपथप्रवर्तक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मविद्योपदेशकलोकाचार्यश्रीसनन्दनादिप्रवर्तित श्री १०८ महामुनीन्द्रभगवन्निम्बार्काचार्योपबृंहितवैदिकानादिसत्सम्प्रदायानुगत निखिलशास्त्रपारावारीणातिविसृत्वरकीर्तिधवलीकृतदिङ्मण्डलेन स्वाभाविकद्वैताद्वैतसिद्धान्तसमर्थनदत्तजगद्विजयाचार्यश्री१०८ केशवकाश्मीरिभट्टेन निर्मितं तच्चेदानीं कार्त्स्न्येन नोपलभ्यते किन्तु मुण्डकमात्रस्य भाष्यमुपलब्धं तच्च मुद्रापितमस्ति तदितरभाष्याणां दौर्लभ्यादेतावत्कालपर्यन्तं तेषां मुद्रणं नासीत्। साम्प्रतमेतत्सम्प्रदायानुयायिनो वैष्णवाः विद्वांसश्च स्वसिद्धान्तानुसारेणोपनिषदर्थं जिज्ञासमानाः समुपलक्ष्यन्ते अतस्तन्निवृत्यर्थमीशादिदशोपनिषदां टीका पूर्वाचार्योक्तितो मया सम्पादिता तेऽप्येतट्टीकामवलोक्य स्वसम्प्रदायसिद्धान्तं विज्ञायोपनिषदां याथात्म्यतत्त्वज्ञानेन सन्तुष्टास्सन्तः स्वीयसम्प्रदायस्योन्नतावनिष्टनिवृत्तिपूर्वकेष्टप्राप्तये निबद्धकक्षा भविष्यन्तीत्याशास्यते।

सा च पूज्यपादश्री१०८भगवन्निम्बार्काचार्यपादपीठाधिष्ठित श्रीबालकृष्ण शरणदेवाचार्यचरणारुणकमलमकरन्दभृङ्गानेकोपाधिविभूषित' श्री प्रोफेसर रामप्रतापशास्त्रिणा प्रकाशिता अतस्तस्मै श्रीरामप्रताप शास्त्रिणे बहुतरं धन्यवादं वितरामः येषां प्रचुरद्रव्यसाहाय्येनास्य निबन्धस्य सर्वेषां सौलभ्यसम्पादने वयं कृतार्थतामलभामहि, अतएवोदारमहानुभावस्य सकलशास्त्रपारावारीणस्यास्यात्यन्तानुगृहीता महोपकृतिञ्च मन्यमानाः सततमस्य भगवच्चरणारविन्दे भक्तिर्भूयादिति कामयामहे।

—अमोलकराम शास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवते महामुनीन्द्र श्री १०८ निम्बार्काचार्याय नमः ।

अमोलकरामेण पूर्वाचार्योक्तितः संगृहीता
तत्वप्रकाशिका-संवलिता
ईशावास्योपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः

ईशावास्यमिद ँ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१॥

टीका—श्रीमद्धंसं कुमारांश्च देवर्षिं नारदं नुमः ।
हृत्तमोनाशने शक्तं निम्बभानुं गुणार्णवम् ॥ २ ॥
श्रीकृष्णाय नमस्तस्मै राधिकानन्ददायिने ।
परमानन्दसन्दोहसान्द्रानन्द वपुष्मते ॥ ३ ॥
अनन्यनृपतिं वन्दे शुचिरत्नमहोदधिम् ।
आशुधीरस्य शिष्यं श्रीहरिदासं दयानिधिम् ॥ ४ ॥
स्वामिनीशरणं नत्वा सकलदेशिकोक्तितः ।
ईशोपनिषदो व्याख्यां व्याकरवाणि यथामति ॥ ५ ॥

चेतनाचेतनात्मकविश्वस्य स्वतःस्थितिप्रवृत्त्यभावाद्धरेरधीनत्वं निर्णीय वाजसनेयिनां संहितान्तिमाध्याये यत्तत्त्वमुपदिष्टं तत्तत्त्वमधिकारिण एव हृदयेऽवतिष्ठते नान्यस्येत्यधिकारसिद्धये प्रापञ्चिक पदार्थेष्वनासक्तिरूपं वैराग्यमुपदिशति—ईशावास्यमिति । ईशेति शब्द 'ईश ऐश्वर्ये' इति धातोर्निष्पन्नः क्विबन्तः, ईष्ट इतीट् स्वभावतोऽपास्ताखिलाविद्याक्लेशकर्मजन्मादिषड्भावसत्वादिगुणकार्यसम्बन्धः सत्यत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानत्वानन्तत्वादिधर्मको शक्तित्वलैश्वर्यवात्सल्यौदार्यकारुण्यक्षमादया-माधुर्यलावण्यमार्दवाद्यनन्तकल्याणगुणमहोदधिः सकलक्षेत्रज्ञप्रकृति-कालकर्मनियन्ता, अतिशयसाम्यवर्जितः, नित्यमुक्तैः स्वपार्षदवर्गैर्नि-षेवितः ब्रह्मरुद्राद्यचिन्त्यमहिमा जगज्जन्मादिहेतुः, वेदान्तैकवेद्यः प्रणतार्तिक्षपणस्वभाव उभयविभूतिर्भगवाँच्छ्रीपुरुषोत्तमः श्रीकृष्णस्तेनेदं विश्वं समष्टिप्राकृतप्रपञ्चः, जगत्यां = मह्यां, यत्किञ्च जगत् व्यष्टिपदार्थश्च तत्सर्वं वास्यम् = वासार्हं—व्याप्यमितियावत् ।

"यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥"

(म० ना० ११।६)

"तत्सृष्ट्वा तदनुप्राविशत् ।" (तै० आ० ६ । २ । ३)

इति श्रुतिभ्याम् । तेन ज्ञायते स्वयमिदं प्रवृत्तावशक्तं परमेश्वराधीनस्थितिप्रवृत्तिकमितिभावः । एतेनेशजगतोः स्वातन्त्र्य-पारतन्त्र्ये सिद्ध इति सूचितम् । यत एवमीश्वर एव स्वतन्त्रस्तेन कारणेन तेनेशेन त्यक्तेन दत्तेन वित्तेन भगवदिच्छया लब्धेनेति यावत् भुञ्जीथाः भोगं कुर्याः । यत ईश्वराद्भिन्नस्य सर्वस्यापि पारतन्त्र्येण वित्तदाने सामर्थ्याभावात् कस्यस्वित् कस्यापि राजादेः सकाशाद्धनं मा गृधः मा काङ्क्षेथाः । इदञ्च धनाशाग्रहणमीश्वरेतरकृत्स्नविषयवैराग्योपलक्षणम् । अत्रायमभिसन्धिः । तथाहि भोक्तृभोग्यनियन्तृरूपं तत्त्वत्रयमनेन मन्त्रेणोपदिष्टम् तथाच सर्वेश्वरेण सह चेतनाचेतनयोः स्वाभाविक-भेदाभेदसम्बन्धस्तद्यथा सर्वनियन्तृत्वसर्वात्मत्वसर्वव्यापकत्वस्वतन्त्र सत्त्वसर्वाधारत्वादिधर्मैश्च तस्य तयोश्चात्यन्तभेदः ।

"सर्वभूतान्तरात्मा अन्तःप्रविष्टः शास्ता जनानाम् ।"

(यजुरारण्यके २।११ अनुवा०)

"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।" (म० ना० ११।६)

"आत्मा परमः स्वतन्त्रोऽधिगुणः तस्मिन्सर्वे लोकाः श्रिताः सर्वे पृथगात्मानं प्रेरितारञ्च मत्वा ।" (श्वे० १।६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"ज्ञाज्ञौ द्वावजावीशानीशौ । (श्वे० ४।६)

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।" (श्वे० ६।१३)

इति श्रुतिभ्यः । ब्रह्मात्मकत्व तन्नियम्यत्व तत्तन्त्रसत्वपराधेयत्वादि योगेनचाभेदः । "तत्त्वमसि ।" (छा० ३।१।४)

"ऐतदात्म्यमिदं सर्वम् सर्वं खल्विदं ब्रह्म ।" (छा० ३।१४।१)

"त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते" (छा० ६।८।७)

"तदात्मानमेव वेदाहं ब्रह्मास्मि देवते ।" (बृ० १।३।१०)

इति श्रुतिभ्यः ॥ १ ॥

विषयतृष्णारहितस्य मुमुक्षोः ब्रह्म विद्याङ्गभूतं स्वोचितनिष्काम कर्मानुष्ठानं कार्यमिति द्वितीय मन्त्रेण विधत्ते—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ँ समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

कर्माणि=स्वोचितानि श्रौतानि स्मार्त्तानि च निष्कामानि ब्रह्म विद्याहेतुकानि कुर्वन्नेवेह=लोके शतं समाः=शतवर्षपर्य्यन्तं जिजीविषेत्=पुरुषव्यत्ययः, प्रकरणात् त्वं जिजीविषेः जीवितुमिच्छेः । नोचितकर्म त्यागे वैगुण्यं ध्वनयन्नाह—एवमिति । इतो हेतोस्त्वय्यन्यथा नास्ति, उक्त प्रकारेण त्वयि वर्त्तमाने कोपि दोषो नास्तीति भावः । ईश्वराधीनोऽहमिति ज्ञानबलेन त्वयाऽनुष्ठितानि भगवदाज्ञापलन रूपनिष्कामकर्माणि न जन्मादिफलोत्पादकानि भविष्यन्तीति ध्वनयन्नाह—न कर्म लिप्यते नरे ॥ २ ॥

ये च परमात्मज्ञानविहीनाः शास्त्रविधिमुत्सृज्य स्वेच्छया काम्य निषिद्धयज्ञादिकर्माणि कुर्वन्ति ते कामभोगेषु प्रसक्ताः सन्त रौरवादौ नरके पतन्ति, अमुमर्थमग्रिममन्त्रेण निर्वक्ति—

असुर्या नाम ते लोका अन्धेनतमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असन्नेव स भवति असद्ब्रह्मेति वेद चेत् (तै० २।६।६) इत्येवं वदन्तोऽसदुपासनया याथात्म्येनात्मस्वरूपमजानन्तः। ये के च जनाः, आत्महनो आत्मानं घ्नन्तीति आत्महनः याथात्म्येनात्मस्वरूपमजानन्तः। ते प्रेत्य=मृत्वा तान् लोकानभिगच्छन्ति। ते के ये लोका असुर्य्याः नामेतिप्रसिद्धौ, असुषु प्राणेषु रमन्त इत्यसुराः, प्राणपोषणमात्रपराः केवलविषयासक्तास्तैः प्राप्या असुर्याः सकल सुखरहिताः। कीदृशाः, अन्धेन=अतिनिविडान्धकारेण तमसा आवृता अच्छादिताः ॥ ३ ॥

निष्कामकर्मानुष्ठानेन विशुद्धान्तःकरणस्यैहिकामुष्मिकाशेष विषयेभ्यो व्यावृत्तस्येश्वरतत्वबुभुत्सावतः शिष्यस्य कोसावात्मा यद्विपरीतोपासनमसुर्यलोकप्राप्तिसाधनंस्यादित्यपेक्षायांपरमात्मतत्वोपदेशःक्रियते अनेजदित्यादिना—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

तत् परमात्मस्वरूपं निर्भयत्वादेवानेजत्। 'एजृ कम्पने' न एजतीत्यनेजत्। अकम्पमानं न तु निष्क्रियत्वात्, एकम्=समाधिक रहितम्। "नतत्समश्चाभ्यधिकश्चदृश्यते" (श्वे० ६।८।) इति श्रुतेः। मनसो जवीयो—मनो हि वेगवत्प्रसिद्धं ततोपि जवीयो वेगवत्तरम्। गत्यर्थकस्य ऋषतेर्ज्ञानार्थकत्वं तथा च याथात्म्येन ज्ञातुमशक्यत्वात् एतत् प्रकृतपरमात्मतत्वं देवाः नाप्नुवन् तत्सुरैरप्यगम्यमुच्यते नतु सर्वथाऽगोचरत्वात्। पूर्वमर्षत्। 'ऋषी गतौ' गत्यर्थस्य ऋषतेर्ज्ञानार्थकत्वं तथा च भगवांस्तु सर्वानगमत्पूर्वं व्यजानात्। सर्वत्र संतिष्ठदेव तत् परं ब्रह्म धावतोऽन्यानत्येति अतिक्रम्य गच्छति। तिष्ठतो धावदतिक्रमणं नघटत इति तु न शङ्क्यम्, सर्वनियन्तुः परमात्मनोऽचिन्त्यशक्तिमत्वात्। तस्मिन्नपो मातरिश्वा दधाति—तस्मिन् सर्वाधारे स्वतन्त्रसत्ताश्रये सर्वेश्वरे स्थितो मातरिश्वा, मातरि=अन्तरिक्षे श्वयति=वर्द्धत इति मातरिश्वा वायुः। 'टु ओश्वि गतिवृद्ध्योरिति धातुः' आपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलानि। उणादि गणे आप्नोतेर्ह्रस्वश्च, आप्लृ व्याप्तावित्यस्मात् क्विप् प्रत्यये ह्रस्वे च कृते निष्पन्नापशब्दस्य जलवाचकत्वात्। दधाति = बिभर्ति ततो वृष्टि समये जलपातो जायत इतिभावः। तदुक्तं छान्दोग्ये पञ्चविध-सामोपासने—"वृष्टौ पञ्चविधं सामोपासीत पुरोवातो, हिङ्कारो, मेघो, जायते, प्रस्तावः इति" ॥ ४ ॥ [छा० २।३।१]

तदेव परमात्मतत्त्वं अनन्ताचिन्त्यशक्त्यभ्युपगमेन प्रकारान्तरेण पुनरप्युपदिशति—

तदेजति तन्नेजति तद्दूरे तद्वदन्तिके
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः । ५ ।

तत् = परमात्मतत्त्वं। एजति = चलति। तदेव न एजति = भयात् न कम्पते। यद्वा एजतिरन्तर्भावितण्यर्थः। तदेजयति दुष्टान्, तदेव नेजयति सदाचारानिति शेषः। "परित्राणाय साधूनां विनाशाय च दुष्कृताम्, धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" (गी० ४–८) इति श्रीमुख वचनात्।

तत् ब्रह्म दूरे दूरदेशेऽस्ति, तदु = तदेव अन्तिके समीपेप्यस्ति सर्वान्तर्यामित्वात्। यद्वा अविदुषां पराङ्मुखानामब्दकोट्यप्राप्तत्वाद्दूर एव विदुषां हृद्यवभासमानत्वादन्तिकः। तदुक्तं श्री शौनकेन—

"पराङ्मुखा ये गोविन्दे विषयासक्तचेतसः।
तेषां तत्परमं ब्रह्म दूराद्दूरतरे स्थितम् ॥
तन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः।
विषयत्यागिनस्तेषां विज्ञेयञ्च तदन्तिके ॥" इति ॥

अन्यदपि तस्य वैचित्र्यमस्तीत्याह—तदन्तरस्येति।

अस्य = सर्वस्य विचित्ररचनात्मकस्य विश्वस्याभ्यन्तरे तदेव परमात्मतत्वमस्ति, सर्वस्य वस्तुनः बाह्यतो-बहिरपि तदानीमेव- तदेवास्ति। एकस्मिन्नेव क्षणे तस्य परमात्मनो बहिष्ठत्वमन्तर्वर्त्तित्वञ्च दूरत्वमन्तिकत्वं कम्पत्वनिष्कम्पत्वमचिन्त्यानन्तविचित्रस्वाभाविक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तियोगादुपपद्यते नात्र विरोधोद्भावनीयस्तस्य लोकविजातीयत्वात्।

'अचिन्त्याः खलु ये भावाः नतांस्तर्केणयोजयेत्।
प्रकृतिभ्यः परं यत्तदचिन्त्यस्य लक्षणम्॥'
(महाभारतेभीष्मपर्वः ५।१२)

"शक्तयः सर्वभावानामचिन्त्याः ज्ञानगोचराः।
ब्रह्मणस्तास्तुशतशः सर्गाद्या भावशक्तयः।"
(विष्णुपु०अं१ अ०३ श्लो०१)

"परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञान बल क्रिया च।"
(श्वेताश्वे० ६।८) इत्यादि स्मृतिभ्यः॥ ५॥

पूर्वमन्त्रेण चेतनाचेतनात्मकविश्वस्य ब्रह्मात्मकत्वमभिहितं। सर्वस्य ब्रह्मात्मकत्वं विजानतो विदुषो यत्फलं भवति तत्फलं यस्तुसर्वाणीति मन्त्रेणोच्यते—

यस्तु सर्वाणि भूतान्यात्मन्येवाभि पश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ ६॥

यस्त्वधिकारी सर्वाणि = चेतनाचेतनात्मकानि, आत्मनि = परमात्मनि, पश्यति = जानाति, सर्व भूतेषु चात्मानम्, अनुपश्यति स ततः = ब्रह्मात्मकत्वदर्शनात् न विजुगुप्सते, = विजुगुप्सां घृणां न करोति। सर्वा हि घृणा आत्मनोऽन्यं निकृष्टं पश्यतो भवति सर्वस्य ब्रह्मात्मकत्वं पश्यतो न घृणानिमित्तमस्ति॥ ६॥

ईशावास्यमित्यारभ्य ततो न जुगुप्सत इत्यन्तेन प्रबन्धेन सर्वनियन्तृत्व स्वतन्त्र सत्व सर्वात्मत्व सर्वव्यापकत्वसर्वाधारत्वधर्मैश्चपरब्रह्मणा सह चेतनाचेतनयोः स्वाभाविक भेद उपदिष्टः, सम्प्रति जगद्ब्रह्मणोः स्वाभाविकम् भेदसम्बन्धं यस्मिन्सर्वाणीति मन्त्रेण विधत्ते—

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ ७॥

यस्मिन् काले सर्वाणि भूतान्यात्मैवाभूत् सर्वाणि भूतानि परमात्माऽभिन्नानीति विजानतो विदुषः को मोहः कः शोकः, न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोपीत्यर्थः । सम्बन्धविशेषमाह—एकत्वमनुपश्यत इति । व्याप्य-काव्याप्यस्य पृथक् स्थितिप्रवृत्त्यनर्हत्वात्, एकत्वमभेदं पश्यत इत्यर्थः । तथा च ब्रह्मात्मकत्वतन्नियम्यत्वतत्तन्त्रसत्वपराधेयत्वादिधर्मैश्च चेतनाचेतनयोर्ब्रह्मणा सहाऽभेदस्तेन जगद्ब्रह्मणोरभेदसंसर्गो भवतीति विवेकः ॥ ७ ॥

सर्वं चेतनाचेतनात्मकं ब्रह्म भिन्नाभिन्नमिति विजानतो मुमुक्षो; स्वरूपं तत्प्राप्यपरमात्मस्वरूपञ्च निर्वक्ति—

सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भू यथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

स = सम्यग्दर्शी परमात्मानं पर्यगाल्लब्धवान् । इणोलुङि रूपमिदम् । तं विशिनष्टि-अकायम् = कर्माधीनप्राकृतशरीररहितम् ।

"न भूतसंस्थानो देहोऽस्य परमात्मनः,
न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा ।
यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः,
स सर्वस्माद्बहिष्कार्यः श्रौतस्मार्तविधानतः ।
मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत ॥"

इत्यादिस्मृतिभ्यः प्राकृतशरीरस्यैव निषेधो दृश्यते न तु दिव्यमङ्गल विग्रहस्येत्यर्थः । "यत्ते रूपं कल्याणतमं तत्ते पश्यामि" (ईशा० १६) "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" (छा० १-६-७) आदित्यवर्णं तमसः परस्तात्" "यदा पश्यः पश्यते रुक्म वर्णं कर्तारमीशम् पश्यति" (मुं० ३-१-३)

इत्याद्युपनिषत्प्रतिपाद्यस्याप्राकृतदिव्यमङ्गलविग्रहस्येहनिषेधायोगादिति भावः ।

शुक्रम् = अवदातं स्वप्रकाशरूपम् । अव्रणम् = प्राकृतशरीराभावादेवाक्षतम् । अस्नाविरम् = स्नायुः सिरा यस्मिन् विद्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् स्नाविरं तत् न भवतीत्यस्नाविरम्, अस्नाविरमव्रणमित्याभ्यां विशेषणाभ्यां कर्माधीनप्राकृतशरीरस्य प्रतिषेधो न तु सच्चिदानन्द-दिव्यमङ्गलविग्रहस्येतिभावः । शुद्धम् = अनाघ्राताज्ञानादिदोषगन्धम् । अपापविद्धम् = पुण्यपापादिलेशरहितम् । "एष आत्मा अपहतपाप्मा विजरोविमृत्युर्विशोकोऽविजिघित्सोऽपिपास," [छा० ८।७।१] इतिश्रुतेः ।

उपास्य ब्रह्मस्वरूपं निरूप्योपासकस्वरूप निरूपयति—कविरि-त्यादिना । कविः = सर्वेश्वरस्वरूपतद्गुणबोधककाव्यनिर्माणदक्षः मनीषी = सौन्दर्य माधुर्य लावण्य मार्दवादि भगवद्गुणानामनवरत स्मर-णेन निगृहीतचेताः । परिभू = काम क्रोधलोभादीन् शत्रून् परिभवतितिरस्क-रोतीति परिभूः, परि पूर्वक भवतेः तिरस्कारार्थत्वात् । स्वयंभूः = स्वयमेव परमनपेक्ष्य भवतीति स्वयम्भूः । हरेरन्य निरपेक्षसत्ताकः भगवदधीनसत्ताक इति यावत् । शाश्वतीभ्यः समाभ्योऽनन्तवर्षेभ्यः यथातथ्यतो = यथार्थ-तया अर्थान् = उपास्यस्वरूपादीन् पञ्चार्थान् व्यधात् विविच्य हृदये धृतवान् ॥ ८ ॥

ये केवल कर्म केवल ज्ञानञ्च मोक्षसाधनं वदन्ति तेषां निन्दा अन्धंतमः प्रविशन्तीत्यनेन मन्त्रेण क्रियते—

अन्धंतमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥९॥

ये अविद्यां विद्याभिन्नमसहायं कर्मोपासते । "अविद्या कर्म संज्ञान्या तृतीयाशक्तिरिष्यते" [वि० अं० ६ अ० ६ श्लो० ६१] इति स्मृतेः । ते अन्धंतमः अतिगाढ़ं तमः, अज्ञानम्; ये स्वाधिकारोचितकर्मपरित्यागेन विद्यायामेव रतास्ते ततः पूर्वस्मात् भूय इव तमः अधिकमज्ञानं प्रविशन्ति । इव शब्दस्तमस इयत्तायाः दुर्ग्रहत्वं द्योतयति ।।९।।

किं तर्हि निश्रेयः साधनमित्यत्राह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यदेवाहुर्विद्यया अन्यदेवाहुरविद्यया ।
इति शुश्रुमधीराणां येनस्तद्व्याचचक्षिरे ॥ १० ॥

विद्यया—कर्मनिरपेक्षविद्यायाः 'पञ्चम्यर्थे तृतीया' अन्यद्भिन्नं निश्रेयःसाधनमित्याहुः वेदान्ताः । अविद्यया ब्रह्मज्ञाननिरपेक्ष कर्मणोभिन्नं मोक्षोपायमित्याहुरुपनिषदः । येनइति । ये पूर्वाचार्याः तत्—नोऽस्मभ्यं मोक्षसाधनम् व्याचचक्षिरे विविच्य कथयामासुः, तेषां धीराणामनवरतभगवत्स्मरणपराणां वचनमितिशेषः, इति शुश्रुम एवं प्रकारं श्रुतवन्त इत्यर्थः ॥ १० ॥

सामान्येनोपदिष्टं मोक्षोपायं विवृणोति—

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

यो वेदान्तशास्त्रस्याधिकारी विद्याम्=ईश्वरस्योपासनाम्, अविद्याम्=तदङ्गभूतकर्मात्मिकाम् । एतदुभयं सह वेद=अङ्गाङ्गिभावेन सहानुष्ठेयं वेद । अविद्यया=विद्याङ्गतया नित्यनैमित्तिककर्मणा । मृत्युम्=विद्योत्पत्तिप्रतिबन्धकं पुण्यपापरूपं प्राक्तनं कर्म । तीर्त्वा—उल्लंघ्य । विद्यया=सर्वेश्वरोपासनया । अमृतम्=मोक्षम् । अश्नुते—प्राप्नोति ॥ ११ ॥

समाधिरूपा सम्भूतिः । असम्भूतिस्तु मानदम्भहिंसास्तेयादीनां योगविरुद्धानां निवृत्तिः । तत्रासम्भूतिमात्रावलंबिनः केवलसम्भूत्यवलम्बिनः पुरुषान् विनिन्दति—

अन्धंतमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याँ रता ॥१२॥

ये पुंसः असम्भूतिमेव=प्रागुपदिष्टांनिवृत्तिमेव उपासते ते उपासका अन्धंतमः प्रविशन्ति । ये पुनः समाधिरूपसम्भूत्यामेव रताः ते भूय इव बहुतरमिव तमः प्रविशन्तीत्यर्थः ॥१२॥

तर्हि किं मोक्षोपायमिति जिज्ञासायामाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यदेवाहुःसम्भवादन्यदाहुरसम्भवात् ।
इतिशुश्रुमधीराणां येनस्तद्व्याचचक्षिरे ॥१३॥

सम्भवात् = सम्भूतेः । असम्भवात् = असम्भूतेः ।

सम्भवमात्रादसम्भवमात्रादन्यदेव मोक्षोपायमित्युपनिषद आहुः । शेषंपूर्ववत् ॥१३॥

अन्यदेवाहुरित्युपदिष्टमर्थं विवृणोति--

सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयँ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥१४॥

सम्भूतिम् समाधिम् विनाशम् समाधिप्रतिबन्धकानांनिवृत्तिं चेतदुभयं योऽङ्गाङ्गिभावेन वेद विनाशेन = योगप्रतिबन्धकानांवर्जनेन मृत्युम् = योगविरोधि पापं तीर्त्वा सम्भूत्याऽमृतं ब्रह्माश्नुते । भगवदुपासनाविरोधिरूपाणां निवृत्तिमन्तरा तदुपासना निष्पन्ना न भवति अतस्तदुपासनानिष्पत्तये तदविरोधिरूपाणामपनयनमावश्यकमित्यपि द्रष्टव्यम् ॥१४॥

भोग्यवर्गेच्छापिधानसमर्थं सर्वेश्वरं भगवन्तं तत्साक्षात्काराय प्रार्थयते द्वाभ्यां मन्त्राभ्याम्--

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥

पोषयतिविश्वमितिपूषा तत्सम्बुद्धौ पूषन्निति । निखिल जगत्पोषणकर्त्तेति तदर्थः । हिरण्मयेन पात्रेण = भगवत्साक्षात्कार विरोधि प्राकृत विषयसुखेन । अत्रविषयसुखस्य हिरण्मयपात्रोक्त्याऽतिरम्यत्वमुक्तम् । सत्यस्य = प्रत्यगात्मनः । मुखम् = मुखवत्, मुखसदृशं मनः । अपिहितम् = आच्छादितम् । तत् = जीवस्य मुखस्थानीयंमनः । सर्वनियंता त्वं अपावृणु = मुखाच्छादकविषयपात्रापनयनेननिरावरणं कुरु । तत्किमर्थमित्यत आह—सत्य धर्माय = सत्यस्य प्रत्यगात्मनोधर्मभूताय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य धर्मभूतज्ञानविकासनायेति यावत्। दृष्टये = दृष्टिर्दर्शनम्, त्वत्साक्षात्कारायेतिभाव ॥१५॥

पूषन्नैकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजः ।
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पुरुषःसोहमस्मि॥१६॥

हेपूषन्नितिप्राग्वत्व्याख्येयम्। एकर्षे = एकश्चासावृषिश्चेत्येकर्षिस्तस्यसम्बोधने हे एकर्षे प्रधानर्षे। प्राधान्यञ्च तस्य सर्व विषयक द्रष्टृत्वेन। सर्वस्य नियमनात् हे यमेतिसम्बोधितम्, सर्वान्तर्यामिन्निति तदर्थः। सूर्य = स्वाश्रितानां सुष्ठु प्रेरक। प्राजापत्य = सर्वासां प्रजानांपते। स्वार्थिकः प्रत्ययः। वैश्वानर इतिवत्। रश्मीन् = भवदीयदिव्यमङ्गलविग्रहदर्शनायोग्यानन्तःकरणवृत्तिविशेषान्, व्यूह = व्यपोह दूरीकुर्वित्यर्थः। तेजः = त्वद्दर्शनयोग्यंप्रभात्मकंसौम्यं तेजः। समूह = समूहीकुरु। तत्कस्यहेतोस्तत्राह—यदिति। ते = तव अतिकल्याणतमं सौन्दर्यमाधुर्यमार्दवादिगुणातिशयेन प्रियतमं सर्वेभ्यः कल्याणगुणेभ्य अतिशयितं कल्याणञ्च शुभाश्रयभूतमित्यर्थः। ते यद्दिव्यं रूपं तत् पश्यामि पश्येयम्। लकारव्यत्ययश्छान्दसः। ब्रह्मात्मकत्व तन्नियम्यत्वतत्तन्त्रसत्वपराधेयत्वधर्मैश्चक्षेत्रज्ञानांब्रह्मणासह स्वाभाविकोऽभेद इत्याशयेनाह—योसावसौ पुरुषः। गुणोपसंहारन्यायेन भेदोऽपिवोद्धव्यः परमात्मनासह प्रत्यगात्मनांसर्वनियन्तृत्वसर्वात्मत्व सर्वव्यापकत्वादिधर्मेणस्वाभाविकभेदस्तथाच चेतनाचेतनं सर्वं ब्रह्म भिन्नाभिन्नमितिभावः ॥ १६ ॥

देहाद्यतिरिक्तं स्वात्मानं प्राङ्निर्दिश्य तदनुग्रहं प्रार्थयते—

वायुरनिलममृतमथेदं भस्मान्त ँ शरीरम् ।
ॐ क्रतोस्मर कृत ँ स्मर क्रतोस्मर कृत ँ स्मर ॥१७॥

वायुरनिलममृतमित्येतानि पदानि लिङ्गव्यत्ययेन विभक्तिव्यत्ययेन समानाधिकरणानि। अर्थवशाद्विभक्तेर्विपरिणामः सर्वसम्मतस्तथाचायमर्थः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वातीतिवायुरिति यौगिकार्थमाश्रित्य वायुशब्देन जीवात्मा उच्यते । स्वप्रारब्धकर्मानुगुणेश्वरेच्छावशेन देवमनुष्यतिर्यङ्योनिषु लोकान्तरेच गन्तृत्वाद्वायुशब्दाभिधेयःप्रत्यगात्मा । अनिलमित्यस्य नपुंसकस्य पुंलिङ्गत्वेन तत्पदोत्तरद्वितीयायाः प्रथमान्तत्वेन च व्यत्ययः । एवम मृतमित्यत्रापि द्रष्टव्यम् ।

अनिलम्—अ = ब्रह्मैव निलं निलयनमाश्रयोयस्यासौतथोक्तः परमेश्वराश्रितोजीवः । अमृतम्—स्वरूपतोधर्मतश्चाविनाशी । "अविनाशी वारेयमात्मानुच्छित्तिधर्मा ।" (बृ० ४।५।१४) इतिश्रुतेः । एतेन देहादिभ्योऽतिरिक्तोहरेरधीनीनित्यज्ञानाश्रय इतिजीवस्वरूपं निर्दिष्टम् । प्रत्यगात्मशरीरयोरमृतत्वामृतत्वाभ्यां भेदमाह— अथेदंभस्मान्तंशरीरमिति । प्रकृतादर्थादर्थान्तरनिर्वचनमत्राथशब्दार्थः । कर्मवश्यमिदंशरीरंभस्मान्तं = भस्मान्तेयस्यतत् । अनेन शरीरस्य नश्वरत्वात् द्रुतंभगवदुपासनायांप्रवर्तयितव्यमिति ध्वनितम् । चिदचिद्वस्तुनोविविच्य प्रेरितारं सर्वेश्वरं प्रणवेनोपादत्ते ओमिति । क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरस्तस्यवाचकःप्रणव-इतियोगदर्शनेऽभिहितम् । भगवदनुग्रहं प्रार्थयते—क्रतो स्मर इति । क्रतो = श्रौताग्निष्टोमात्मकविष्णो मां स्मर = भक्तकर्मकं यद्विष्णोः-स्मरणं तदनुग्रहस्तद्बुद्ध्याविषयीकुरु । अहं स्मरामि तन्द्भक्तं नयामि परमांगतिमितिश्रीमुखवचनमनुसन्धेयम् । कृतं स्मर = यत्कृतं यत्किञ्चिदानुकूल्येन त्वदनुशीलनं कृतं तं प्रतिसन्धाय त्वमेव शेष पूरणं कुर्वित्यर्थः । क्रतोस्मरेतिपुनर्वचनमादरार्थम् ॥ १७ ॥

पुनरपि प्रकारान्तरेण प्रार्थयते—

अग्ने नय सुपथा राये अस्मान् विश्वानिदेव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम । १८ ॥

हे अग्ने = अग्रतरेनयनशील । अस्मदनुष्ठितानि विश्वानि = सम्पूर्णानि मोक्षायपर्याप्तानि । वयुनानि = ज्ञानानि । विद्वान् = जाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नस्त्वं । राये = इष्टधनप्राप्तये श्री सर्वेश्वरधनावाप्तयइतियावत् । सुपथा = पुनरावृत्तिवर्जितेनार्चिरादिमार्गेण । अस्मान् नय = प्रवर्त्तय । त्वदुपासनोत्पत्ति प्रतिबन्धकं कुटिलं पापमपनयेत्याह—अस्मत् = अस्मत्सकाशात् जुहुराणम् = कुटिलं बन्धात्मकम् । एनः = पापम् । अनिष्टं कर्मेतियावत् । युयोधि = वियोजय । युयो वियोगइति धातुः । हे देव, एतदर्थं ते = तुभ्यं वयं । भूयिष्ठाम् = अनन्यगतित्वेनावृत्तितो भूयसीम् । नमउक्तिम् = स्वावधिकोत्कर्षवत्तया ज्ञापनं नमःपदार्थः । नमस्कारवचनं विधेम = विदध्महे ॥ १८ ॥

एतदुपनिषद्आदिममन्त्रेणविश्वस्यहरेरधीनत्वंतत्त्वत्रयं वैराग्यञ्चोपदिष्टम् । द्वितीयतृतीयमन्त्राभ्यां ब्रह्मविद्याङ्गनिष्कामकर्मानुष्ठानम् । शास्त्रविधिमुत्सृज्य ये स्वेच्छया निषिद्धकर्माचरन्ति, ते निरयपातिनइत्यभिहितम् । तुर्यपञ्चम मन्त्राभ्यां सर्वावासत्वेन प्रस्तुतस्येशस्यानन्तविचित्रशक्तियोगमुपदिष्टम् । षष्ठमन्त्रेण सर्वं जगद्ब्रह्मात्मकमित्यनुत्सन्धास्यैहिकं प्रयोजनं प्रतिपादितम् ।

तदग्रिममन्त्रेण जगद्ब्रह्मणो भेदसहिष्णुरभेदसम्बन्धं विज्ञानतोविदुषो शोकमोहगन्धोपिनात्रतिष्ठतइत्युपदिष्टं सच्चिदानन्द दिव्यमङ्गलविग्रहरूपो भगवान् प्राप्यः तदुपासकश्चेत्थमिति तदग्रिममन्त्रेणाभिहितम् ।

त्रिभिर्मन्त्रैः केवल कर्मावलम्बिनः केवलविद्यावलम्बिनश्च पुरुषान्विनिन्दन् विद्याविद्ययोरङ्गाङ्गिभावेनसहानुष्ठानं मोक्षावाप्तिसाधनमुपदिष्टम् । त्रिभिर्मन्त्रैः सम्भूतिमात्रनिष्ठानामसम्भूतिमात्रनिष्ठानां निरयप्राप्तिमभिधायोभयनिष्ठानान्तु मृत्युतरणामृतत्वप्राप्तिरूपफलमभिहितम् । पञ्चदशमन्त्रेणस्वरूपविकाररहितस्यप्रत्यगात्मनोमनः भगवद्विषयकानुभूतिप्रतिबन्धेनविषयसुखेनाच्छादितं तेन भगवत्साक्षात्कारो न भवति तं तिरोधानं कुर्विति प्रार्थनाऽभिहिता । षोडशमन्त्रे भवदीयदिव्यरूपदर्शनानुपयुक्तानन्तःकरणवृत्तिविशेषणान् निरस्य त्वद्दर्श-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोपयिकं दिव्यं नयनं देयं येन तव दिव्यरूपं पश्यामीति प्रार्थना पुरुषेऽभेदानुसन्धानञ्चोपदिष्टम् । सप्तदशमन्त्रेण देहेन्द्रियादिभ्योऽतिरिक्त-मात्मानं विविच्य प्रणवपदवाच्यस्य पुरुषोत्तमस्योपासनां विधाय च तदनुग्रहस्य प्रार्थना कृतेति निर्धारितम् । अष्टादशमन्त्रेण त्वत्प्राप्ति प्रतिबन्धकमस्माकंपापमपाकृत्यार्चिरादिमार्गेणस्वेष्टधनावाप्तयेऽस्मान् प्र-वर्त्तयैतदर्थं भूयसींनमउक्तिंविधेमेतिप्रार्थनोपदिष्टा । इत्यनुसन्धेयम् ।

इति श्रीभगवदावतारश्रीसनन्दनादिप्रवर्तितसत्सम्प्रदायानुगत
निखिल रसिकचक्रचूडामणि श्री १०८ स्वामिहरिदासपदा-
श्रिताश्रित स्वामिनीशरणपदाश्रितामोलकरामेण
पूर्वाचार्योक्तितः संगृहीता
तत्त्वप्रकाशिका टीकासंवलिता,
ईशावास्योपनिषत्
समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीनिकुञ्जविहारिणे नमः ।

श्रीभगवन्निम्बार्कमहामुनीन्द्राय नमः ।

उपनिषत्प्रकाशिका टीका संवलिता

केनोपनिषत्

श्रोत्रादेश्च नियन्ता यश्चक्षुर्वागाद्यगोचरः ।
श्रीमुकुन्दः परं ब्रह्म तं कृष्णं गुरुमाश्रये ॥ १ ॥
श्री निम्बार्क मताम्भोधि सन्तारे भाष्य नौ करः ।
श्री श्रीनिवासवर्य्यस्तच्चरणौ शरणं वृणे ॥ २ ॥
निम्बादित्यं गुरुं नत्वा सम्प्रदायानुसारतः ।
केनोपनिषदो व्याख्यां व्याकरिष्ये यथामति ॥ ३ ॥

ॐ । आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं । माहंब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्म्मास्ते मयि सन्तु ते मयि सन्तु । ॐ शान्तिः शान्तिः शान्तिः । हरिः ॐ ।

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥१॥

अथ कश्चिन्मुमुक्षुर्निष्कामकर्म्मानुष्ठानविशुद्धान्तःकरणतया सर्वनियन्तृवस्तुजिज्ञासुर्विधिवद्गुरुमुपेत्य मन आदि करणानां जड़तया स्वतः प्रवृत्त्यनुपपत्तिमनुमाय तत्प्रवर्त्तकं स्वतन्त्रं चेतनं बुभुत्समानः पृच्छतिस्म । केनेषितमित्यादिना । केन प्रेरितं सत् मनः, इषितम्, इट्प्रयोगश्छान्दसः । इष्टं स्वविषयं प्रति पतति गच्छति । ननु स्वतन्त्रं मनः स्वयमेव स्वविषयं प्रति गच्छतीति प्रसिद्धया प्रश्नो न युक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति चेत्तर्हि प्रवृत्त्यादिविषये मनसः स्वातन्त्र्ये सर्वथा अनिष्ट चिन्तनं न स्यात्। अनर्थञ्च जानतोऽपि सङ्कल्पदर्शनात्। अतिदुःखप्रदेच परस्त्रीगमनद्यूतादिकार्य्ये वार्य्यमाणस्यापि प्रवृत्तिर्दर्शनाच्चातो युक्त एव प्रश्नः तत्र केनेति।

कर्म्मणा तत्संस्कारेण वा जीवेन वा स्वाधिष्ठितदेवेन वा अथ केनचित्सर्वनियन्त्रावेति। तत्र कर्म्मसंस्कारयोर्जड़त्वेन प्रेरकत्वासम्भवात्। जीवस्यापि स्वातन्त्र्याभावेन तेन निगृहीतस्यापि मनसो विषयासक्तिर्दर्शनात्। अधिष्ठातृदेवस्य चन्द्रादेरपि जीवत्वाविशेषेण स्वातन्त्र्याभावात्। केनचित् स्वतन्त्रेणसर्वनियन्त्राप्रेरितमिति वाच्यम्। स क इत्यभिप्रायः। केनप्राणःप्रथमःनियुक्तःप्रेरितः सन् प्रैति गच्छति स्वव्यापारे प्रवर्त्ततइत्यर्थः। प्राणस्य प्राप्यत्वं सर्वेन्द्रियवृत्तीनां तत्पूर्वकत्वात् केनेषितां प्रेरितां वाचमिमां शब्दस्वरूपां वदन्ति प्राणिनः तथा चक्षुःश्रोत्रञ्च उ भो गुरो! को देवो द्योतनस्वभावः स्वस्वविषयेयुनक्ति नियुङ्क्ते प्रेरयतीति चक्षुः श्रोत्रमिति प्राण्यङ्गत्वादेकवद्भावः। उपलक्षणञ्चेदं सर्वेन्द्रियाणाम् ॥१॥

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ
प्राणस्य प्राणः॥ चक्षुषश्चक्षुरतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥२॥

एवंपृच्छतेशिष्यायगुरुराह। श्रोत्रस्येति। उ भो शिष्य! मनआदिकारणकलापस्य को देवः स्वविषयं प्रति प्रेरयितेति यत् त्वं पृच्छसि तच्छृणु। श्रोत्रस्यश्रोत्रं स यत यस्त्वया पृष्टश्चक्षुः श्रोत्रं क उ देवो युनक्तीति।

शृणोत्यनेन श्रोत्रं शब्दाभिव्यञ्जकमिन्द्रियं तस्य शब्दाभिव्यञ्जकत्वशक्तिप्रदः, मनसो मनः मनन सङ्कल्पनादि शक्तिप्रदः, वाचो ह वाचं प्रथमार्थे द्वितीया। वागिन्द्रियस्य शब्दोच्चारणशक्तिप्रदः, प्राणस्य प्राणः प्राणन सामर्थ्यप्रदः। "को ह्येवान्यात् कः प्राण्यात् यदेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आकाश आनन्दो न स्यात्।" 'ऊर्द्ध्वं प्राणमुत्पत्यमानं प्रत्यगस्यति,' इति श्रुत्यन्तरात्। येनप्राणःप्रणीयते इति इहापिवक्ष्यते। चक्षुषश्चक्षुः रूपप्रकाशकस्य चक्षुषो रूपप्रकाशनशक्तिप्रद इत्यर्थः। तथाच स इति तच्छब्दादितः सर्वान्तर्यामितयाश्रोत्रादिसर्वं नियन्ता पुरुषोत्तमः श्रीवासुदेवकृष्णएवेति प्रकरणार्थो विवक्षितः। "यः श्रोत्रे तिष्ठन् श्रोत्रादन्तरो यं श्रोत्रं न वेद, यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद, यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद, यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद, यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरो यं चक्षुर्न वेद" इत्याद्यन्तर्यामित्वप्रतिपादकश्रुत्यन्तरात्। "मत्तः सर्वं प्रवर्त्तते, इन्द्रियाणि मनो बुद्धिः" इत्यादि स्मृतेश्च। एवं ज्ञातुः फलमाह। अतिमुच्येति। धीराः धीमन्तःभगवतःश्रीकृष्णस्य सर्वनियामकत्व ज्ञानवन्तः। अस्माल्लोकाच्छरीरात् प्रेत्य "तेऽर्चिषमेवाभिसम्भवन्तीत्यादि-श्रुत्युक्तरीत्या विरजांप्राप्यअतिमुच्य लिङ्गशरीरंत्यक्त्वाअमृताभवन्ति श्रीभगवद्भावमापद्यन्त इत्यर्थः॥ २॥

तस्य साकल्येन दुर्ज्ञेयतामाह। न तत्रेति।

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।
न विद्मो न विजानीमो यथैतदनुशिष्यात्॥ ३॥

तत्र तस्मिन्नन्तर्य्यामिणि ब्रह्मणि चक्षुर्न गच्छति तस्यापरिच्छिन्नतया साकल्येन तन्न प्राप्नोति, वाक् वेदवाणी न गच्छति इयत्तावच्छेदेननप्रतिपादयति। मनोऽपि नेयत्तावच्छिन्नतया निश्चिनोति।

इन्द्रियमनोऽगोचरतया वयमपि इदमित्थमितीयत्तावच्छेदेन न विद्मः अतोन विजानीमः, यथा येन प्रकारेणैतद्वस्तु साकल्येन कश्चिदनुशिष्यात् शिष्याय उपदिशेदिति यद्वा न तत्र चक्षुर्गच्छतीतितस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीन्द्रियत्वमुच्यते। चक्षुरादीनां तत्प्रकाश्यतया तत्प्रकाशन शक्तिमत्त्वाभावात्। रूप गन्ध प्रकाशने रसन श्रवणवत्। सूर्यादि प्रकाशने खद्योतादिवच्च ॥३॥

अथ तस्य सर्ववैलक्षण्यं सर्वव्यापकत्वञ्च प्रपञ्चयन् सम्प्रदायं दर्शयति। अन्यदेवेति।

अन्यदेव तद्विदितादथो अविदितादधि।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥४॥

तच्छ्रोत्रस्य श्रोत्रमित्यादिना प्रक्रान्त वस्तु 'विदितात्' परिच्छिन्न विषयात् कार्यादाकाशादेरन्यदेव विलक्षणम् अपरिच्छिन्नत्वात्। ननु जीवस्यापि कैश्चिद्विभुत्वाङ्गीकारात् सिद्धान्तेऽपि जीवस्य जडवर्गाद्वैलक्षण्यस्य ज्ञानधर्म्मेण विभुत्वस्य च स्वीकाराज्जीव एवास्तामिति चेत्तत्राह। अथो अविदितादिति। अविदितात् अतीन्द्रियात् क्षेत्रज्ञादधि अधिकमित्यर्थः। यद्वा अविदितात् कारणात् प्रधानमहदादिवर्गादधिकमिति। यद्वा विदितात् लौकिकाद्बद्धजीवादन्यं भिन्नम्। अविदितात् मुक्तादप्यधिकं तयोर्नियामकत्वात्। इति शुश्रुम इत्येवं श्रुतवन्तो वयं पूर्वेषां गुरूणां वचनं ये नोऽस्मभ्यं तद्वस्तु व्याचचक्षिरे उपदिष्टवन्तस्तेषामित्यर्थः ॥४॥

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥५॥
यन्मनसा न मनुते येनाहुर्मनो मतं।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥६॥

यद्वस्तु वाचा वेदलक्षणयाऽनभ्युदितप्रायं कार्त्स्न्येनागोचरत्वात्। येन च नियन्त्रा प्रेरिता वाक् अभ्युद्यते प्राणिभिरुच्चार्य्यते तदेव ब्रह्म त्वं विद्धि यद्वाचा साकल्येनाप्रतिपाद्यं यच्च वाक् प्रेरकं यत्तदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपगुणशक्त्यादिभिर्वृहत्तमं वस्तु ब्रह्मेति जानीहि। यदिदमिदङ्कारास्पदं जड़चेतनात्मकं कामिन उपासते तद्ब्रह्म न भवति। इदङ्कारास्पद प्रपञ्चविजातीयं ब्रह्म विद्धीत्यर्थः ॥ ५ ॥ यद्वस्तु मनसा कश्चिदियत्तावच्छेदेन न मनुते न जानाति। येन चान्तर्य्यामिणा मनोमतं व्याप्तमाहुः कथयन्ति तज्ज्ञाः तदेवमनोगोचरं तद्व्यापकञ्चब्रह्म त्वं विद्धि नेदमित्यादिपूर्ववत् ॥ ६ ॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥
यत्प्राणेन न प्राणाति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ९ ॥

इति प्रथम खण्ड ॥ १ ॥

यद्ब्रह्म चक्षुषा प्राकृतेन कश्चिन्नपश्यति। येन चान्तर्यामिणा व्याप्तानि चक्षूंषि पश्यन्ति जानन्ति। ब्रह्मज्ञा पश्यन्तीति पाठे दृश्यन्तीत्यर्थः। "अन्तर्बहिश्चतत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्यतरात्। तदेव चक्षुरगोचरं तद्व्यापकञ्च ब्रह्म त्वं विद्धि नेत्यादि समानम् ॥ ७ ॥ यद्वस्तु श्रोत्रेण "मेधया न बहुना श्रुतेन" इत्यादि श्रुत्यतरात् येनचश्रोत्रमिदंश्रुतं व्याप्तं तदेवेत्याद्युक्तार्थकं यद्वा यद्ब्रह्मकर्त्तृ मनसानमनुते नतस्यमनोऽधीनंमननं, चक्षुषा न पश्यति न चक्षुरधीनं रूपज्ञानं, श्रोत्रेण न शृणोति श्रोत्रानधीन शब्दज्ञानकं तदित्यर्थः। अप्राणोह्यमनाः अनिन्द्रियोऽपि सर्वतःपश्यति सर्वत शृणोति। इत्यादि श्रुत्यतरात्। शिष्टं समानम् ॥ ८ ॥

यद्वस्तु प्राणेन न प्राणति न चेष्टते प्राणानधीनस्थितिः "कश्चिन्न शृणोति तत्कृपां विना न लभते शृण्वतोऽपि यं न विदुः।" नायमात्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवचनेन लभ्य इति। येन प्राणः प्रणीयते स्वविषयंप्रतिप्राप्यते तदेव ब्रह्म त्वं विद्धि। शिष्टंपूर्ववत् ॥ ६ ॥

इति प्रथम खण्डः ॥ १ ॥

अथ द्वितीय खण्डः

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं।
यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥१॥
नाहं मन्ये सुवेदेति नो न वेदेति वेद च।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥

एवं शिष्येण पृष्टो गुरुः सर्वान्तर्यामितया मनः प्रभृति प्रवर्त्तकं श्रीकृष्णाख्यं परं ब्रह्मेत्युक्त्वा तस्येयत्तावच्छेदेन ज्ञानाविषयत्वादि प्रदर्श्य तमेव स्वार्थाभिप्रेतं शिष्यबुद्धिदार्ढ्यार्थं प्रकटयति। यदीति। यदि मन्यसे सुवेदेति सुष्ठु साकल्येनाहं ब्रह्म वेद जानामीति तर्हि दहरमल्प मेवापि नूनं त्वं ब्रह्मणो रूपञ्चेत्येतत्स्वरूपगुणादेरनन्तत्वात् रूप शब्दो गुणोपलक्षकः। यतोदहरमेवत्वंवेत्थ अथ तस्मात् यत् अस्य ब्रह्मणः त्वं त्वयि रूपं व्यत्ययश्छान्दसः। यत् अस्य देवेषु च रूपं तदपि ते त्वया उ भो शिष्य मीमांस्यं विचार्य्यमेवाद्यापि। एवमाचार्य्योक्तः शिष्यस्तद्वचनेनं सम्यक् विचार्य्याह—मन्येऽहं विदितमेव मया ब्रह्मेति ॥ १ ॥

कथं विदितं तत्राह। नाहमिति। अहं सुवेद ब्रह्मेति न मन्ये नोऽपि न वेदेति मन्ये। अपि तु वेद च जानाम्येव ब्रह्मेति। ततश्चेयत्तावच्छेदेन तस्य ज्ञानविषयत्वं नास्ति कियद्धर्म्मावच्छिन्नतया तु ज्ञान विषयत्वमस्त्येवेत्यभिप्रायः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसंहरति । यो न इति । यः कश्चनास्माकं सब्रह्मचारिणां मध्ये तत् ब्रह्म साकल्येनाहं वेदेति वक्ति स तत् ब्रह्म नो वेद न जानाति परिच्छिन्नदर्शित्वात् । यस्तु अहं न वेदेति वक्ति स वेद च अपरिच्छिन्न ब्रह्म दर्शित्वात् ॥ २ ॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ३ ॥
प्रतिबोधमविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्य्यं विद्यया विन्दतेऽमृतम् ॥ ४ ॥

शिष्याचार्य्यं संवादनिर्वृत्तमर्थं श्रुतिः स्वयं बोधयति । यस्येति–यस्य पुंसो देशादिपरिच्छेदेन ब्रह्म न मतमविज्ञातं तस्य मतं ज्ञातं भवति, यस्यतु परिच्छेदेन मतं स न वेद न जानाति । तदेव द्रढयति अविज्ञातमिति । विजानतां परिच्छिन्न ज्ञानवतामविज्ञातं ब्रह्मेति ॥ परिच्छेदमविजानतां विज्ञातं साक्षात्कृतं भवति ब्रह्मेत्यर्थः ॥ ३ ॥

ननु परब्रह्मणोऽपरिच्छन्नतयेयत्तावच्छेदेन ज्ञेयत्वाभावे कथं तेनेष्ट सिद्धिरित्यतो गुरुमुखनिर्गत वाक्य श्रवणादि परम्परा प्राप्त ध्रुवाख्यस्मृत्या कियद्धर्म्मावच्छिन्नतया ज्ञातस्यापि तस्य तदनुग्रहसहकृत तत्साक्षात्कारात् मोक्ष इत्याह गुरुः प्रतिबोधेति । येन पुंसा ब्रह्म मतं गुरुमुखात् श्रवणपूर्वकं मननविषयीकृतं प्रतिबोधेन निदिध्यासन परिपाक ध्रुवास्मृत्या परोक्षज्ञानेन विदितं साक्षात्कृतं स पुमान् अमृतं ब्रह्म तद्भावरूपां मुक्तिं हि विन्दते प्राप्नोति । यद्वा प्रतिबोधो गुरूपदेश उपासनात्मकस्तेन यस्य "गोपवैषमभ्राभं तरुणं कल्पद्रुमाश्रितम् । सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ॥ द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥" इत्यादि श्रुत्युक्तं परंब्रह्म विदितं ज्ञानविषयीभूतं भवति । तेनैव तत् सम्यग्ज्ञातं, स एव तदनुग्रहसहकृत साक्षात्कारेणामृतत्वं विन्दते इत्यर्थः । कदैतत्स्यादित्यत आह आत्मनेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मना तेनैवान्तर्यामिणा वीर्य्यं बलं स्वप्राप्तिसाधनसामर्थ्यं यदा विन्दते तदाविद्यया परमात्मोपासनयाऽमृतं परमात्मानं विन्दते लभते। नायमात्मा प्रवचनेनलभ्योनमेधयानबहुना श्रुतेन! यमेवैष वृणुते तेन लभ्यः इत्यादिश्रुत्यन्तरात् ॥ ४ ॥

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥५॥

इति द्वितीय खण्डः ॥ २ ॥

एवं ध्रुवास्मृतिर्ब्रह्मसाक्षात्कारफलेत्युक्तं सा च मनुष्य देह एव सम्पाद्येत्याह। इहेति। इह मनुष्य देहे यद्यवेदीत् परमात्मानं विदितवान्। अथ तदा सत्यंफलं ब्रह्म प्राप्तिरस्ति तेन ब्रह्म लभ्यत एव। इह यदि नावेदीत् तर्हि महती विनष्टिर्जन्मजरामरणादिप्रवाहाविच्छेदलक्षणा संसारगतिर्भवति। अतो धीरा गुणदोषविवेकिनः भूतेषु स्थावरजङ्गमेषु सर्वभूतेषु अन्तर्यामितया स्थितं परमात्मानं विचिन्त्य विशेषेण देहान्ते ध्यात्वा अस्माल्लोकात् शरीरात्प्रेत्य अमृता मुक्ता भवन्तीत्यर्थः ॥ ५ ॥

इति द्वितीय खण्डः ॥ २ ॥

अथ तृतीय खण्डः

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त। त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं-महिमेति ॥ १ ॥

परब्रह्मणः सर्वप्रशास्तृत्वं सर्वपरत्वमीश्वरेश्वरत्वं सर्वजयपराजयहेतुत्वञ्च दर्शयन्, इयत्तावच्छेदेन ज्ञानाविषयं ब्रह्मेत्युक्तार्थे आख्यायिकामारभते। ब्रह्महेत्यादिना। देवासुरसंग्रामे उपस्थिते ब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह किल देवेभ्यो देवानामर्थे विजिग्ये विजयं प्राप। देवानाविश्य जगद्विद्विषः स्वसेतुभेदकान् असुरान् जित्वा देवेभ्यो जयं प्रायच्छत्। अथ जयानन्तरं तस्य ह स्वाविष्टस्य ब्रह्मणो विजये सति देवादयः अमहीयन्त। 'महीङ् पूजायाम्' कण्ड्वादिः। पूज्यावयमिति गर्विता अभवन्। गर्वं दर्शयति। त इति। अस्मदन्तर्यामिणः सर्वकर्मफलदातुस्सर्वशक्तेर्ब्रह्मणो नाऽयं जयो महिमा चेत्यस्माकमेवायं महिमेति ऐक्षन्त अमन्यन्त ॥ १ ॥

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति ॥२॥

तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ॥३॥

तदभ्यद्रवत्तमभ्यवदत् कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥४॥

तस्मिंस्त्वयि किं वीर्य्यमित्यपीदँ सर्वं दहेयं यदिदं पृथिव्यामिति ॥५॥

टीका—तद्धहस्वान्तर्यामीश्वरकृतासुरविजयाज्ञाननिमित्तं गर्वादि। एषः देवानांविजज्ञौ विज्ञातवान्। तेभ्यो देवेभ्यस्तान्स्वात्मतत्वं बोधयितुं ह स्फुटं यक्ष रूपेण प्रादुर्बभूव ब्रह्मेति। तत्प्रादुर्भूतंयक्षरूपं ब्रह्म देवा न व्यजानन्त न विज्ञातवन्तः। इदं यक्षं पूज्यं महद्भूतं किमिति ॥२॥

ते चान्तर्भया देवा अस्मदग्रेसरोऽयं सर्वज्ञकल्प एतज्जानीयादित्यभिप्रायेण अग्निमब्रुवन्। हे जातवेदः! एतदस्मत्प्रत्यक्षभूतं यक्षं विजानीहि किमेतद्यक्षमिति। तथाऽस्त्वित्युक्त्वाऽग्निस्तद्यक्षमभ्यद्रवत अभिमुखमगमत् प्रष्टुमिच्छुं तूष्णीं भूत्वा स्वसमीपेस्थितमग्निं कोऽसी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यभ्यवदत् यक्षम्। एवं पृष्टोऽग्निरब्रवीत्। अग्निरिति जातवेदा इति च नामद्वयेन प्रसिद्धोऽहमस्मीति ॥३-४॥

तं ब्रह्माब्रवीत्तस्मिंस्ताद्दशेत्वयि किंवीर्य्यं सामर्थ्यमिति। सोऽब्रवीत्। यदिदं पृथिव्यामस्ति सर्वमपीदमहं दहेयं भस्मीकुर्य्यामिति ॥५॥

तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स ततएवनिववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥६॥

टीका—तस्मै एवं गर्ववतेऽग्नये एतत्तृणं ममाग्रे दहेत्युक्त्वाऽग्नेः पुरतः निदधौ स्थापितवदित्यर्थः। तत्तृणंदग्धुंनशशाक आहत प्रतिज्ञस्ततएवयक्षात्यक्षरूपमज्ञात्वानिववृतेदेवान्प्रति गतवान्। नैतद्यक्षमशकं शक्तवानहंविशेषेणज्ञातुं यदेतद्यक्षमिति देवान्प्रति गत्वाऽब्रवीदिति शेषः ॥६॥

अथ वायुमब्रुवन् वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥७॥

तदभ्यद्रवत्तमभ्यवदत् कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥८॥

तस्मिंस्त्वयि किं वीर्य्यमित्यपीदँ सर्वमाददीयं यदिदं पृथिव्यामिति ॥९॥

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स ततएवनिववृते नैतदशकंविज्ञातुं किमेतद्यक्षमिति ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथेन्द्रमब्रुवन् मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥११॥ स तस्मिन्नाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ताꣳ होवाच किमेतद्यक्षमिति ॥१२॥

इति तृतीय खण्डः

टीका—अथानन्तरम् अस्य सर्वत्र गतिमत्वादन्तरिक्षनिलयनाच्चैव यक्षं ज्ञातुमयं समर्थ इत्यभिप्रायेण वायुमब्रुवन्निति ॥७-८॥

आददीयम् । आदद्यां गृह्णीयामित्यर्थः ॥९॥

तस्या इति पूर्वेण समानार्थकम् ॥१०॥

अथ वाय्दनन्तरम् । अस्मदीश्वरोऽयं बलवान् एष जानीयादित्यभिप्रायेणेन्द्रमब्रुवन्नित्यादि पूर्ववत् । तस्मात्तिरोदधे तस्मात् स्वसमीपं प्राप्तादिन्द्रात्तस्मात्प्रदेशाद्वा तिरोहितमभूद् ब्रह्म । देवेश्वरत्वेन स्थापितोऽयं मया एतस्य गर्वभङ्गो मा भूदित्यभिप्रायेण । अथवा देवेन्द्रत्वादेतस्य गर्वोऽवश्यमपनेय इत्यभिप्रायेण तेन सह संवादमपि नाकरोत् ॥११॥

स इन्द्रः तस्मिन्नेव यक्षऽतिरोधानाकाशप्रदेशे यत्र यक्षं तिरोदधे स्त्रियमाजगाम, तां दृष्ट्वा तस्याः समीपं प्राप । तत्रैव स्थित्वा किं तद्यक्षमिति चिन्तयत इन्द्रस्य स्वस्मिन् भक्तिं बुध्वा इन्द्रोपदेशार्थं यक्षेणैव स्वशक्तिः काचिदुमारूपिणी गुरुस्थानीया प्रकटिता । इन्द्रस्तां हैमवतीं स्वर्णालङ्कारवतीमिव बहु शोभमानामतिशोभावतीं, एतद्यक्षं किमिति ह स्फुटमुवाच पृष्टवानित्यर्थः ॥१२॥

इति तृतीय खण्डः

20593

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चतुर्थ खण्डः

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ॥ १ ॥

तस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्तेन ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ २ ॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ ३ ॥

टीका—एवमिन्द्रेण पृष्टा सा त्वया पृष्टं यद्यं ब्रह्मेति ह किल उवाच । एतत् एतस्य युष्मदाविष्टस्य ब्रह्मणः परमात्मनो वै किल विजये महीयध्वम् । अस्मदन्तर्यामिणैवासुरा जिताः, वयं तत्र निमित्तमात्रमिति मत्वा तस्यैव विजयनिमित्तं यूयं महिमानं प्राप्नुथ । मास्य स्वविजयनिमित्तं गर्वं कुरुध्वमित्यर्थः । तत इति । ततो ह्वै देवीवाक्यादेव इन्द्रो यत्तं विदाञ्चकार ब्रह्मेति । इतीन्द्रस्य स्वातन्त्र्यं व्यवच्छिनत्ति ॥ १ ॥

तस्माद्वै किल एते देवाः अतितरामिव इवेत्यनर्थकः । स्वमाहात्म्येनान्यान् देवानतिशयेनातिक्रान्तवन्तः । तानाह यदग्निरिति । योग्निर्योवायुर्य इन्द्रः । तस्मादित्युक्तहेतुं व्यक्तीकरोति । तेहीति । ते देवा हि यत एनद्यत्तरूपं ब्रह्म नेदिष्ठं समीपे स्थितं पस्पर्शुः (स्पृश संस्पर्शने) दर्शनादिना तत्स्पर्शं चक्रुरित्यर्थः । गुणश्छान्दसः । हि यतश्च हेतोस्ते अग्न्यादय एनत् ब्रह्म प्रथमः प्रथमं विदाञ्चकार विदांचक्रुरेतद्ब्रह्मेति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्राग्निवाय्वोरिन्द्रोपदेशात् यत्तस्य ब्रह्मत्वज्ञानम् । इन्द्रस्तस्या-उपदेशेन ताभ्यां प्रथमं यत्तं ब्रह्मत्वेन विवेद अत इन्द्रस्ताभ्यामप्यधिक इत्याह । तस्माद्वा इति । पूर्ववाक्येन समार्थमेतत् ॥ ३ ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३ इतीति न्यमीमिषदा ३ इत्यधिदैवतम् ॥ ४ ॥

अथाध्यात्मं यदेनद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥ ५ ॥

टीका—देवताविषयं ब्रह्मण उपास्यरूपमुपदिशति । तस्यैष-इति । तस्य प्रकृतस्य ब्रह्मण एष आदेश उपदेशः । कोऽसावित्यत आह । यदेतद्विद्युतो व्यद्युतदा आ उपमार्थेऽविद्युतत्, इति बहुत्वं छान्दसत्वात् । विद्युदिव यदेतद्ब्रह्म व्यद्युतत् । दीप्तं कृतवदित्यर्थः । विद्युतादिति पाठे अड्भावश्च्छान्दसः । यथा विद्युदन्धकारं विदार्य्य सकृत् सर्वतः प्रकाशते तिरोधत्ते च, एवम्ब्रह्म देवेभ्यः सकृदात्मानं दर्शयित्वा तिरोदधे । इति विद्युदिवोपास्यं ब्रह्मेति भावः । यद्वा विद्युत इति षष्ठी, विद्युत्सम्बन्धितेजो यथा सकृत्विद्युतत् एवं यदेतद्ब्रह्म सकृद्विद्योतितवत् । यथा सकृद्विद्युतमिति श्रुत्यन्तरात् । इति शब्द आदेशपरामर्शार्थः। इच्छब्दश्चार्थे । अयञ्च तस्यापर आदेशः । न्यमीमिषदा इति स्वार्थे णिच् । यथा चक्षुर्विषयं प्रति प्रकाशते निमिषति च एवं ब्रह्माग्न्यादीन् प्रति प्राकाशिष्ट न्यमीमिषत्, तिरोदधे चेत्यर्थः । यद्वा इति इत् द्वावनर्थकौ निपातौ, यथा कश्चिन्न्यमीमिषत चक्षुर्निमेषं कृतवान्, तथा ब्रह्मेन्द्रोपरामकाले खे तिरोऽभूदित्यर्थः । इत्येवं देवेषु तस्योपमान दर्शनमुक्तम् ॥ ४ ॥

अथानन्तरमात्मनि देहे इत्यध्यात्मं देहे तस्योपदेश उच्यते—यदिति । एतद्ब्रह्म मनो गच्छतीव सम्यक् न गच्छति चिरं न विषयीकरोतीति यत एष उपदेशः यथा परमात्मानुगृहीतस्योपासकमनसो ब्रह्मविषयीकरणम् ! एवं यत्तस्य ब्रह्मणः प्रकाशोऽपि ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन ब्रह्मणाऽनुगृहीतं सत् मन एतद्ब्रह्मोपस्मरत्यभीक्ष्णं भृशञ्च समीपतश्चिन्तयति विषयीकरोति । कीदृशं मन इत्यत आह सङ्कल्प इति । सङ्कल्पयति नानाविषयानिति सङ्कल्पः सङ्कल्पकमित्यर्थः । अजहल्लिङ्गत्वाच्छान्दसत्वाद्वा लिङ्गव्यत्ययः । तस्यैष उपमादेशः । यथा भक्तानां मनो गुरुद्वारा परमात्मनाऽनुगृहीतं सम्यक् जानाति, एवमिन्द्रादयोऽपि देवीद्वारा तदनुगृहीतास्सन्तस्तद्यक्षं ब्रह्मत्वेन सम्यक् ज्ञातवन्त इत्यभिप्रायः ॥ ५ ॥

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभिहैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥

उपनिषदं भो ब्रूहीत्युक्ता य उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ७ ॥

टी०—अन्वर्थं तस्योपासनमाह । तद्धेति । तद्ब्रह्म ह किल तद्वनं नाम तत् ततं व्याप्तं च तत् वनं सर्वेषां वननीयं सम्भजनीयञ्चेति, तद्वनं नाम प्रख्यातं यत्तद्वनमिति । कल्याणगुणहेतुकं वननामकं तस्मात्तद्वनमित्यनेनैव कल्याणगुणाभिधानेनोपासितव्यम् । अनेन नाम्नोपासकस्य फलमाह । स य इति । स यः कश्चित् अधिकारी, एतद्ब्रह्म एवं तद्वन नामेत्येवं रूपेण वेदोपास्ते ह किल एनमुपासकं सर्वाणि भूतानि अभिसंवाञ्छन्ति सर्वाभिलषितो भवति ॥ ६ ॥

एवमनुशिष्टः शिष्यः पुनराचार्य्यं पृच्छति । उपनिषदमिति । भो गुरो उपनिषदं ब्रूहीति । तत्र नायं श्रुतां ब्रह्मविद्यां पुनः पृच्छति, पिष्टपेषणवत् प्रश्नस्य पुनरुक्त्यापत्तेः । नाप्यवशिष्टां, प्रेत्यास्माल्लोकादमृता भवन्ति तस्याः फलकथनेनोपसंहारात् । तर्हि किं विद्यास्वरूपं पृच्छत्युत्पन्नविद्याया अवस्थितिहेतुमथ विद्यास्थानं वेति मनसि कृत्वा गुरुः क्रमेणोत्तरमाह । उक्तेति । अभिहिता ते तुभ्यमुपनिषत् । का सेत्यत आह । ब्राह्मीमिति । ब्रह्मण इयं तां ब्रह्मविद्यां वाव एव ते तुभ्यमुपनिषदमब्रूमेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री निम्बार्क महामुनीन्द्राय नमः
श्री निकुञ्जविहारिणे नमः

काठकोपनिषत्

इन्दीवरदलश्यामं गोपीजनमनोहरम् ।
पूर्णानन्दप्रदं नित्यं वन्देऽहं नंदनन्दनम् ॥ १ ॥
निम्बभानुपदद्वन्द्वं प्रणमामि मुहुर्मुहुः ।
यद्वन्दनेन मन्दोऽपि लभते तत्समानताम् ॥ २ ॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम् ।
वादरायणसूत्राणां भाष्यकारं मुनीश्वरम् ॥ ३ ॥
नत्वाऽन्यानूदेशिकान्मान्यान्सम्प्रदायानुसारतः ।
काठकोपनिषद्व्याख्यां व्याकरिष्ये यथामति ॥ ४ ॥

मू०—उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य नचिकेता नाम पुत्र आस ॥१॥ त्ँ्ह कुमार्ँ्सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यत ॥ २ ॥

टीका—वश कान्तौ कान्तिरिच्छा तस्माद्धातोः शतृप्रत्यये उशान्निति रूपं निष्पन्नम् स्वर्गलोकमिच्छन् । ह वा इति निपातौ वृत्तार्थस्मरणार्थौ । वाजमन्नं तद्दानेन श्रवो यशो यस्य स वाजश्रवास्तस्यापत्यं वाजश्रवसः स महर्षिः सर्वस्वदक्षिणाकेनेजे यजनं कृतवानिति यावत् । स तस्मिन् क्रतौ सर्ववेदसं सर्वस्वदक्षिणां ददौ दत्तवान् । तस्य यजमानस्य नचिकेता नाम पुत्र आस बभूव ह किल ॥ १ ॥

तं ह नचिकेतसं कुमारं सन्तं बालमेव ऋत्विग्भ्यः यज्ञसदसि मिलिता ये सदस्यास्तेभ्यश्च दक्षिणासु नीयमानासु दक्षिणात्वेन विभागेन दीयमानासु निरिन्द्रियासु गोषु च सतीषु श्रद्धा पितुर्हितकामप्रयुक्तास्तिक्यबुद्धिराविवेश । हेत्याश्चर्यं कुमारस्यापि श्रद्धा जातेति । आविष्टश्रद्धा नचिकेता एवममन्यत ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनिषत्स्वरूपस्य तत्प्रतिपाद्यब्रह्मस्वरूपस्य च ब्रह्मेति होवाचेत्यादिनोक्तत्वान्न तत्र वक्तव्यमवशिष्यते ॥ ७ ॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ८ ॥

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येष्ठे प्रतितिष्ठति प्रतितिष्ठति ॥ ९ ॥

इति चतुर्थ खण्डः

टीका—तस्या विद्यायाः तपो दमः कर्म च प्रतिष्ठा प्रतिष्ठाहेतुः। तैर्हि शुद्धान्तःकरणेषु विद्या प्रतिष्ठिता भवति। तत्र तपो देहेन्द्रियमनसा समाधानं कृच्छ्रचान्द्रायणादि वा शास्त्रविचारो वा। दम उपशमः। कर्म गुर्वाद्याराधनं स्ववर्णाश्रमोचितक्रियाकरणं वा। वेदाः सर्वाण्यङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षट्। सत्यञ्च तस्या आयतनं स्थानमित्यर्थः। तत्र वाङ्मनःकायानामकौटिल्येनापीडाकरं यथाभूतवचनं सत्यम् ॥ ८ ॥

तज्ज्ञातुः फलमाह। य इति। य एतां ब्रह्मविद्यां, एवं पूर्वोक्तप्रकारेणोक्तां वेद स पाप्मानमपहत्य विधूयानन्तेऽपरिच्छिन्ने स्वर्गे लोके श्रीवैकुण्ठलोके ज्येष्ठे श्रेष्ठे सर्वोत्तर इति यावत्। प्रतितिष्ठति प्रतिष्ठितो भवतीत्यर्थः। ज्येष्ठ इति ज्यायसीति वक्तव्ये छान्दसः। ज्यायःपदसमभिव्याहारात् स्वर्गलोकशब्दो भगवल्लोकपरः। द्विरुक्तिर्गुरुशिष्यसंवादसमाप्त्यर्था ॥ ९ ॥

इति सनकसम्प्रदायप्रवर्त्तकाद्याचार्य्य श्रीभगवन्निम्बार्कमतानुयायिश्रीमन्मुकुन्ददेवाचार्यविरचिता केनोपनिषद्व्याख्या सम्पूर्त्तिमगात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मू०—पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोका तान्स गच्छति ता ददत् ॥ ३ ॥

टीका—कथममन्यत इत्यत आह । पीतेति । पीतमेव न तु पातव्यमुदकं याभिस्ता पीतोदकाः । जग्धं भक्षितमेव न तु भक्षणीयं तृणं यासां ता जग्धतृणाः । दुह्यत इति दोहः क्षीरं दुग्धमेव न तु दोह्यमस्ति यासां तास्तथोक्ताः । निरिन्द्रियाश्चक्षुःपादेन्द्रियशून्याः । अप्रजननसमर्थाः, या गावस्ता गा ऋत्विग्भ्यः दक्षिणात्वेन ददत् प्रयच्छन् यः पुरुषः स एते प्रसिद्धा अनन्दा नन्दयनीति नन्दाः सुखजनकास्ते न भवन्तीत्यनन्दा असुखा लोकास्तान् गच्छति ॥ ३ ॥

स होवाच पितरं तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं त ँ होवाच मृत्यवे त्वा ददामीति ॥४॥

बहूनामेमि प्रथमो बहूनामेमि मध्यमः । किं ँ स्विद्य-मस्य कर्त्तव्यं यन्मयाऽद्य करिष्यति ॥ ५ ॥

अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे । सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ॥ ६ ॥

टीका—एतादृशगोदानकर्त्तुरस्मत्पितुरनर्थावाप्त्यावश्यं भवितव्यमतः पुत्रेण मया स निवारणीय इति मन्यमानः स कुमारो माम् ऋत्विग्भ्यो दत्वाऽपि ईदृश्य गावो न देया इति भावेन पितरमुवाच किमिति (हे तत) तात मां कस्मै दक्षिणार्थं दास्यसीति । एवमुक्ते बालस्वभावत्वादेवं वदति इति पित्रा मन्यमानेन पित्रोपेक्ष्यमाणोऽपि स कुमारः कस्मै मां दास्यसीति, द्वितीयं तृतीयं द्विवारं त्रिवारमथोवाच । नतादृशो बालकस्वभावः सम्भवतीति मत्वा कुपितः सन् पिता तं कुमारं प्रत्युवाच । त्वा त्वां मृत्यवे यमाय दास्यामीति । त्वं म्रियस्वेति शशाप ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं शप्तः पुत्र आह । बहूनामिति । बहूनां शिष्याणां पुत्राणां मध्ये प्रथमः मुख्यः सन् यममेमि । वर्तमान सामीप्याद्वर्त्तमानव्यपदेशः । मध्यमानां च बहूनां मध्यमः सन् वा यममेमि । यथावसरं गुरोरिष्टं ज्ञात्वा शुश्रूषणे प्रवृत्तिर्मुख्या । आज्ञावशेन मध्यमा । तदपरिपालनेनाधमेति सूचनाय प्रथममध्यमशब्दौ प्रयुक्तौ । यमो मया यत्करिष्यति तत्कर्त्तव्यं यमस्य किंस्वित् न किमपि प्रयोजनं घटते, यमस्य पूर्णकामत्वात् । तथा च निष्प्रयोजनकमेव त्वद्दीयं दानमिति भावः ॥ ५ ॥

ईदृशं पुत्रवचनं श्रुत्वा क्रोधावेशेन मया तथा वचनमुक्तं नेदृशं पुत्रं यमाय दातुमुत्सहे इति पश्चात्तप्तहृदयं पितरमालोक्योवाच । अनुपश्येति । अनुपश्यालोचय यथा येन प्रकारेण पूर्वे पितृपितामहप्रपितामहाः स्वधर्मे सत्यवचनादौ स्थिताः । यथा चापरे साधवोऽद्यापि तिष्ठन्ति । तांश्च प्रतिपश्यालोचय तथा वर्तितव्यम् । न च मृषा कृत्वा कश्चिदजरामरो भवति यतः सस्यमिव प्रावृट्काले वर्षधारासिक्तं सस्यं प्रादुर्भवति, तथा सञ्चितकर्मोद्भवे मनुष्योऽपि देहान्तरं प्राप्नोति । मर्त्यः पच्यते जीर्णो म्रियते मृत्वा च सस्यमिवाजायते पुनराविर्भवति म्रियतेचातो किं मृषा करणेन पालय सत्यं प्रेषय मां वैवस्वतायेति भावः ॥ ६ ॥

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् ॥
तस्यैता ँ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७ ॥

आशाप्रतीक्षे सङ्गत ँ सूनृतां चेष्टापूर्ते पुत्रपशू ँ श्च सर्वान् । एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे ॥ ८ ॥

टी—स बाल एवं पितृसन्निधावुक्त्वा यमालयं जगाम । स च यमागमनमवेक्षमाणस्तस्य गृहे तिस्रो रात्रीरनश्नन्नेवोवास ।

ततो यमो लोकांतरादागत इति श्रुत्यनुक्तमपि मध्ये वक्तव्यम् ! आगते तु यमे यमभार्य्या यमं प्रत्याह । वैश्वानर इति । हे वैवस्वत विवस्वतः

फा-५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यस्य पुत्र ! अतिथिर्ब्राह्मणः गृहिणां गृहान् वैश्वानरोऽग्निःसन् प्रविशति। अतस्तस्यातिथिरूपवैश्वानरस्यैतां श्रुत्याद्युक्ताम् अर्ध्यादिरूपां शान्ति शान्तिकारणं कुर्वन्ति। अन्यथा वैश्वानरेणातिथिना दाहः प्रसज्येत। अतोऽर्ध्याद्यर्थमुदकं हर आहर ॥ ७ ॥

किञ्चानश्नन्ब्राह्मणो यस्याल्पमेधसः पुरुषस्य गृहे वसति एतत् एतस्याशाप्रतीक्षे। अप्राप्तस्य वस्तुनः प्राप्त्यर्थमिच्छा आशा। इदमेतस्मिन्काले सिद्ध्यतीति निश्चित्य प्रतीक्षणं प्रतीक्षा। ते आशाप्रतीक्षे सङ्गतं सुहृत्सङ्गतं सूनृताञ्च वाणीमिष्टापूर्ते इष्टं यागजं पूर्त्तमारामादि क्रियाजं फलं सर्वान् पुत्रपशूँश्च वृङ्क्ते, बर्जयति, विनाशयतीति यावत्। अयञ्च मत्कृतां पूजामगृह्णन्नेवास्त इति ॥ ८ ॥

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः। नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन् बरान् वृणीष्व ॥ ९ ॥

टीका—भार्याभिरेवमुक्तो यमः पूजापुरःसरं नचिकेतसमुपसङ्गम्योवाच। तिस्र इति। हे ब्रह्मन् नमस्यो नमस्कारार्होऽतिथिस्त्वं यत् यस्मान्मे मम गृहे तिस्रो रात्रीरनश्नन्नेवावात्सीः वासमकार्षीस्तस्मात् हे ब्रह्मन् ते तुभ्यं नमोऽस्तु। मे मह्यं स्वस्त्यस्तु मङ्गलमस्तु। प्रति, तस्य प्रतीकाराय त्रीन् वरान् वृणीष्व ॥ ९ ॥

शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माऽभिमृत्यो ॥ त्वत्प्रसृष्टं माऽभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥१०॥ यथा पुरस्तद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः ॥ सुखꣳ रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान् मृत्युमुखात्प्रमुक्तम् ॥ ११ ॥

टीका—एवमुक्तो नचिकेताः प्रथमं वरं वृणोति।। शान्तसंकल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति। हे मृत्यो गौतमः गौतमस्य गोत्रापत्यं मम पिता मामभि मांप्रति वीतमन्युर्विगतकोपोऽत एव मदनिष्टे शान्तसङ्कल्पः, सुमनाः प्रसन्नमनाश्च यथास्यात्। किञ्च त्वत्प्रसृष्टं मां त्वया विनिर्मुक्तं प्रेषितं गृहं प्रति मां प्रतीतः स एवायं पुत्र आगत इति प्रत्यभिजानन् यथाऽभिवदेत् सम्यग्वदेत्। एतत्पूर्वोक्तं त्रयाणां वराणां मध्ये प्रथमं वरं वृणे ॥१०॥

एवमुक्तो यमस्तथा भवत्वित्याह। यथेति। उद्दालकस्यापत्यं पुमानित्यौद्दालकिरारुणिररुणस्य गोत्रापत्यमारुणिस्तव पिता मृत्युमुखात्प्रमुक्तं त्वां ददृशिवान् पश्यन् मत्प्रसृष्टो मत्प्रेरितो वीतमन्युःसन् पुरस्तात् पूर्वं त्वां प्रति यथा येन प्रकारेणावर्त्तत तथा भविता। प्रतीतः प्रत्यभिज्ञावांश्च भविता। रात्रीः सुखं शयिता सुखनिद्रां प्राप्स्यतीति यावत्। अत्र पुरस्ताद्भवितेत्यनेन, सुखं रात्रीः शयितेत्यनेन च शान्तसङ्कल्पत्वं सुमनस्कत्वञ्चोक्तम्भवति ॥ ११ ॥

नचिकेता द्वितीयं वरं प्रार्थयितुमाह।

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति ॥ उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥ १२ ॥

टीका—स्वर्गे लोके भयं किञ्चन किमपि नास्ति। अत्र स्वर्गपदस्य मोक्षस्थानपरत्वं, भयादिराहित्यादिलिङ्गानामत्र विद्यमानत्वात्। एतस्य तत्त्वमुपरिष्टाद्व्यक्तीभविष्यति। हे मृत्यो त्वं तत्र न प्रभवसि। जरया युक्तः सन्न बिभेति, जरातो न बिभेति। तत्र वर्त्तमानः पुमानिति शेषः। अशितुमिच्छाऽशनाया, पातुमिच्छा पिपासा ते उभे तीर्त्वा शोकमतिक्रम्य गच्छतीति शोकातिगः स्वर्गलोके वैकुण्ठलोके मोदते ॥ १२ ॥

स त्वमग्नि ँ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त ँ श्रद्दधानाय मह्यम् ॥ स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टी—भयमरणाशनायापिपासाशोकरहितत्वगुणविशिष्टस्य मोक्षस्थानस्योपासनाद्वारा प्राप्तिसाधनीभूतमग्निं स्थण्डिलरूपाग्निं स त्वं पुराणादिप्रसिद्धः सर्वज्ञस्त्वमध्येषि स्मरसि जानासीत्यर्थः। हे मृत्यो ततस्त्वं प्रब्रूहि कथय। अग्निज्ञानं श्रद्धारहिताय तत्फलेच्छाविरहिणे च न वाच्यमित्यत आह। श्रद्दधानायेति। मोक्षश्रद्धावते मह्यम्। येनाग्निनोपासितेन स्वर्गलोकाः स्वर्गो लोको येषां ते परं पदं प्राप्ता अमृतत्वं स्वरूपाविर्भावलक्षणमोक्षशब्दवाच्यममृतत्वं भजन्ते प्राप्नुवन्ति। तदेतदग्निविज्ञानं द्वितीयेन वरेण वृणे ॥ २३ ॥

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् ॥ अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् ॥१४॥

टी—एवमुक्तो यमः प्रतिजानीते। प्रते ब्रवीमीति। हे नचिकेतः स्वर्ग्यं स्वर्गस्य मोक्षस्थानस्य परम्परया साधनीभूतमग्निं प्रकर्षेण जानन्नहं ते ब्रवीमि। त्वन्तु मे मम सकाशात् तत् त्वदीप्सितं वस्तु निबोध विजानीहि। ज्ञानस्य फलं दर्शयति। अनन्तेति। अनन्तस्य विष्णोर्लोकस्तत्प्राप्तिम्। "तद्विष्णोः परमं पदं" इत्युत्तरत्र वक्ष्यमाणत्वात्। अथो तत्प्राप्त्यनन्तरं प्रतिष्ठामपुनरावृत्तिञ्च लभत इति शेषः। ननु कथमग्निज्ञानस्य मोक्षसाधनत्वमित्यत आह। विद्धीति। ब्रह्मोपासनाङ्गतयैतज्ज्ञानस्य मोक्षहेतुत्वलक्षणमेतत्स्वरूपं गुहायां निहितमन्ये न जानन्ति त्वं जानीहीत्याशयः॥ १४ ॥

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा ॥ स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥१५॥

टीका—श्रुतिः स्वयमाह-लोकादिमिति। तं नचिकेतसा पृष्टं लोकादिं सर्वलोकस्यादिं कारणं स्वर्ग्यमितियावत्। अग्निं तस्मै नचिकेतसे यम उवाच। न केवलमेतावत् किन्तु या इष्टकाश्चेतव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपाधातव्या इति यावत्। स्वरूपेण यावतीर्यावत्संख्याका यथा वाऽग्निश्चीयते येन प्रकारेण तत्सर्वमुक्तवान्। स चापि नचिकेतास्तन्मृत्युनोक्तं यथावत्प्रत्यवदत् प्रत्युच्चारितवान्। अथानुवादानन्तरमस्य नचिकेतसस्तुष्टः प्रसन्नो मृत्युः पुनराह ॥ १५ ॥

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ॥ तवैव नाम्ना भविताऽयमग्निः सृङ्काँचेमामनेकरूपां गृहाण ॥ १६॥

टीका—किमाहेत्यत उक्तमनुवदन्नाह। तमिति। प्रीयमाणो महात्मा यमस्तं नचिकेतसं प्रत्यब्रवीत्। किं तवाद्येह प्रीतिनिमित्तं वरं भूयो ददामि। तं वरं दर्शयति। अयं मदुपदिष्टोऽग्निस्तवैव नाम्ना प्रसिद्धो भविता। इमामनेकरूपां स्वर्णमयीं सृङ्काँ शब्दवतीं कण्ठमालाञ्च गृहाणेति वरमदात् ॥ १६ ॥

त्रिणाचिकेतास्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू ॥ ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमाꣳ शान्तिमत्यन्तमेति ॥ १७ ॥

टीका—त्रिणाचिकेतास्त्रिःकृत्वो नाचिकेतोऽग्निश्चितो येन स त्रिणाचिकेतस्तद्विज्ञानस्तदध्ययनस्तदनुष्ठानवान् वा त्रिभिरग्निभिरनुष्ठितैरग्निभिः सन्धिं परमात्मोपासनेन सम्बन्धमेत्य प्राप्य जन्ममृत्यू तरतीत्यर्थः।

"त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" १।४।३। इति सूत्रव्याख्यानावसरे एवमेव ह्ययं मन्त्र उपन्यस्तः। अस्यामुपनिषद्युपायोपेयोपगं त्रयाणामुपन्यासः प्रश्नश्च पूर्वापरवाक्यार्थविचारेण। आनुमानिकतत्वनिरूपणस्यात्रावकाशोनास्तीति सूत्रार्थो वेदान्तपारिजातसौरभे आद्याचार्य्यैर्भाषितः त्रिभिरेत्य सन्धिमिति निर्दिष्टमङ्गभूतं परमात्मोपासनमाह। ब्रह्मजज्ञमिति। ब्रह्मजज्ञः प्रत्यगात्मा तं देवमीड्यं स्तुत्यं विदित्वा प्रत्यगात्मानं ब्रह्मात्मकत्वेनावगम्येत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निचाय्य स्वात्मानं ब्रह्मात्मकत्वेन साक्षात्कृत्येमां त्रिकर्म्मकृत्तरतीति पूर्वमन्त्रनिर्दिष्टां संसाररूपानर्थशान्तिमेतीत्यर्थः । अस्य मन्त्रस्यार्थः (विशेषणाच्च) ब्र० सू० ।१।२।२।१२॥ इति सूत्रस्य व्याख्यानावसरे प्रदर्शितः संक्षेपेण वेदान्तकौस्तुभे ॥ १७ ॥

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाꣳश्चिनुते नाचिकेतम् । स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥

टीका—त्रिणाचिकेतस्त्रयमेतत् ब्रह्मजज्ञं देवमीड्यमिति मन्त्रोक्तं उपास्यस्वरूपं उपास्यात्मकोपासकस्वरूपं त्रिभिरनुष्ठितैरग्निभिः सन्धि ब्रह्मोपासनेन सम्बन्धमेत्य मृत्युं तरतीति प्रागुदाहृतमग्निस्वरूपञ्च विदित्वा शास्त्राचार्य्योपदेशेन ज्ञात्वा, योऽधिकारी एवं प्रागुपदर्शितप्रकारेण नाचिकेतमग्निं विद्वांश्चिनुते निर्वर्त्तयति स मृत्युपाशानज्ञानाधर्म्मरागद्वेषलक्षणान्पुरतोऽग्रतः पूर्वमेव शरीरपातात् प्रणोद्यापहाय शोकातिगो मोदते स्वर्गलोके मोक्षस्थाने ॥ १८ ॥

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥ १९ ॥

टीका—प्रीत्या स्वदत्तं वरमवधारयति एष इति । त्वं यं द्वितीयवरेणावृणीथाः एषः स्वर्ग्योऽग्निरुपासनाद्वारा स्वर्गप्रयोजनको नाचिकेता इति ते तव नाम्ना प्रसिद्धो भविता । कथम् । एतमग्निं तवैव नाम्ना जनासो जनाः प्रवक्ष्यन्ति । एवं द्वितीयं वरं दत्वा प्रीत्या स्वदत्तं वरञ्चावधार्यैदानीं तृतीयं वरं प्रार्थयेत्याह । तृतीयमिति ॥ १९ ॥

नन्वत्र पठितानां स्वर्गशब्दानां मुक्तौ तात्पर्य्यं केन प्रमाणेन उच्यत इति चेन्नैवम् । यतः, "त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" ।१।४।६। इति ब्रह्मसूत्रे पूज्यपादैः श्रीश्रीनिवासाचार्य्यैः प्रकटीकृतोऽयमर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेह प्रधानस्याऽव्यक्तशब्देन परिग्रहोऽस्ति, यतोऽत्र त्रयाणामेव परमात्मतदुपासनोपासकानामेवमुपन्यासो वक्तव्यतया प्रश्नश्च शेषतया कठवल्ल्यामस्ति। न तु सांख्यसिद्धस्य प्रधानादेरपि। तथाहि। "तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्य" इत्यादिकं मंत्रजातं पठितं, तदर्थोऽपि संक्षिप्तऽनन्तरं द्वितीयेन वरेण (स त्वमग्निं स्वर्ग्यमध्येषि अमृतत्वं भजन्ते। एतद्द्वितीयेन वृणे वरेणेत्यनेन) मुक्त्युपायभूतां नाचिकेताख्याग्निविद्यां वृतवान्। हे मृत्यो त्वं स्वर्ग्यं मोक्षहितमग्निमध्येषि स्मरसि जानासि। अतस्तं मह्यं मुमुक्षवे प्रब्रूहि। स्वर्गश्चतुर्थाध्यायोक्तार्चिरादिमार्गेण मुक्तगम्यो लोको येषान्ते स्वर्गलोकाः। वेदान्तिनो येनामृतं मोक्षं भजन्ते प्राप्नुवन्ति तदग्निविज्ञानं द्वितीयेन वरेण वृणे इत्यन्वयः। स्वर्गशब्दोऽत्र मोक्षसाधारणः तस्यां हि "हिरण्मयः कोशः स्वर्गो लोको ज्योतिरावृतः ब्रह्म यन्ति ब्रह्मविदः स्वर्गलोके" इतिमन्त्रेऽध्यात्मशास्त्रसिद्धस्यापहतपाप्मत्वादिगुणाष्टकस्यैव ग्रहणमुचितम्। स्वर्गलोकाअमृतत्वंभजन्ते। इति तृतीय प्रश्नमन्त्रेऽमृतत्वभाक्त्वश्रवणादमृतत्वशब्दस्याध्यात्मशास्त्रे मोक्ष एव प्रयोगात्। अजीर्यताममृतानामित्यत्रामृतशब्दस्यापि मुक्तपरत्वेनापेक्षिकामृतत्वपरत्वाभावात्। उत्तरत्र तता मया नाचिकेता श्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्। क० १।२।१०। "अभयं तितीर्षतां पारं नचिकेत ꣳ शकेमहि। (क० ।१।२।२) इति परस्यैव ब्रह्मणो नाचिकेताग्निप्राप्यत्वकथनेन स्वर्गशब्दस्य प्रसिद्धस्वर्गपरत्वासम्भवात्। "नान्यं तस्मान्नचिकेता वृणीते"। (क० १।२।२६।) इति ब्रह्मेतरविमुखतया प्रतिपादितस्य नचिकेतसः क्षयिष्णुस्वर्गप्रार्थनाऽनुपपत्तेश्च॥

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीतिचैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः॥२०॥

टी०—सन्ति मोक्षस्वरूपे वादिनां विप्रतिपत्तयः। तथा हि, दुःखनिवृत्तिमात्रं मोक्षः। आनन्दादिशब्दाश्च दुःखाभावमात्रालम्बिनो यदि सुखरागेण वर्त्तेत ततो बन्ध एव प्रसज्येत रागस्य बन्धहेतुत्वात्। न च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहेन्द्रियमनसां निवृत्तौ विज्ञानोत्पत्तिर्हेत्वभावान्मुक्तो निःसंज्ञः पाषाणकल्पोऽवतिष्ठते, इति वैशेषिका वदन्ति । सांख्यास्तु चैतन्यस्वभाव आत्मा, तस्य द्रष्टुः स्वरूपे चैतन्यमात्रेऽवस्थानमसंप्रज्ञातयोगे निष्पन्न-मोक्ष इति मन्यन्ते । पातञ्जलास्तु असतो ब्रह्मभावस्य योगानुष्ठानताजन्म-मोक्षः । केचिदात्मस्वरूपोच्छित्तिलक्षणं मोक्षमाचक्षते । अपरेऽपहत-पाप्ममात्मानं परमात्मानमभ्युपगच्छन्तस्तस्यैवोपाधिसंसर्गनिमित्तजीव-भावोपाध्यपगमेन तद्भावलक्षणं मोक्षमातिष्ठन्ते । निवृत्तिमार्गनिरतास्तु अपहतपाप्मत्वादिसम्पन्नविज्ञानघनीभूतस्वस्वरूपाविर्भाव-पूर्वकत्वे सति श्रीभगवत्स्वरूपगुणादिविषयकानवच्छिन्नानुभूत्या स्थितिरूपां भगवद्भावापत्तिं मोक्षमाचक्षते । निरञ्जनः परमं साम्यमुपैतीत्यत्र परमं साम्यं भावपदेनाभिधीयते परमं । साम्यञ्च स्वरूपेण गुणादिना च सादृश्यम् । तथा च ज्ञानस्वरूपत्वात्स्वरूपसादृश्यम् । अपरिच्छिन्न-ज्ञानधर्म्मकत्वाद्गुणसादृश्यञ्च । तत्वं नाम तद्भिन्नत्वे सति तद्गतभूयो धर्म्मवत्त्वम् । नियन्तृत्वस्वातन्त्र्यवत्त्वाभावेन ब्रह्मभिन्नत्वे सति सार्व-ज्ञाद्यपहतपाप्मत्वादि भूयोब्रह्मगतधर्मवत्वाल्लक्षणसमन्वयः । तथा च विप्रतिपत्तिवाक्येभ्यो विचिकित्सा संशयो जायते । किमिति, मोक्षेऽधि-कृते मनुष्ये प्रेते सर्ववन्धविनिर्मोक्षे तत्स्वरूपमस्ति, न वेति । तदपनो-दाय मोक्षस्वरूपयाथात्म्यं त्वयाऽनुशिष्टोऽहं विद्यां जानीयां, वराणामेष वरस्तृतीय इत्यर्थः । त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ।१।४।६। इति सूत्रभाष्ये श्रीश्रीनिवासाचार्यचरणैरस्य मन्त्रस्यार्थः संक्षेपेण विवृत-स्तथाहि–तृतीयवरेण च परपुरुषार्थरूपपरमात्मप्राप्तिलक्षणमोक्ष याथात्म्यस्वरूपप्रश्नमुखेन प्राप्यस्वरूपं प्राप्तृस्वरूपमुपायभूतोपासन-स्वरूपञ्च पृष्टम् । अतो येयं प्रेत इत्यस्य मुक्तस्वरूपप्रश्नपरत्वमेव न तु परलोकसम्वन्धिजीवात्मस्वरूपपरत्वम् । इतरथा तस्यार्थस्य दुरधिगमत्व-प्रदर्शनपुरःसरयोग्यतापरीक्षाया वैयर्थ्यं प्रसज्येत । प्रष्टुर्नचिकतसोऽय-मभिसन्धिः, परित्यक्तचरमदेहाविर्भूतापहतपाप्मत्वादिगुणसम्पन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मा भवतीति यमवचनं निशम्य स्वर्गे लोके न भयं किञ्चनास्तीत्यादिना मन्त्रद्वयेन मोक्षसाधनभूताग्निमप्राक्षम्। सम्प्रति मोक्षविषये वादिनां विप्रतिपत्तेस्सत्वात्तद्विषये विमर्शो जायते। अयं स्वर्गे लोके न भयं किञ्चनास्तीत्यादिना मयोपन्यस्तापहतपाप्मत्वाद्यवच्छिन्न आत्माऽस्तीत्येके नास्त्यपरे। त्वयोपदिष्ट एतज्जानीयामिति। अतएव प्रतिवचने "एतच्छ्रुत्वा सम्परिगृह्य धर्म्यमणुमेतमाप्य स मोदते मोदनीयं हि लब्ध्वा क०।१।२।३ इत्येतत्प्रश्नानुगुण्यमेव दृश्यते। अतो यथोक्त एवार्थः साधीयान्॥ २०॥

देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयोऽणुरेष धर्म्मः॥ अन्यं वरं नचिकेतो वृणीष्व मामोपरोत्सीरति मा सृजैनम्॥२१॥

टीका—एवमुक्तो यमो मुक्तस्वरूपमतिगोप्यमतिगहनतया श्रोतुर्बुद्धिदाढर्याभावेन वक्तव्यमिति भावेन तद्बुद्धिपरीक्षणाय तस्य दुर्ज्ञेयत्वमाह। देवैरिति। हे नचिकेतः पुरा पूर्वमत्र मुक्तस्वरूपविषये देवैरपि विचिकित्सितं संशयितम्। कुतः हि यस्मादेष धर्म्मः सुज्ञेयो न। कुतः? यतोऽणुः सूक्ष्मो दुर्विज्ञेयः। सामान्यधर्मस्य दुर्ज्ञेयत्वं सुतरामात्मतत्वस्य दुर्विज्ञेयत्वमिति भावः। तस्मादन्यं वरं वृणीष्व, मा मां मोपरोत्सीरिदमेव वक्तव्यमित्युपरोधं मा कार्षीः मा मां प्रति एनं वरम् अतिसृज विमुञ्चेत्यर्थः॥ २१॥

एवमुक्तो नचिकेता आह।

देवैरत्रापि विचिकित्सितं किल त्वञ्च मृत्यो यन्न सुज्ञेयमात्थ॥ वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्॥ २२॥

टीका—हे मृत्यो त्वमेव यत् यस्मात् देवैरपि अत्र विचिकित्सितं किलेति पुरावृत्तद्योतनार्थः। अतएव मुक्तस्वरूपं सुज्ञेयं न भवतीत्यात्थ। तस्मात्स एव वरो मया प्रार्थितो नान्यः। कुत इत्यत एतस्मादृश्याभावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दित्याह। नान्य इति। अयमेव वरोऽन्यस्मात्सम्पाद्यतामित्यत आह। वक्ता चेति। अस्य वरस्य वक्ता त्वादृक् त्वादृश अन्यो न लभ्यः ॥ २२ ॥

एवमुक्तो यमः सर्वात्मना विषय विरक्तस्यैव मोक्षशास्त्रेऽधिकार श्रवणादविरक्त स्यैतादृशं मुक्तात्मस्वरूपं नोपदेष्टव्यमिति ज्ञापनाय नचिकेतसो मुमुक्षा स्थैर्य निरीक्षणाय नाना विषयैस्तं प्रलोभयति।

शतायुषःपुत्र पौत्रान् वृणीष्व बहून्पशून् हस्ति हिरण्यमश्वान्। भूमेर्महदायतनं वृणीष्व स्वश्च जीव शरदो यावदिच्छसि ॥ २३ ॥

टीका--शतं वर्षाण्यायूंषि येषां ते शतायुषस्तान् पुत्र पौत्रान् वृणीष्व। बहून्पशून्गोमहिष्यादि रूपान् हस्तिहिरण्यञ्च हस्ति हिरण्यमिति द्वन्द्वैकवद्भावः। अश्वान भूमेर्महदायतनञ्च पृथिव्या महद्विस्तीर्णमायतनं मण्डलं राज्याधिपत्यं वृणीष्व। न केवलं पुत्र पौत्राणां शतायुष्ट्वम्, किन्तु त्वञ्च यावज्जीवितुमिच्छसि तावतीः शरदो जीव। सर्वञ्चेतदनर्थकं स्वयञ्चेदल्पायुरित्यत आह-स्वयञ्चेति ॥ २३ ॥

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकाञ्च। महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि ॥ २४ ॥

त्वदीयं वरमेतत्तुल्यमेतस्य मया दीयमानस्य समं यदि मन्यसे, तर्हि दीयमानं वित्तं चिरजीविकाञ्च दीर्घजीवन हेतुक्षेत्रं दीर्घजीवनं वा उक्तोपलक्षणमेतत् वृणीष्व। न चेदमन्यदपि दास्यामीत्याह। महाभूमाविति। हे नचिकेतः त्वं महाभूमौ निमित्तसप्तमीयम् महाराज्याधिपत्ये सतीति यावत्। एधि अभिवृद्धो भव। त्वां कामानां काम्यानां मध्ये कामितभाजं करोमीत्यर्थ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामाँ श्छन्दतः प्रार्थयस्व ॥ इमा रामाः सरथाः सतूर्य्या नहीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं माऽनुप्राक्षीः ॥ २५ ॥

टीका—एतदेव विवृणोति । ये य इति । कामाः काम्याः छन्दतः इच्छानुसारेण । तानेव विशिष्याह । इमा इति । रथेन सह वर्त्तमान इति सरथाः सतूर्याः सवादित्रा इमा रूपादि गुणवतीः । मल्लोकस्था वा रामा रमणीयाः स्त्रियः प्रार्थयस्व । तासु विशेषमाह । नहीदृशा इति । तर्ह्येताद्दशीभिः किं मे प्रयोजनमित्यत आह । आभिरिति । मत्प्रत्ताभिर्मद्दत्ताभिराभिः स्त्रीभिः परिचारयस्व । स्वनृत्य-गानादिनाऽऽत्मनः परिचर्य्यां कारय । मरणमनुमरणान्मुक्तेः पाश्चान्मुक्तात्मस्वरूपमिति यावत् माऽनुप्राक्षीः ॥ २५ ॥

एवं प्रलोभ्यमानोऽपि नचिकेताः शतायुष इत्यादेरुत्तरमाह ।

श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः ॥ अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥ २६ ॥

टीका—हे अन्तक मर्त्यस्य मरणशीलस्य पुरुषस्य यदेतत् य एते पुत्रपौत्रपश्वादयस्ते श्वोऽभावा श्वोऽपि न विद्यते भावःसत्ता येषां ते श्वोऽभावाःक्षिप्रविनाशा इति यावत् केवलमेतावत् किन्तु स्वसद्भावद-शायाञ्च सर्वेन्द्रियाणां तेजःसामर्थ्यं स्ववृद्धिक्षयचिन्तया जरयन्ति च तस्मान्न ते मया प्रार्थ्याः । स्वयञ्च जीव शरदो यावदिच्छसीत्यस्योत्तर-माह । अपि सर्वमिति । सर्वमतिजीवितं ब्रह्मकल्पपर्य्यन्तं जीवन मप्यल्पमेव, तस्यापि पर्यवसानं स्यात् । निरवधिकजीवनस्य मोक्षादन्य-त्राभावात् । तस्मात्तदपि न प्रार्थये । इमा रामाः सरथाःसतूर्य्या इत्या-देरुत्तरमाह । तवैवेति । वाहा रथास्तवैव तिष्ठन्तु ॥ २६ ॥

वृणीष्व वित्तमित्यस्योत्तरमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा। जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥२७॥

टीका—महावित्ते लब्धेऽपि मनुष्यस्य तृप्त्यदर्शनात्। यदि नामास्माकं वित्ततृष्णा स्यात् लप्स्यामहे प्राप्स्यामहे। चेत् यदि त्वामद्राक्ष्म दृष्टवन्तो वयं त्वद्दर्शनमात्रेण वित्तलाभो भविष्यतीति न पृथक् प्रार्थनीयमिति भावः। जीवनमपि न पृथक् प्रार्थनीयं तस्य त्वदधीनत्वादित्याह। जीविष्याम इति त्वं यावदीशिष्यसि तावज्जीविष्यामोऽतो नायं वरो वरणीयः। किन्तु मे मया वरणीयस्तु वरःस एव यः प्राक् प्रार्थितः॥ २७॥

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्व तदास्थः प्रजानन्॥ अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत ॥२८॥

टीका—अजीर्यतां वयोहानिमप्राप्नुवतां जन्ममृत्युरहितानाम्। अतएवामृतानां मुक्तानामुपेत्य स्वरूपं ज्ञात्वा प्रजानन्। आत्मानात्मवस्तुविवेकसम्पन्नः जीर्यन् मर्त्यो जरामरणवान् तदास्थः। तेषु जरामरणाद्युपप्लुतेपु पुत्रादिष्वास्था स्थितिस्तात्पर्येण वर्त्तनं यस्य स तदास्थः। ततोऽधिकतरंपरमपुरुषार्थं दुष्प्रापमपि प्राप्तुमिच्छुः क्व तदास्थो भवेन्न कथमपीत्यर्थः। यस्मादहं विवेकादिसम्पन्नस्तस्मान्न पुत्रवित्तादिलोभैः प्रलोभ्योऽहमित भावः। तत्रत्यान् वर्णरतिप्रमोदान्। वर्णा आदित्यवर्णत्वादिरूपविशेषाः रतिप्रमोदा ब्रह्मभोगादिजनितानन्दविशेषास्तान्सर्वानभिध्यायन्निपुणतया निरूपयन्। अनतिदीर्घजीविते। अत्यल्प ऐहिके जीविते कोविवेकी रमेत न कोऽपीत्यर्थः॥ २८॥

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्॥ योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥२९॥ इति काठको. १ध्याये १ वल्ली ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—प्रागुक्तमेव निर्द्धारयति। यस्मिन्निति। हे मृत्यो महति साम्पराये यस्मिन्मुक्तौ मुक्तस्यात्मस्वरूपमिदं कीदृशमस्ति न वेति विचिकित्सन्ति संशयं कुर्वन्ति तत् मुक्तस्वरूपमेव नो ब्रूहीति योजना। श्रुतिःस्वयमाह। य इति। योऽयं वरो गूढ मात्मतत्वमनुप्रविष्टःप्राप्तस्त-मेव नचिकेतावृणीते न तस्मादन्यमित्यर्थः ॥ २६ ॥

इति प्रथमाध्यायस्य प्रथमा वल्ली ॥ १ ॥

अथ द्वितीया वल्ली

एवं नचिकेतसो विषयाभिलाषराहित्यादयं ब्रह्मविद्यायोग्य इति भावेन विषयकामनायुक्तस्य तद्रहितस्य च स्वरूपं निरूपयति।

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुष ँ सिनीतः॥ तयोरश्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥१॥

टीका—अत्र श्रेय इति ब्रह्मविद्योच्यते, निःश्रेयस साधनत्वात्। प्रेय इति प्रीतिविषयं पुत्रादिकाम्यमुच्यते। उत शब्दश्च शब्दार्थः। एव शब्दोऽवधारणार्थः। श्रेयोऽन्यद्विलक्षणमेव प्रेयस इति शेषः। प्रेयश्च श्रेयसोऽन्यदेव। कथं श्रेयः प्रेयसोः परस्परवैलक्षण्यमित्यत आह। त उभ इति।ते उभे श्रेयः प्रेयसी नानार्थे भिन्नप्रयोजने मोक्ष तदितराख्य विलक्षणप्रयोजनविषये पुरुषं जीवं सिनीतो बध्नीतः। षिञ् बन्धन-इति धातोः। किन्ततस्तदुभयमाददानस्यफलमाह। तयोरिति तयोः श्रेयः प्रेयसोर्मध्ये यः पुरुषः श्रेय एवादत्ते तस्य साधु भद्रं मोक्षाख्यं भवति। य उ यश्च प्रेय एव वृणीते स अर्थात् मोक्षाख्यप्रयोजनात् हीयते हीनो भवति। १।

तदेव विशदमाह।

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमा-द्वृणीते ॥ २ ॥

टीका—श्रेयश्च प्रेयश्चेत्येतौ मनुष्यमेतः प्राप्नुतः। तदा धीरः बुद्धिमान् पुमान् तौ प्राप्तौ श्रेयः प्रेयोरूपार्थौ सम्परीत्य सम्यक् ज्ञात्वा विविनक्ति विवेचयति। हंसो यथाऽम्भसः सकाशात् क्षीरं विविच्य भुङ्क्ते। तथा प्रेयसः सकाशाद्विविच्य ज्ञात्वा बुद्धिमान् पुरुषः श्रेय उपादत्त इति भावः। एवं विवेकानन्तरं धीरः प्रेयसः प्रेयः परित्यज्य श्रेय एव वृणीते। यस्तु मन्दोऽल्पबुद्धिः विवेकासामर्थ्यात् योगक्षेमात्मकं प्रेय एव वृणीते। अलभ्यलाभो योगः। योगस्य प्राप्तस्य रक्षणं क्षेमः॥ २॥

यत्प्रशंसार्थमेतदुक्तं तमिदानीं प्रशंसति।

स त्वं प्रियान् प्रियरूपांश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः॥ नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्या॥ ३ ॥

टीका—हे नचिकेतः स मया प्रलोभितोऽपि प्रियान् तत्र हेतुः प्रियरूपान् मनोहररूपान् कामान् काम्यान् मया दत्तानपि अभिध्यायंश्चिन्तयंस्तेषामनित्यत्वासारत्वादिदोषान् अत्यस्राक्षीरतिसृष्टवानसि परित्यक्तवानसि। एतां मया दत्तां वित्तमयीं सृङ्कां शृङ्खलां नैवाप्तः। यद्यन्येऽपि नैवाप्ताः तर्हि को विशेषोऽस्येत्यत आह। यस्यामिति। यस्यां वित्तमय्यां शृङ्खलायां बहवो मनुष्या मज्जन्ति तया शृङ्खलयाऽऽत्मानं बध्नन्तीत्यर्थः॥३॥

श्रेयःप्रेयसोः स्वरूपं निरूपयन् 'उभे नानार्थे' इत्युक्तमेव विवृणोति।

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता॥ विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोलोलुपन्तः॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टी०—या प्रेयोरूपा अविद्या विद्याविरुद्धेति विज्ञाता। या च श्रेयोरूपा विद्येति विद्वद्भिः। ते एते श्रेयःप्रेयसी। दूरं विपरीते अतिविरुद्धे। विरुद्धत्वमेव विवृणोति विपूची इति। विरुद्धफलहेतूरित्यर्थः। तत्राहं नचिकेतसं विद्याभीप्सिनं विद्यार्थिनमेव मन्ये। विद्याभीप्सितमितिवा पाठ आहिताग्न्यादित्वान्निष्ठान्तस्य पर निपातश्च्छान्दसत्वाद्वा। कुतः? त्वा त्वां बहवः कामा न लोलुपन्तः न लोलुपन्ति न प्रलोभयन्तीति यावत् ॥४॥

श्रेयः काम एव श्रेष्ठ इति भावेन प्रेयः कामान्निन्दति।

अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितं मन्यमानाः।
दन्द्रम्यमाणा परियन्ति मूढ़ा अन्धेनैव नीयमाना यथाऽन्धाः ॥५॥

टी—काम्यकर्म्मादिलक्षणमविद्यायामन्तरे मध्ये घनीभूत इव तमसि वर्त्तमानाः पुत्रपश्वादितृष्णापाशशतैः स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्रदक्षाश्चेति मन्यमानास्ते दन्द्रम्यमाणा वक्रगतयो मूढ़ा अविवेकिनो जरामरणभोगादिदुःखैः परियन्ति परिगच्छन्ति। ननु बहूनामेवं प्रवृत्तेः कथमियं प्रवृत्तिः स्यादित्यत्र दृष्टान्तमाह। अन्धैनैवेति। अन्धेन दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थमृच्छन्ति तद्वत् ॥ ५ ॥

न साम्परायःप्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढ़म् ॥
अयं लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे ॥६॥

टीका—परे काले देहपतनादूर्द्ध्वं सम्यगीयते गम्यते इति साम्परायःपरलोकःबालमविवेकिनं प्रति न प्रतिभाति। न प्रकाशते। प्रमाद्यन्तं पुत्रधनादिष्वासक्तमनसं तथा वित्तमोहेन वित्तनिमित्तेनाविवेकेन मूढं तमसाच्छन्नं सन्तमयमेव लोकोऽस्ति परलोको नास्तीति मन्यमानः पुनःपुनर्जनित्वा वशं मदधीनतामापद्यते ॥ ६ ॥

श्रवणायापि बहूभिर्यो न लभ्यःशृण्वन्तोऽपि बहवोयं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्युः। आश्चर्य्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्य्यो ज्ञाता कुशलानुशिष्टः ॥७॥

टीका—श्रवणायापि। श्रवणार्थं श्रोतुमपि यो न लभ्य आत्मा बहुभिरनेकैः प्राणिनां मध्ये बहूनां प्राणिनां भगवद्विषयक श्रवणमपि नास्ति। अस्ति केषाञ्चिच्छ्रवणं तथाऽपि न साम्परायस्तेषां यथार्थतः प्रतिभातीत्याह। शृण्वन्तोऽपीति। शृण्वन्तोऽपि बहवोऽनेकेऽन्ये आत्मानं नविद्युर्नविदन्ति। कुत इत्यतो वक्तृदौर्लभ्यादित्याह। आश्चर्य्य इति। कुशलेन गुरुणाऽनुशिष्टोऽस्य आत्मतत्वस्य यथार्थतो ज्ञाता ज्ञानानुसारेणास्य वक्ता आश्चर्य्यो दुर्लभः। कुशलोऽस्य लब्धा गुरूक्तप्रकारेण ज्ञाता श्रोताप्याश्चर्य्य इति योजना ॥ ७ ॥

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः ॥
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात् ॥८॥

टीका—सन्ति च शतशःविद्वद्गोष्ठिवरिष्ठा वेदान्तनिष्णाता बहवस्ते एवास्य वक्तारो भविष्यन्तीति कथं दुर्लभतेत्यत आह। न नरेणेति। अवरेण हीनेन प्राकृतेन स्वपाण्डित्यख्यापनायाधीतवेदान्तेन नरेण देहात्माभिमानिनैष आत्मा प्रोक्त उपदिष्टः सुविज्ञेयो न भवति, सुष्ठु सम्यग्विज्ञेयो विज्ञातुं शक्यो न हि भवतीत्यर्थः। कुतः। यस्माद्बहुधा चिन्त्यमानः। शून्यवादिव्यतिरिक्तवादिभिरस्तीति चिन्त्यमानस्तैर्नास्तीति चिन्त्यमानस्तत्रापि वादिनां विप्रतिपत्तयः सन्ति। तस्माद्विप्रतिपत्तिमता ह्युपदिष्टआत्मा न लब्धुं शक्य इति भावः। केनाचार्य्येणोपदिष्टःज्ञातव्य इत्यत आह। अनन्यप्रोक्त इति। अनन्येन भगवदेकमात्र निष्ठेन निवृत्तिपथाधिरूढेन ब्रह्मसाक्षात्कारिणाचार्य्येण प्रोक्तउक्ते आत्मतत्वे गतिः पूर्वोक्तविकल्पविषय चिन्ता अत्रात्मनि नास्ति। यद्वा अनन्येनाचार्य्येणोपदिष्ट आत्मनि अत्र संसारे गतिः गमनागमनं नास्ति। ननु येन केनाप्युपदिष्टेऽप्यात्मनि तर्कात्तन्निश्चयो भविष्यतीत्यत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आह। अणीयानिति। यतोऽणुप्रमाणादप्यणीयानात्माऽतस्तत्स्वरूपं न तर्क गोचरम् ॥ ८ ॥

तदेव विवृणोति।

नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ ॥ यां त्वमापःसत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतःप्रष्टा ॥९॥

टीका—अन्येन ब्रह्मदर्शिनोपदिष्ट आत्मनि उत्पन्ना मतिर्नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेणाऽऽपनेया न प्रापणीया परिणेयेति यावत्। अतस्तर्कनिष्णातेनाप्यात्मतत्वं स्वयं ज्ञातुं न शक्यते। हे प्रेष्ठ प्रियतमान्येनोक्ताचार्य्येणोपदिष्टा मतिः सुज्ञानाय मोक्षसाधनज्ञानाय भवति। का पुनःसा तर्कागम्यामतिरित्यत्राह। यां त्वमिति। यां मतिं त्वं मद्वरप्रदानेनापः प्राप्तवानसि। सत्यावितथविषया धृतिर्यस्य स तथोक्तः त्वं न चाल्पधैर्य्यवानसि। बतेत्यनुकम्पायाम्। हे नचिकेतःत्वादृक् त्वत्सदृशःप्रष्टा नोऽस्मभ्यं भूयान्न भविष्यतीत्यर्थः ॥ ९ ॥

नाहं त्वत्पृष्टं वक्तुमसमर्थस्त्वां विषयैः प्रलोभितवान् किंतु त्वत्परीक्षणार्थमेव यतस्त्वत्पृष्टं जानामीत्याह।

जानाम्यहꣳ शेवधिरित्यनित्यं नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्। ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥

टीका—जानाम्यहं शेवधिर्निधिः। अत्र शेवधिशब्दः कामनाविषयत्व गुणयोगात्कर्मफलं निर्वक्तितथा च कर्मफल लक्षणो निधिरिव प्राथ्र्यते। स चानित्य इति जानामि हि यस्माद्ध्रुवैरनित्यसाधनैर्ध्रुवं तत् नित्यमात्मतत्वं न प्राप्यते। ततस्तस्मान्मया परब्रह्मावाप्तिकारणज्ञानोद्देशेनानित्यैरिष्टकादिद्रव्यैर्नाचिकेतोऽग्निश्चितस्तस्माद्धेतोर्नित्यफलसाधनं ज्ञानं प्राप्तवानस्मीत्यर्थः। अतः परब्रह्म प्राप्तेर्ज्ञानैक साध्यत्वस्य न विरोधः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम् । स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥ ११ ॥

टीका—जगतः प्राणिमात्रस्य कामस्याप्तिं क्रतोः यज्ञादिकर्मणः प्रतिष्ठांफलभूतामालोच्य मोक्षस्वरूपमुपदिशति । आनन्त्यमभयस्य पारमित्यादिना । आनन्त्यमविनाशित्वं अभयस्य च पारं परां निष्ठां स्तोमं अनेकगुणसंहतं तच्च तन्महच्च स्तोम महत् । उरुगायम् । उरुभिर्वेदैरुरुभिर्ब्रह्मादिभिर्गीयते इत्युरुगायम् कीर्तिं प्रतिष्ठां स्थैर्य्यं एवम्भूतं मोक्षं दृष्ट्वा धृत्या धैर्य्येण धीरो धीमान्सन्नचिकेतोऽत्यस्राक्षीः, लौकिकान्कामान् त्यक्तवानसीत्यर्थः अथवा जगतः प्रतिष्ठां सकलजगदाधारकं सर्वकामाप्तिं क्रतोरानन्त्यमानन्त्यहेतुमभयस्य पारं मोक्षहेतुमिति यावत् । स्तोम महत् । स्तोमेभ्यो वेदसमूहेभ्यो महान्तमतएव उरुगायम् । उरुभिर्वेदैर्ब्रह्मादिभिर्वा उरुत्वेन सर्वोत्कृष्टत्वेन गीयत इत्युरुगीयमानं प्रतिष्ठां मुक्तौ प्रत्यगात्मनासाश्रयभूतं परब्रह्मस्वरूपं दृष्ट्वा सांसारिककामान् त्यक्तवानसीत्यर्थः ॥ ११ ॥

मुक्तस्वरूपविषयकं यत्तृतीयप्रश्नं पृष्टं तं निर्वक्ति, तं दुर्दर्शमित्यादिना मन्त्रद्वयेन ।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्म योगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥१२॥

टी०—यं त्वं प्राप्यस्य परब्रह्मणः स्वरूपं ज्ञातुमिच्छसि तं दुर्दर्शं द्रष्टुमशक्यं श्रवणायापि बहुभिर्यो न लभ्य इति प्रागभिहितत्वात् । गूढम् । अनादि कर्मात्मिकाऽविद्यातिरोहितम् । अनुप्रविष्टम् । सर्वभूतानु प्रविष्टम् । गुहाहितम् । हृदयगुहायां स्थितम् । गह्वरेष्ठम्, अन्तर्य्यामिणम् । पुराणम्, पुरातनमनादिमिति यावत् । अध्यात्मयोगाधिगमेन, विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगस्तेनाधिगमो जीवात्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानं तेन हेतुना एवं परमात्मानं मत्वा प्रत्यगात्मज्ञानपूर्वकं परमात्मज्ञानमिति भावः। हर्षशोकौ विषयलाभालाभप्रयुक्तौ हर्षशोकौ जहातीत्यर्थः। अस्य मन्त्रस्यार्थो वेदान्तकौस्तुभे संक्षेपेण विवृतस्तथाहि। एवं मोक्षस्वरूपे पृष्टे तदुपदेशयोग्यतापरीक्षापूर्वकंप्रतिवचनमपि। तं दुर्दर्शमित्यादि। तदेवं सामान्यत उपदिष्टे देवमिति निर्दिष्टस्य प्राप्यस्य स्वरूपं मत्वेति प्रतिपन्नस्य ज्ञानरूपोपायस्य स्वरूपम्। धीर इति प्रतिपन्नस्येति ॥१२॥

एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रगृह्य धर्म्यमणुमेतमाप्य। स मोदते मोदनीयँ हि लब्ध्वा विवृतँ सद्म नचिकेतसं मन्ये ॥१३॥

टी०—यो मर्त्यः मरणशीलोऽधिकारी एतदात्मतत्वं श्रुत्वा कुशलानुशिष्टाचार्य्येभ्यः सम्परिगृह्य सम्यगवधार्य्य सम्यङ्मत्वेति यावत्। प्रगृह्य धर्म्यं कर्म्मसाध्यं शरीरादि प्रगृह्य पृथक्कृत्य परित्यज्य, एवं स्वात्मभूतमेतं परमात्मानमणुं सूक्ष्मं तस्मादेव प्राकृतचक्षुराद्यगोचरं देशविशेषे प्राप्य स विद्वान् मोदनीयं प्रीतिविषयमपहतपाप्मत्वादिगुणाष्टकविशिष्टं स्वस्वरूपं लब्ध्वा मोदते आनन्दीभवतीत्यर्थः। "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते"। छान्दोग्ये। ८। ३। ४। "स तत्र पर्य्येति जक्षन्क्रीडन्रममाणः। छा०। ८। १२। ३ इ० श्रुत्यर्थोऽत्रानुसन्धेयः। एवं प्रश्नोत्तरमभिधाय मोक्षार्हत्वेन तं स्तौति। नचिकेतसं प्रति सद्म वैकुण्ठधाम विवृतमपावृतद्वारं प्रवेशार्हं मन्ये ॥१३॥

तं दुर्दर्शमिति मन्त्रेण निर्दिष्टानां प्राप्य प्राप्तृ ब्रह्मोपासनस्वरूपाणां स्वरूपशोधनाय पृच्छत्यन्यत्र धर्मादित्यादिना।

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥१४॥

टी—धर्मात्पुण्यसाधनात्। अन्यत्र विलक्षणम्। अधर्मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपुण्यरूपसाधनात् अन्यत्र विलक्षणम्। ब्रह्मोपासनम्।

ब्रह्मोपासनविषयकंप्रश्नं निरुच्य कार्यकारणपरिच्छेदकात्काला दन्यमपरिच्छिन्नमुपेयविषयकं प्रश्नं करोति। अस्मात्कृतादित्यादिना। एतत्प्रश्ने उपेतुः प्रत्यगात्मनो नित्यत्वात् प्राप्यान्तर्गतत्वाच्च तत एव तस्यापि तन्त्रेण प्रश्नः कृतः।

कृतं कार्यमकृतं कारणं तयोः परिच्छेदकात् भूतादतिक्रान्तात् कालाद्भव्याच्च भविष्यतश्च तथा वर्त्तमानकालादन्यत्रापरिच्छिन्नं यदुपेयं पश्यसि तद्वद मह्यमित्यर्थः। तदेतद्भाष्यकृद्भिः वेदान्तकौस्तुभे भाषितम्। तं दुर्दर्शमिति मन्त्रमुद्धृत्य पश्चादुक्तं तदेव सामान्यत उपदिष्टे देव-मिति निर्दिष्टस्य स्वरूपं मत्वेति प्रतिपन्नस्य ज्ञानरूपोपायस्य स्वरूपं धीर इति प्रतिपन्नस्य प्राप्तुश्च स्वरूपं शोधयितुं पुनरप्यन्यत्र धम्मर्दान्यत्रा-धर्मादित्यनेन पुण्यापुण्यरूपसाधनविलक्षणस्योपासनस्य "अन्यत्रास्मा-त्कृताकृतात्" अन्यत्र भूताच्च भव्याच्च यदित्यनेन कालापरिच्छिन्नस्योपेय-स्य प्रश्ने च प्राप्तुरपि चेतनस्य नित्यत्वात् प्राप्यान्तर्गतत्वाच्च तत एव तस्यापि तन्त्रेण प्रश्नःकृतः। अथवोपेयप्रश्नपरमेवेदं वाक्यम्। अन्यत्रधर्माद-न्यत्राधर्मादिति। प्रकृतस्यान्यत्रशब्दद्वय सामानधिकरण्यवत्। अन्यत्रा-स्मात्कृताकृतादन्यत्र भूतादित्युपरित नान्यत्रशब्दद्वयस्यापि सामाना-धिकरण्यप्रतीतेरेवमप्युपेय प्रश्ने उपेतुरन्तर्भावादुपास्याप्यन्तर्भूतत्वात् त्रयमेव प्रष्टमिति। पूर्वकल्पे प्रष्टव्यद्वयपरत्वाश्रयमपि क्लिष्टमेव। अन्यत्र धर्मादन्यत्राधर्मादिति प्रक्रमस्थान्यत्र शब्दद्वय सामानाधिकरण्यं यथा प्रतीयते तथा अन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्चेत्य-त्रान्यत्रशब्दद्वयस्यापि सामानाधिकरण्यं वाच्यम्। यदि तत्र धर्माधर्मवि-लक्षणं कालत्रयविलक्षणं यच्चेति शब्दद्वयमश्रोष्यत तदाऽन्यत्रशब्द युग द्वयस्य स्वरसतः प्रतीतं सामानाधिकरण्यं पर्यत्यक्षत। अतः प्रक्रमरीत्यनुसारि प्रतीत सामानाधिकरण्यभङ्गे कारणाभावादन्यत्र धर्मादन्यत्राधर्मादित्ययमप्यंशः प्राप्यब्रह्मपर एवास्त्वित्याशयेनाथवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौस्तुभे कल्पान्तरमनुसृतम् ॥ १४ ॥

सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्व-दन्ति । यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि । ओमित्येतदिति ॥ १५ ॥

टीका—एवं प्रार्थितो यमो बुद्ध्यारोहार्थं प्राप्यस्य परब्रह्मणः वैभवं प्रदर्शयन् सङ्ग्रहवचनं प्रतिजानीते । सर्व इति । सर्वे वेदा ऋगाद्या यत्पदं यस्य प्राप्यस्य स्वरूपमामनन्ति साक्षात्परम्परया वा प्रतिपादयन्ति । कृत्स्नाया उपनिषदः परिशुद्धात्मस्वरूपपरत्वं निश्चीयते । न जायते म्रियते वा विपश्चित् । हन्ता चेन्मन्यते हन्तुम् । आसीनो दूरं व्रजति शयानो याति सर्वतः । यस्य ब्रह्म च क्षत्रञ्च । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । सा काष्ठा सा परा गतिः । एषु सर्वेषु भूतेषु । पराञ्चिखानि । ईशानो भूत भव्यस्य ।' इत्यादि वक्ष्यमाणानां मन्त्राणां परिशुद्धात्म स्वरूपपरत्वस्य सम्प्रति-पन्नत्वात् । तपांसि सर्वाणि यद्वदन्ति यत्प्राप्त्यर्थानि । यदिच्छन्तो ब्रह्मचर्य्यं गुरुकुलवासलक्षणमन्यद्वा स्त्रीसङ्गराहित्यमिति यावत् । चरन्त्यनुतिष्ठन्ति । तत्पदं प्राप्यस्वरूपं ते तव सङ्ग्रहेण ब्रवीमि । एवं प्रतिज्ञातं परब्रह्मणस्वरूपमुपदिशति । ओमित्येतदिति । एतत् त्वया पृष्टं प्राप्यस्वरूपम् । ओम् शब्दवाच्यम् । प्रणवपदस्य भगवति रूढ-त्वात् । "ओं तत्सदिति निर्देशोब्रह्मणस्त्रिविधः स्मृत इति श्रीमुखवचनस्य जागरूकत्वात् । प्रणवावयवयोरकारमकारयोः परब्रह्मवासुदेवप्रत्यगात्म-वाचितया प्राप्यप्राप्त्रोरप्युपदिष्टत्वमस्तीति द्रष्टव्यम् । विवृतञ्चेतद्भाष्य-कृद्भिर्वेदान्तकौस्तुभे । ततो ब्रह्मप्रतिपादकतया प्रणवं प्रशस्य तद्वाच्य-म्प्राप्य प्राप्तृस्वरूपं वाचकरूपमुपायञ्च कथयन्निति ॥ १५ ॥

परब्रह्मवाचकं प्रणवं फलप्रदर्शनमुखेन स्तौति ।

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरंपरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ १६ ॥

टीका—हिद्वयमत इत्यर्थे। यत ओङ्कारो ब्रह्मवाचकोऽत एतदक्षरं ब्रह्मैव तत्प्राप्ति साधनत्वात्। "ओमित्यनेनैवाक्षरेण परमपुरुषमभिध्यायीतेति" श्रुत्या परब्रह्महेतुध्यानविषयत्वबोधनात् प्रणवस्य ब्रह्मप्राप्तिसाधनत्वं निश्चीयते। एतदक्षरं प्रणवमेव जप्येषु ध्येयेषु परं सर्वोत्कृष्टम्। अतएवैतदक्षरं प्रणवं ज्ञात्वोपास्यो योऽधिकारी यदिच्छतिस्य पुंसस्तत्फलं भवति हि प्रसिद्धमित्यर्थः ॥ १६ ॥

एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ १७ ॥

टी०—एतत्प्रणवरूपमालम्बनं श्रेष्ठं प्रशस्यतमम्। अतएवैतदालम्बनकं ध्यानादिपरम्। सर्वेभ्य उत्कृष्टम्। एतत् परमालम्बनं ज्ञात्वा ब्रह्मलोके ब्रह्मैव लोकस्तस्मिन्महीयते पूज्यो भवतीत्यर्थः ॥१७॥

जीवात्मस्वरूपं निरूपयति, न जायते इत्यादि मन्त्रद्वयेन।

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयम्पुराणो न हन्यते हन्यमाने शरीरे ॥१८॥

हन्ता चेन्मन्यते हन्तुँ हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायँ हन्ति न हन्यते ॥१९॥

टी०—विपश्चिन्मेधावी न जायते नोत्पद्यते। वा शब्दश्चार्थे न चायं कदाचिन्म्रियते। नायं प्रत्यगात्मा कुतश्चित्कारणान्तराद्बभूव, यतो न जायतेऽतोऽजो न म्रियतेऽतो नित्यः। इति द्वाभ्यां पदाभ्यां जन्ममरणलक्षण विक्रिये निरस्ते। अस्तित्वलक्षणविकारवारणायाह। शाश्वत इति। सनातनः प्राकृतवत्सदसत्परिणामशून्यः। वृद्धि लक्षण क्रिया वारणायाह। पुराण इति। पुराऽपि नव एव। यो हि सावयवः सोऽवय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोपचयाद्वर्द्धते। अयन्तु निरवयवो ज्ञानैकस्वरूपत्वान्न वर्द्धते। परिशिष्टौ परिणामापक्षयौजन्ममरणास्तिवृद्ध्यभावादेव निरस्तौ। एवं षड्विकारशून्यः प्रत्यगात्मा शरीरे हन्यमाने सति न हन्यते। शरीरमेव हननक्रियायाः कर्मभूतमित्यर्थः ॥१८॥

हन्ता चेन्मन्यते हन्तुम्। अहमेनं वधिष्यामीति देहात्मदृष्ट्या मन्यते चेदित्यर्थः। हतश्चेन्मन्यते हतम्। छिन्नदेहावयवो देहात्मदृष्ट्याऽऽत्मानं हतोऽहमिति मन्यते चेदित्यर्थः तावुभौ न विजानीतः। आत्मस्वरूपानभिज्ञौ अतो नायं हन्ति न हन्यते हननक्रियायाः कर्त्ता कर्म न भवति। ॥१९॥

एवं प्राप्तुः चेतनस्य स्वरूपं निरूप्य प्राप्यस्य परब्रह्मणः स्वरूपं निरूपयति।

अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमान मात्मनः ॥२०॥

टीका—परमात्माऽणोरणीयान्। सूक्ष्माच्चेतनादपि सूक्ष्मतरः, तदन्तः प्रवेशार्हः। महतो महीयान्। महत्परिणामवत आकाशादेरपि महत्तरः स्वव्याप्तवस्तुरहित इत्यर्थः। अस्य जन्तोर्न जायते इत्यादि श्रुतिद्वयेन प्रतिपादितस्य प्रत्यगात्मन आत्मा गुहायां निहितः। अन्तः प्रविश्य नियन्ता। अनेन प्रागुदाहृतमन्त्रद्वय प्रतिपाद्यस्य प्राप्तुश्चेतनस्य एतन्मन्त्रनिर्दिष्टात् प्राप्यस्वरूपाद्भेदः स्वरूपेण सिद्ध, इतरेतरात्यन्त विलक्षणत्वात्। तयोर्ब्रह्मात्मकत्व तन्नियम्यत्व तद्व्याप्यत्व तत्तन्त्रसत्त्व पराधेयत्वादि योगेन चाभेद इति भावः। तं तादृशं परमात्मानमक्रतुर्निष्कामो धातुर्धारकस्य परब्रह्मणो वासुदेवप्रसादादनुग्रहादात्मनो महिमानं महत्व सम्पादकं स्वसार्वज्ञ्यादिगुणाविर्भावहेतुभूतं परमात्मानं यदा पश्यति तदा वीतशोको भवतीत्यर्थः ॥ २० ॥

वासुदेवानुग्रहारिक्तस्य पुंसः परब्रह्मतत्वं लोकोत्तरत्वाद् दुरधिगम मित्याह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसीनो दूरं व्रजति शयानो यति सर्वतः ।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति ॥ २१ ॥

टीका—आसीन उपविष्ट एव दूरं व्रजति । शयान एव सर्वतो याति । तं मदामदं सहर्षं निर्हर्षं तं परमात्मानं भगवदनुग्रहानुग्रहीत मादृश जनादन्यः कोवा ज्ञाता न कोऽपीत्यर्थः । स्थितित्वगतित्व सहर्षत्व निर्हर्षत्वादयो विरुद्धधर्म्मास्तस्याचिन्त्यशक्तिमहिम्ना लीलाया-मुपपद्यन्ते नात्र शङ्कावसरः प्रसरति ॥ २१ ॥

परमात्मविज्ञानाच्छोकात्यय इति दर्शयति ।

अशरीरँ शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ २२ ॥

अशरीरं प्राकृतशरीररहितं शरीरेषु देवमनुष्यादिशरीरेष्वनवस्थे-ष्ववस्थितिरहितेष्वनित्येष्ववस्थितेषु नित्यत्वेन स्थितम् । महान्तं प्रसिद्ध-वैभवशालिनं विभुं सर्वव्यापिनमात्मानं परमात्मानं धीरो धीमान्मत्वा ज्ञात्वा न शोचति ॥ २२ ॥

आत्मप्राप्त्युपायं दर्शयति ।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ॥
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥२३॥

टीका—अयमात्मा प्रवचनेन मननेन न लभ्यःप्राप्यः । न मेधया ध्यानधारणया न बहुना श्रुतेन श्रवणेन । अत्र ध्यान श्रवणयोःमेधा-श्रुतशब्देन बोधनात् । प्रवचन शब्देन मननं ग्रहीतव्यम् । लक्षणया वृत्या । प्रवचनशक्यार्थस्याध्यापनस्य हेतुत्वाप्रसक्तेः । तर्हि केन लभ्य इत्यत आह । यमेवैष इति । एष आत्मा परमात्मा भक्त्या प्रसन्नःसन् मदीयोऽयमिति यमुपासकं वृणुते तेन लभ्यः प्राप्यः । तस्योपासकस्यैष आत्मा परमात्मा स्वां तनुं स्वस्वरूपं विवृणुते प्रकाशयति स्वात्मानं प्रयच्छतीत्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाविरतो दुश्चरितात् नाशान्तो नासमाहितः ॥
नाशान्तमनसोवाऽपि प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥

टीका—यो दुश्चरितात्, इन्द्रियाणां दुष्टविषयेषु चरणादविरतोऽनिवृत्तो, नाशान्तः = अनुपशान्तकामक्रोधवेगः। अथवा भगवन्निष्ठ बुद्धिरहितः। नासमाहितः = नानाविधव्यापारविक्षिप्ततयाऽनवहितचित्तः। नाशान्तमनसोऽनिगृहीतमनाश्चैनंपरमात्मानं प्रज्ञानेन नाप्नुयादित्यर्थः ॥२४॥

भगवतःसर्वसंहारकर्तृत्वरूपं माहात्म्यं वदंस्तस्य दुर्ज्ञेयत्वमाह।

यस्य ब्रह्म च क्षत्रश्च उभे भवत ओदनः ॥
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ २५ ॥
इति काठकोपनिषदि प्रथमाध्याये द्वितीया वल्ली ॥ २ ॥

टीका—यस्य परब्रह्मणः ब्रह्म = ब्राह्मणत्वजात्यभिमानी ब्राह्मणः क्षत्रश्च = क्षत्रत्वजात्यभिमानी क्षत्रियः। इत्युभे ओदनः, अशने भवतः। सर्वहरोऽपि मृत्युर्यस्योपसेचनं व्यञ्जनं घृतं वा, स निखिलचराचरसंहर्त्ता परमात्मा यत्र वैकुण्ठादौ तिष्ठति, तम्भगवन्तम्। इत्था = उक्तप्रकारेण को वेद न कोऽपीत्यर्थः।

अत्र ब्रह्मक्षत्रग्रहणस्य चराचरमात्रोपलक्षणत्वं युक्तम्। उक्तञ्च श्रीबादरायणाचार्य्येण। "अत्ता चराचरग्रहणात्"। अ० १।२।६। व्याख्यातञ्चैतत्सूत्रं भाष्यकारैः वेदान्तकौस्तुभे, तथा हि। अत्रात्ता खलु परमात्मा भवितुमर्हति। कुतः? चराचरग्रहणात्। चराचरयोरद्यत्वेन ग्रहणात्। ननु नात्र चराचरशब्दोऽस्तीति चेन्माऽस्तु चराचरशब्दो ब्रह्मक्षत्रग्रहणेनोपलक्षणार्थेन चराचरग्रहणात् मृत्योश्चराचरान्वयित्वेनोपसेचनविषयस्यौदनस्य चराचरात्मकस्य ग्रहणाच्च, तस्मादत्ता विश्वसंहर्त्ता परमात्मेति फलितोऽर्थः। नह्यग्नेर्जीवस्य वा कृत्स्नजगदत्तृत्वमुपपद्यते। अनश्नन्निति कर्मफलभोगप्रतिषेध इति ॥२५॥

इति काठकोपनिषदः टीकायां १ अध्यायस्य
२ वल्ली समाप्ता ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्याय १ वल्ली ३

प्रागुपदर्शितमन्त्रे परब्रह्मणो दुर्ज्ञेयत्वमभिहितं तत्वे च तदुपासकस्तस्य परब्रह्मण उपास्तिं कथं कर्त्तुं शक्नोति इत्याशङ्क्योपासकोपास्ययोरेकहृदयगुहाप्रविष्टत्वेन परब्रह्मणः सूपास्यत्वमुपपादयति।

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये ॥
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥१।

टीका— ऋतं सत्यमवश्यम्भावित्वात्कर्मफलं पिबन्तौ न चेशस्य कर्मफलभोगयोगः। छत्रिन्यायेन पातृजीवसम्बन्धात् पिबन्तावित्युपचारात्। अन्यतरस्य पातृत्वेन जीवत्वे सिद्धे द्वितीयस्य चेतनस्यैव भाव्यत्वात्। अस्य गौर्द्वितीयोऽन्वेष्टव्य इत्यादौ सजातीयग्रहणस्यैव लोके दर्शनात्। न चैवं जीवान्तरं ग्राह्यम्। एकस्मिन्भोक्तृजीवद्वयायोगात्। तस्माज्जीवेश्वरावेवात्रोच्येते। न बुद्धिजीवौ। सुकृतस्य = स्वनुष्ठितस्य कर्मफलभोगायतने = लोके शरीरे गुहां = हृदयलक्षणां प्रविष्टौ, तत्रापि परमे = परार्ध्ये उत्कृष्टे हार्दाकाशे प्रविष्टौ। परार्धं सङ्ख्याया उत्तरावधिस्तदर्हतीति परार्ध्यमिति व्युत्पत्तेः। छाया तपौ = स्वतन्त्रपरतन्त्रौ परब्रह्मप्रत्यगात्मानौ। विवृतञ्चैतद्वेदान्तकौस्तुभे। यथा छायाऽऽतपेनापसारयितुं शक्या न तु छाययाऽऽतप इत्येवं छायाऽऽतपौ स्वाधीनपराधीनौ ब्रह्मजीवात्मनाविति। गार्हपत्योदाक्षिणाग्निराहवनीयः सभ्य आवसथ्यश्चैते पञ्चाग्नयस्तेषामुपासनेन शुद्धान्तःकरणाः। त्रिणाचिकेतास्त्रिःकृत्वो नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः। एवम्भूता ब्रह्मविदो वदन्ति। अस्य मन्त्रस्य प्रत्यगात्मपरमात्मपरत्वं श्रीबादरायणेन सूत्रितम्। "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। ब्र. सू. १।२।११॥ इति। व्याख्यातञ्चैतत भाष्यकृद्भिर्वेदान्तकौस्तुभे। तथा हि। तत्र संशयः। किमिह बुद्धिजीवौ गुहां प्रविष्टाविति निर्दिष्टावुत जीवपरमात्मानाविति। किमत्र युक्तं ? बुद्धि जीवौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतः। गुहां प्रविष्टाविति वचनात्। सर्वगतस्य परमात्मनः गुहाप्रवेशासम्भवात्। ऋतं पिबन्ताविति कर्मफलभोक्तृत्वमाप्तकामस्य परस्यासम्भवाच्च। सुकृतस्य लोके स्यानुष्ठितस्य कर्म्मणः फलभोगायतने लोक्यन्ते भुज्यन्ते कर्मफलान्यस्मिन्निति लोके शरीरे कर्म्मजन्ये सम्बन्धासम्भवाच्च। किञ्च जीवात्मनोर्बुद्धिभिन्नत्वेन ज्ञानार्थम्। "ये यं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहमिति-प्रश्नदर्शनाच्च। तावेवास्मिन् मन्त्रे प्रतिपाद्येत इति प्राप्ते, उच्यते। गुहां हृदयलक्षणां प्रविष्टौ आत्मानौ हि चेतनावेव। ननु जीवात्मनोऽणुत्वेन प्रवेशोपुक्तः। परमात्मनो विभुपरिमाणस्य तु गुहाप्रवेशो न सङ्गच्छत इति पूर्वोक्त दोपस्तदवस्थ इति चेन्न। तद्दर्शनात्। व्यापकस्यापि तस्य परमात्मनः स्वानन्यजनेच्छयाऽस्यामेवोपनिषदि। "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्येति" स्वानन्यजन गुहायां दर्शन विधानात्। "गुहाहितं गह्वरेष्ठं यो वेद निहितं गुहायामिति" तद्दर्शनाच्च। "या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती सा भूतेभिर्व्यजायतेति जीवस्य गुहाप्रवेशव्यपदेशाच्च। किञ्च ऋतं पिबन्तावित्यत्र कर्म्मफलभोक्तृत्वेनैकस्मिन् चेतने निश्चिते सति द्वितीयेनापि चेतनेनैव भाव्यम्। सङ्ख्याश्रयणे सति सङ्ख्यावतोर्हि समानजातीयत्वस्य लोके दर्शनादित्यर्थः। "तद्यथाऽस्य गौर्द्वितीयोन्वेष्टव्य इत्युक्ते गौरेवान्विष्यते नाश्वो न गर्दभ" इति महाभाष्ये स्थितम्। यदुक्तं जीवात्मनो बुद्धिभिन्नत्वेन ज्ञानार्थं प्रश्नदर्शनादिति तस्य प्रश्नस्य तु अन्यदेवोत्तरं नत्विदं वाक्यम्। न चर्त्तपानानुपपत्तिरिति वाच्यम्। छत्रिणो यान्तीतिवदृतम्पिबन्ताविति निर्देशस्य सम्भवात्। जीवः पिबति तमपरः पाययतीति प्रयोजककर्त्तृत्वसम्भवाच्च। यो हि कश्चिदनन्यशरणस्तत्कृतकर्मफलस्य तदर्पितस्याग्रभुगयज्ञगत्कारणभूतः परमात्मेति सर्वत्र प्रसिद्धेश्च। कर्म्माजन्य शरीरवर्त्तित्वमपि परस्यैतेन व्याख्यातमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् ।
अभयं तितीर्षतां पारं नाचिकेत ँ शकेमहि ॥ २ ॥

टी०—ईजानानामिति कानजन्तशब्दः । यागकर्तॄणां कर्मिणां यः परमात्मा सेतुः=कर्म्मफलप्रापकः । अक्षरं=यन्निर्विकारं परम्ब्रह्म । संसारार्णव तितीर्षतां अभयम्=भयरहितं पारम्=दृढंतीरम् । नाचिकेताग्निम्प्राप्यसुपासितुं शकेमहि=शक्नुवन्तः । अतो दुरुपास्यमिति बुद्ध्या न भेतव्यम् ॥२॥

इन्द्रिय नियमनमवश्यं सम्पाद्यमिति वक्तुं तदुपयुक्तत्वेन किञ्चिदुपदिशति ।

आत्मान ँ रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥

टी०—आत्मानमिति । आत्मानम्=शरीरेन्द्रियाधिष्ठातारं रथिनम्=रथस्वामिनं विद्धि । शरीरं रथं विद्धि । अश्वस्थानीयैरिन्द्रियैर्विकृष्यमाणत्वात् । बुद्धिं तु सारथिं विद्धि शरीरप्रवर्त्तकत्वात् । बुद्ध्या विचार्य्य किञ्चित्करोति । मनः प्रग्रहमेव=रशनामेव विद्धि । चस्त्वर्थे मनसा प्रगृहीतानां श्रोत्रादीनां प्रवर्त्तनात् ॥ ३ ॥

इन्द्रियाणि हयानाहुर्विषया ँ स्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥

टी०—इन्द्रियाणि हयानाहुः । शरीराख्यरथकर्षकत्वात् । तेषु तेषामिन्द्रियाणां गोचरान्शब्दादीन् विषयान् । अश्वसञ्चारदेशानाहुः । तेष्विन्द्रियाणां सञ्चारात् । आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रिय मनोभिः सहितं संयुक्तमात्मानं भोक्ता कर्त्तृत्वभोक्तृत्वादिमानित्याहुर्मनीषिणः=विवेकिनः । न हि केवलस्यात्मनः कर्त्तृत्वं भोक्तृत्वं वाऽस्तीति भावः ॥४॥

इदानीमश्वस्थानीयेन्द्रियनियमनं कार्य्यमिति भावेन मनोनियमनं विज्ञानञ्च तत्साधनमित्यन्वयव्यतिरेकाभ्यां दर्शयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५ ॥
यस्तु विज्ञानवान्भवति युक्तेन मनसा सह ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६ ॥

टीका—यस्त्वविज्ञानवान् । शास्त्रादिजनितविशेषबुद्ध्याख्यविवेक सारथिशून्योऽतएवायुक्तेनानिगृहीतेन मनसा सदा युक्तो भवति । तस्य पुरुषस्येन्द्रियाण्यवश्यानि भवन्ति । तत्र दृष्टान्तमाह । दुष्टाश्वा इति । अनिगृहीता अश्वा इत्यर्थः ॥ ५ ॥

प्राधान्याद्व्यतिरेकमुक्त्वाऽन्वयमाह । यस्त्विति । यस्तु पुनः पूर्वोक्तविपरीतः सारथिर्भवति विज्ञानवान् = प्रगृहीतमनाः समाहितचित्तः सदा तस्याश्वस्थानानीन्द्रियाणि प्रवर्त्तयितुं निवर्त्तयितुं शक्यानि वश्यानि । दान्ताः सदश्वा इवेतरसारथेः ॥ ६ ॥

अस्त्वेवमन्वयव्यतिरेकाभ्यामिन्द्रियनियमनेन मनोनियमनादि-साधनम् , तदेव किमर्थमिति चेन्न । तस्य परम्परया मोक्षोपयोगित्वा-दिति भावेनेन्द्रियनियमनाद्यभावे मोक्षाभावं तावदाह ।

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारश्चाधिगच्छति ॥ ७ ॥
यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ ८ ॥

टीका—यस्त्वविज्ञानवान् भवति । अमनस्कोऽप्रगृहीतमनस्कः अतएवेन्द्रियाणां दुष्टविषयेषु यथेष्टं प्रवृत्त्या निरन्तरमशुचिः । मनोनिग्रहाभावेऽविवेकित्वादिन्द्रियपारवश्येन पापचये दूषितान्तःकरणोऽशुचिरित्यर्थः । न स रथी मोक्षमाप्नोति, प्रत्युत जन्ममरणलक्षण संसारमधिगच्छति ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमन्वयमाह। यस्त्विवति। यस्तु द्वितीयो विज्ञानवान् विज्ञानसारथ्युपेतो रथी समनस्कः समाहितमनाः सतत एव सदा शुचिः स तु तत्पदं मोक्षमाप्नोति। यस्मात्तत्पदादप्रच्युतः सन् भूयः पुनर्न जायते संसारे ॥ ८ ॥

किं तत्पदमिति जिज्ञासायां तत्पदं दर्शयति।

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ ९ ॥

टीका—समीचीनविज्ञानमनः सारथिः पूर्वोक्तमनः प्रग्रहवान् प्रगृहीतमनाः=समाहितचित्तः सञ्शुचिर्नरो विद्वान् संसाराध्वनः=संसारगतेः पारं=पारमेवाधिगन्तव्यमित्येतदाप्नोति। तद्विष्णोर्व्यापनशीलस्य ब्रह्मणः परमात्मनो वासुदेवस्य परमं प्रकृष्टं परं स्थानं गोलोकं परमात्मस्वरूपसहितमाप्नोतीत्यर्थः ॥ ९ ॥

रथादिरूपितशरीरादिषु येभ्यो येषां वशीकार्यतायां प्राधान्यं तान्युच्यन्ते।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।

मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ १० ॥

महतः परमव्यक्तमव्यक्तात्पुरुषः पर।

पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति ॥ ११ ॥

टीका—आनुमानिकाधिकरणे वेदान्तकौस्तुभे अनयोर्मन्त्रयोरर्थः पूज्यपादैर्भाष्यकृद्भिरुक्तः। तथा हि। अत्र पुरस्ताद्रथित्वादिनोक्ताः पदार्था विवक्षितार्थवशात् क्रममनपेक्ष्य निरूप्यन्ते। तत्र रथित्वादिना रूपिता आत्माद्याः स्वस्व शब्दैर्गृह्यन्ते। रथत्वेन रूपितं शरीरं तु परिशेषादव्यक्तशब्देनोच्यते। तत्र हयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषया वशीकार्यत्वे परा उत्कृष्टा इत्यर्थः। वश्येन्द्रिय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यापि विषयसन्निधानेहीन्द्रियाणां पुनस्तेपु प्रवृत्तिदर्शनात्। तेभ्योऽपि-प्रग्रहरूपितं मनः परम्। मनसि विषयाप्रवणे विषयसन्निधानस्या-किञ्चित्करत्वात्। तस्मादपि सारथिरूपिता बुद्धिः परा, अध्यवसायाभावे मनसोऽप्यकिञ्चित्करत्वात्। तस्यापि रथिरूपित आत्मा कर्त्तृत्वेन प्राधान्यात्परः। सर्वस्यात्मेच्छायत्तत्वात्स एव महानिति विशिष्यते। ततोरथरूपितं शरीरं परम्। जीवस्य सर्वसाधनप्रवृत्तीनां शरीरायत्तत्वात्। ततोऽपि सर्वात्मा संसाराध्वनः पारभूतः पुरुषः परः। पूर्वोक्तस्य सर्वस्य तदधीनत्वात्। यथोक्ताराधनेन तस्मिन्वशीभूते सति सर्वपुरुषार्थसिद्धिः स्यात्। "या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये। तया विना तदाप्नोति नरो नारायणाश्रयः।" तस्मान्नेह महच्छब्देन प्रधानकार्यभूतोमहानव्य-क्तशब्देन च तत्कारणं प्रधानं पुरुषशब्देन च चतुर्विंशति सङ्ख्याकः प्राकृतगणापेक्षया पञ्चविंशकः साङ्ख्याभिमतः पुरुषोगृह्यते। अस्मिन्नेव पुरुषे जिज्ञास्येऽनन्तकल्याणगुणार्णवे सर्ववेदसमन्वयः। अतः परं वस्त्वभावात् तदिदमुक्तम्। "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः।" यस्मान्नास्ति पुरुषात्परमात्मनः परं किञ्चिदपि वस्त्वन्तरं, तस्मात्सर्वेषां सा काष्ठा स एवावधिः। कुतः सा परा गतिः। गन्तॄणां परा प्रकृष्टा गतिः पुरुष एव प्राप्यः। "नान्या गति कृष्णपदारविन्दा-दिति वाक्यार्थकारोक्तेः" ॥ १० ॥ ॥ ११ ॥

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥

टीका—एषः=पुरुषः सर्वेषु=ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु गूढः वर्त्तमानोऽपि अनादिकर्मात्मिका मायाच्छन्नत्वेनानिगृहीतेन्द्रियाणां पुंसां न यथावत्प्रकाशते। दृश्यते त्वग्र्या बुद्ध्या। एकाग्रयुक्तया विषयप्रवण-रहितया सूक्ष्मवस्तुविवेचनसमर्थया बुद्ध्या सूक्ष्मदर्शिभिः परं सूक्ष्मं द्रष्टुं शीलं येषां ते सूक्ष्मदर्शिनस्तैर्दृश्यते॥

अयं मन्त्रो भाष्यकृद्भिरित्थं व्याख्यातो वेदान्तकौस्तुभे। असं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतचित्तैर्दुर्ज्ञेयत्वं संयतचित्तैः सुज्ञेयत्वञ्च परमपुरुषस्य दर्शयन् इन्द्रियादीनां वशीकरणप्रकारञ्च दर्शयन् रूपकविन्यस्त ग्रहणं दर्शयति च वाक्यशेषः। एष सर्वेष्विति वाक्यं पठितः। एषः, "पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इत्यनेनोक्तः समानातिशयशून्योमुक्तगम्यः सर्वज्ञो वासुदेवः सर्वेषु भूतेषु वर्त्तमानोऽपि न प्रकाशते सर्वेषां दृश्यो न भवति। तेषां तद्दर्शनानधिकारात्। अतएव गूढः, सन्धिश्छन्दोऽनुरोधात्। "नाहं प्रकाशः सर्वस्ये" ति श्रीमन्मुखोक्तेश्च। सत्यधिकारे दृश्योऽपि भवतीत्याह। दृश्यते इत्यादिनेति ॥ १२ ॥

इन्द्रियादीनां वशीकरणप्रकारमाह।

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥१३॥

टीका—वागिन्द्रियोपलक्षितानि सर्वाणीन्द्रियाणि मनसि यच्छेत्। मनसीति दैर्घ्यं छान्दसम्। तन्मनो ज्ञान आत्मनि बुद्धौ, बुद्धेर्ज्ञानत्वमात्मत्वञ्च जीवसम्बन्धात्। ज्ञानञ्च आत्मनि महति जीवे, तञ्च शान्ते सर्वकारणे ब्रह्मणि यच्छेत्।

यदि पूर्वत्र महच्छब्देन महत्तत्त्वं गृहीत्वा तत्प्रत्यासत्त्या तत्कारणं प्रधानमानुमानिकमव्यक्तशब्देन गृह्यते तर्हि महच्छब्देनात्रापि तद्ग्रहणसम्भवान्महान्तं शान्ते यच्छेदित्यनिष्टापातः स्यादतो वाक्यशेषोऽपि शरीररूपक विन्यस्तग्रहणं दर्शयतीत्यर्थः। इत्थं व्याख्यातो भाष्यकारैर्वेदान्तकौस्तुभेऽस्यमन्त्रस्यार्थः ॥ १३ ॥

इत्थं वशीकारप्रकारं निरूप्य वेदपुरुषो भगवदभिमुखीकरणेन पुंसां हितमुपदिशति।

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो
वदन्ति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—हे अधिकारिणः संसारएव निषण्णा यूयमुत्तिष्ठत भगवज्ज्ञानाभिमुखा भवत। जाग्रत, अज्ञाननिद्राया घोररूपायाः सर्वानर्थ-बीजभूतायाः क्षयं कुरुत। कथं जागरणम्। वरानुत्तमानाचार्य्यान्वेदशा-स्त्रसम्पन्नान्प्राप्य निबोधतावगच्छत। भगवद्वासुदेवस्य स्वरूपमिति शेषः। नोदासितव्यमित्यर्थः। किमर्थं भगवद्बोधः सम्पादनीयः, संसारनिवृत्तेः कारणान्तरेणापि सम्भवादित्यत आह। क्षुरस्येति। इयं संसृतिः क्षुरस्य धारेव निशिता तीक्ष्णीकृता अतएव दुरत्यया ज्ञानं विनाऽत्येतुमशक्या। तत् तस्मात् पथः पन्थानं मोक्षमार्गं दुर्गं भगवत्स्वरूपज्ञानं विना गन्तु-मशक्यमिति कवयो मेधाविनो वदन्ति। भगवज्ज्ञानस्यान्यतोऽपि सम्भ-वात्किमाचार्य्योपदेशेनेत्यत आह। दुर्गमिति। आचार्य्योपदेशमन्तरेण कदाऽपि ज्ञातुमशक्यमिति कवयो वदन्ति॥ १४॥

कुतः शब्दाद्यनात्मकत्वेन श्रोत्राद्यविषयत्वादित्याह। यद्वा दुर्गम-त्वमुपपादयितुमितरवैलक्षण्यं वदन्नाचार्य्योपदेशेन परब्रह्मणः स्वरूपनि-श्चयस्तदनुग्रहलभ्य एव मोक्षस्यसाधनमित्याह।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते॥१५॥

टीका—शब्दो न भवतीत्यशब्दमित्यादिना पञ्चतन्मात्रा वैलक्ष-ण्यमुच्यते। अगन्धमित्यत्रापि ग्राह्यम्। अगन्धमित्यनेनोपलक्ष णेन पञ्चमहाभूतवैलक्षण्यम्। तत्र हेतुरव्ययमिति। अपचयशून्यम्। यच्छब्दस्य तमित्युत्तरेणान्वयः। न विद्यते आदिरुत्पत्तिः पराधीन प्राप्त्यादिलक्षणा यस्य सोऽनादिः। न विद्यतेऽन्तः परिच्छेदो देशतः कालतो गुणतो वा यस्यासावनन्तः, अनादिश्चासावनन्तश्च अनाद्यनन्तं महतश्चतुर्मुखात्परं तं परमात्मानं आचार्य्योपदिष्टं ध्रुवं स्थिरं निचाय्य दृष्ट्वा दर्शनसमकालीनानवरत भगवद्गुणविषयकस्मृतिसन्तानरूपध्यानेन विषयीकृत्य मृत्युमुखाद्भीषणात्संसारान्मुच्यते॥ १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिः पूर्वोक्तां विद्यां स्तौति ।

नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ सनातनम् ।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते ॥ १६ ॥

टीका—नाचिकेतं नचिकेतसा प्राप्तं नाचिकेतं । मृत्युना यमेन प्रोक्तं मृत्योः प्रवक्तृत्वमेव न स्वातन्त्र्येण प्रवक्तृत्वम् । अतएव सनातनमपौरुषेयत्वात्प्रवाहरूपेण नित्यम् । ब्राह्मणेभ्य उक्त्वा आचार्य्यमुखादिदमुपाख्यानं श्रुत्वा मेधावी ब्रह्मैव लोको ब्रह्मलोकस्तस्मिन्महीयते पूज्यते ॥ १६ ॥

य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि ।
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते ॥
तदानन्त्याय कल्पत इति ॥ १७ ॥

इति काठकोपनिषदि प्रथमोऽध्यायः ।

टीका—योऽधिकारी इमं वल्लीत्रयरूपमुपाख्यानं परमं प्रकृष्टं गुह्यं गोप्यं श्रावयेत् । ब्राह्मणानां संसदि प्रयतः शुचिर्भूत्वा श्राद्धकाले वा संश्रावयेत् । तत् श्रवणं श्राद्धं वा अनन्तफलाय कल्पते ।

द्विरुक्तिरध्यायसमाप्त्यर्था ।

इति काठकोपनिषत्प्रकाशिका टीकायां प्रथमोऽध्यायः ।

इति तृतीया वल्ली समाप्ता ॥ ३ ॥

द्वितीयाध्याये प्रथमा वल्ली ।

ब्रह्मविद्याधिकार वैराग्यनिरूपणपुरस्सरं ब्रह्मस्वरूपनिरूपणं द्वितीयाध्यायेनारभ्यते ।

पराञ्चि खानि व्यतृणत स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—खानि = श्रोत्रादीन्द्रियाणि पराञ्चि = परानञ्चन्ति गच्छन्तीति शब्दादिविषयप्रकाशकानि न तु स्वात्मप्रकाशकानि। यस्मादेवं तानि स्वयम्भूः स्वतन्त्रः परमेश्वरः व्यतृणत् = हननं कृतवान्। तृह तुद हिंसायामिति धातुः। तस्मात् पराङ् पराग्रूपाननात्मभूताञ्च्छब्दादीन्पश्यन्ति उपालभन्ते। अन्तरात्मानं नेत्यर्थः। लोकस्यैवं स्वभावे सत्यपि, कश्चिद्धीरो विवेकी, अमृतत्वं मोक्षमिच्छन् आवृत्तचक्षुः विषयव्यावृत्तेन्द्रियः सन्प्रत्यगात्मानमैक्षत् अपश्यत् ॥ १ ॥

न सर्वथा मुमुक्षुर्विषयप्रमादी स्यादिति भावेनोक्तमेव विवृणोति।

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥२॥

टीका—बालाः = अविवेकिनः, पराचो बहिष्ठान्कामाननुयन्ति। अस्तते विततस्य सर्वदेशकालेषु विस्तृतव्यापारस्य मृत्योर्यमस्य पाशं मरणमिति यावत् यन्ति यान्ति। अथ तस्मात् धीरा अमृतत्वं मोक्षं ध्रुवं नित्यं विदित्वा इहाध्रुवेषु विषयेषु न प्रार्थयन्ते। प्रत्यक् तत्त्वज्ञस्य सर्वं जिहासितव्यमिति भावः। परात्मनः सर्वजीवगताहन्तास्पदत्वेन मुख्याहमर्थत्वात् प्रत्यक्त्वमस्तीति द्रष्टव्यम् ॥ २ ॥

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् ॥
एतेनैव विजानाति किमत्र परिशिष्यते ॥ एतद्वै तत् ॥३॥

टीका—येन साधनेन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनांश्च मैथुननिमित्तान्सुखविशेषान् जानाति सर्वोलोकः। "तद्देवा ज्योतिषां ज्योतिः" बृ० ४।४।१६॥ इति रूपादिप्रकाशकानामिन्द्रियाणां तदनुगृहीतानामेव कार्यजनकत्वादिति भावः। आत्मनाऽविज्ञेयं किमत्रास्मिँल्लोके परिशिष्यते। न किञ्चित् परिशिष्यते। स आत्मा सर्वज्ञ एतद्वै तत्। तत्पूर्वं प्राप्यतया निर्दिष्टं विष्णोः परमं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदम्। एतद्वै एतदेवैतन्मन्त्रप्रतिपाद्यात्मस्वरूपमेवेत्यर्थः ॥ ३ ॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ॥
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥४॥

टीका—स्वप्नान्तं निखिलं स्वाप्नप्रपञ्चं जाग्रत्प्रपञ्चञ्च मन आदीन्द्रियभावमापन्नेन येन परमात्मना लोकः पश्यति। महान्तमिति पूर्ववद्व्याख्येयम्। तमिति शेषः ॥ ४ ॥

य इदं मध्वदं वेद आत्मानं जीवमन्तिकात् ॥
ईशानो भूतभव्यस्य न ततो विजुगुप्सत ॥ एतद्वै तत् ॥५॥

टीका—यः कश्चिदिदमिमं मध्वदं कर्मफलभुजं जीवात्मानमन्तिकात् जीवस्यान्तिके समीपे भूतस्य भव्यस्य वर्त्तमानस्य कालस्येशानमीशितारं परमात्मानं वेद जानाति। स ततो भगवज्ज्ञानसामर्थ्येनान्यविषयकभयाभावान्नविजुगुप्सते आत्मानं गोप्तुं नेच्छति। एतद्वै तदिति पूर्ववत् ॥ ५ ॥

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत ॥
गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत ॥ एतद्वै तत् ॥६॥

टीका—यश्चतुर्मुखः अद्भ्यः पूर्वं जलोपलक्षित पञ्चभूतोपादानक व्यष्टिसृष्टेः पूर्वमजायत, उत्पन्नस्तं तपसः ब्रह्मणः सङ्कल्पमात्रादेव पूर्वं जातं गुहां प्रविश्य तिष्ठन्तं हृदयगुहां प्रविश्य वर्त्तमानं भूतेभिर्भूतैर्देहेन्द्रियान्तःकरणादिभिर्विशिष्टं हिरण्यगर्भं निखिलजगत्स्रष्टा स्यादिति कटाक्षेण व्यपश्यतैक्षत। एतद्वै तत्। एतदेवैतन्मन्त्रप्रतिपाद्यात्मस्वरूपमेवेत्यर्थः। "अप एव ससर्जादौ तासु वीर्य्यमवासृजत। तदण्डमभवद्धैमं सहस्रांशु समप्रभम्। तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह" इति श्रीमहर्षिमनुवचनम्। "यो देवानां प्रथमं पुरस्तात् विश्वाधिको रुद्रो महर्षिः।" श्वे० ।३।४। हिरण्यगर्भं पश्यति जायमानम् ॥ श्वे० ३।४। इति श्वेताश्वतरोपनिषद्वचनञ्चानुसन्धातव्यम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या प्राणेन सम्भवत्यदितिर्देवतामयी ।
गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत ॥ एतद्वै तत् ॥७॥

टीका—कर्मजन्यफलानामदनाद्भक्षणाददितिर्जीवात्मा प्राणेन सम्भवति । प्राणेन सह वर्त्तमाना देवतामयी । इन्द्रियाधीनभोगा । गुहां प्रविश्य तिष्ठन्ती । हृदयपुण्डरीककुहरवर्त्तिनी । तामेव विशिनष्टि । या भूतेभिर्भूतैः समन्विता व्यजायत, विविधाकारेण देवादिस्वरूपेण जायते। एतद्वै तत् । तत्तदात्मकमित्यर्थः ॥ ७ ॥

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निरेतद्वै तत् ॥८॥

टीका—योऽधियज्ञे उत्तराधरारण्योर्निहितः स्थितो जातवेदाग्निः पुनः सर्वहविषां भोक्ता गर्भिणीभिरन्तर्वत्नीभिरगर्हितान्नपानभोजनादिना सुभृतः सुष्ठु सम्यग्भृतो गर्भ इव निहित इति पूर्वेणान्वयः । उदित्यवधारणे । दिवेदिवेऽहन्यहनि । ईड्यः स्तुत्यः वन्द्यश्च । जागृवद्भिः जागरणशीलवद्भिरप्रमत्तैः । हविष्मद्भिराज्यादिमद्भिर्ऋत्विग्भिः । मनुष्येभिर्मनुष्यैश्च स्तुत्योऽग्निः । एतद्वै तत् । एतदग्निस्वरूपं तत्पूर्वोक्त ब्रह्मात्मकमित्यर्थः ॥ ८ ॥

यतश्चोदेति सूर्य्योऽस्तं यत्र च गच्छति ।
तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन ॥ एतद्वै तत् ॥६॥

टीका—सूर्य्यः सृष्टिकाले यतो ब्रह्मणः सकाशादुदेति । यत्र च प्रलयकालेऽस्तमदर्शनञ्च गच्छति । देवाः सर्वे यस्मिन्नात्मनि अर्पिताः प्रतिष्ठिताः । तदु नात्येति कश्चन । तत् सर्वात्मकं ब्रह्म कोऽपि नातिक्रामति । छायावदन्तर्यामिणो दुर्लङ्घ्यत्वादिति भावः । एतद्वै तत् । उक्तोऽर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदेवेह तदमुत्र यदमुत्र तदन्विह ॥
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥१०॥

टीका—यदेव ब्रह्म स्वात्मस्थत्वेनेह लोकेऽनुसन्धीयमानं तदेव ब्रह्मामुत्र लोकान्तरे तत्रस्थानां पुंसां स्वात्मस्थत्वेनानुभूयते। तस्मादात्मभेदो नास्तीत्यर्थः। इह परमात्मनि। नानेव अत्रेव शब्द उपमायां, यथा परमात्मनि अत्यन्त भेदं तथैवात्यन्ताभेदम्। यः पश्यति स मृत्योर्मरणान्मरणं मृत्युं पुनःपुनर्जन्ममरणभावमाप्नोति प्रतिपद्यते। अतो न ब्रह्मणा चेतनानामत्यन्त भेदः, नाप्यत्यन्ताभेदः। किन्तु चेतनाचेतनयोर्ब्रह्मणासह भेदाभेदः। सर्वात्मत्व सर्वनियन्तृत्व सर्वव्यापकत्व स्वतन्त्रसत्व सर्वाधारत्वयोगेन स्वरूपेण भेदः। ब्रह्मात्मकत्व तन्नियम्यत्व तद्व्याप्यत्व तत्तन्त्रसत्व पराधेयत्वादियोगेन च स्वरूपेण चाभेदः। अतो न गुणसाङ्कर्य्यदोषावकाशः प्रसज्यते न वयं स्वरूपतो जीवेशयोरैक्यमभ्युपगच्छामो येनोक्तदोषः प्रसज्येत। किंतु, इतरेतरात्यन्तविलक्षणत्वात् ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण भिन्नत्वमभिन्नत्वञ्चाभ्युपगच्छामः ॥ १० ॥

यदि सर्व प्राणिनामन्तर्य्यामी परमात्मा इत्युच्यते, तथात्वेनास्माकं कुतो नोपलभ्यत इत्यत्राह।

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन ॥
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥११॥

टीका—इदमात्मस्वरूपं श्रवणादि संस्कृतेन मनसाऽऽप्तव्यम् ग्राह्यम्। इह जगत्कारणे ब्रह्मणि नानात्वन्नास्ति। तस्य सर्वास्वपि उपनिपत्स्वेकत्वावधारणात्। कारणनानात्वदर्शनस्य फलमाह। मृत्योरिति। नित्य संसारी भवति, परमेश्वरे नानात्वदर्शित्वात्। इव शब्दोऽल्पार्थः। "इवोपमायामल्पे च" इति कोशात्। स च कैमुत्यन्यायपरः। कारणे ब्रह्मणि यद्यल्पनानात्वदर्शनस्यापीदृक् फलं, किम्बहुत्वेने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यर्थः । ननु कारणे ब्रह्मणि भेदाप्रसक्तिरप्रसक्तस्य निषेधायोगादितिचेन्न कारणेऽनेकत्व प्रसक्तेः शास्त्रसिद्धत्वात् । "जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः । जीवे प्रलयमृच्छन्ति न जीवात्कारणम्परमिति ।" 'ब्रह्मा देवानां प्रथमः सम्बभूव, विश्वस्य कर्त्ता भुवनस्य गोप्ता ।' 'न सन्न चासच्छिव एव केवलः ।' 'स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये ।' इत्यादि श्रुतिभिः कारणनानात्वस्य सुप्रसक्तत्वात् । इहेति विशेषणान्ना-नात्वमात्र निषेध सम्भव निषेध तदाधारब्रह्मणोनिषेधनिषेध्ययोर्नानात्व तदभावयोश्च भेदावश्यकत्वात् । अथवा नाना शब्दोऽत्र विनाऽर्थकः । 'विनञ्भ्यां नानाञौ न सह' इति सूत्रे महाभाष्यकारैर्नानाविना शब्दयो-रेकार्थत्वोक्तेस्तथा चैवं योजना । इह जगति नाना स्वोपादानं परमेश्वरं विना किञ्चनापि वस्तुजातं नास्ति । सर्वकार्य्यत्वावच्छिन्नस्य स्वोपादाना-विनाभूतत्वात् । "यच्चापि सर्व भूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरमिति" श्रीमुखोक्तेः । अन्यत्स्पष्टम् । इत्थं द्वितीयाध्याये परपक्षगिरिवज्रे पूज्यपादैः श्रीमाधवमुकुन्दचरणैरस्य मन्त्र-स्यार्थो विवृतः ॥ ११ ॥

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ॥
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥ एतद्वै तत् ॥१२॥

अङ्गुष्ठमात्रः । अङ्गुष्ठपरिमाणः । हृद्यकाशापेक्षयाऽङ्गुष्ठमात्र-त्वोक्तिः । पुरुषः पूर्णः षड्गुणो भगवान् आत्मनि शरीरे मध्ये गुहायां तिष्ठति । परमात्मानं विशिनष्टि । ईशानो भूतभव्यस्येति । कालत्रयवर्ति निखिलचेतनस्येश्वरः नियन्ता । न तत इति पूर्ववत् । एतद्विशेषणेन जीवात्मनो व्यावृत्तिस्तस्य भूतभव्येशानत्वाभावात् । "शब्दादेव प्रमितः ।" ब्र० सू० । १ । ३ । २४ । इत्यधिकरणे भूतभव्येशितृत्व लिङ्गादयं मन्त्रः परमात्मपर एवेति सिद्धान्तितत्वात् । "अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठञ्च समाश्रितः ।" १६ । ३ । इति तैत्तिरीयके । "अङ्गुष्ठमात्रः पुरुषोन्तरात्मा सदा जनानां हृदये सन्निविष्ट" इति श्वेताश्वतरे । ३। १३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चाङ्गुष्ठमात्रत्वस्य परमात्मन्यपि श्रवणात् ॥ १२ ॥

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ॥
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥ एतद्वै तत् ॥ १३ ॥

टीका—अङ्गुष्ठमात्र इति पूर्ववत्। धूमानावृताग्निरिवप्रकाशकः। उरप्यर्थे। स एवाद्य वर्त्तते स एव श्वोऽपि वर्त्तिष्यते। अनाद्यनन्तकालेऽपि वर्त्तते। कालत्रयवर्त्तिनो यावन्तः पदार्था उपलभ्यन्ते ते सर्वेऽपि भगवदात्मका इति भावः। एतद्वै तत् इति पूर्ववत् ॥ १३ ॥

यथोदकं दुर्गे दृष्टं पर्वतेषु विधावति ॥
एवं धर्मान्पृथक् पश्यंस्तानेवानुधावति ॥ १४ ॥

टीका—यथा पर्वतेषु दुर्गे गिरिशिखरे दृष्टं सिक्तमुदकं निम्न प्रदेशेषु विधावति। एवं परमात्मगतदेवान्तर्य्यामित्व मनुष्यान्तर्यामित्वादिधर्मान् पृथगधिकरणनिष्ठान् पश्यन् पर्वत निर्झरपातमनुकृत्य संसार कुहरे पततीत्यर्थः ॥ १४ ॥

सर्वत्र देवादिषु मनुष्यादिषु चैक एव परमात्मेति विजानतो मुनेरात्माऽपि तज्ज्ञानेन विशुद्धः सन्परमात्मना समानो भवतीत्याह।

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ॥
एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५ ॥

इति काठकोपनिषदि द्वितीयाध्याये १ वल्ली समाप्ता ॥

टीका—हे गौतम ! यथा शुद्ध उदके शुद्धं जलमासिक्तं योजितं तादृगेव तत्सदृशमेव भवति, न कथञ्चिद्विसदृशं, (किन्तु) न तत्तदेव भवति, अन्यथा वृद्धिदर्शनासम्भवात्। एवं विजानतो मुनेरात्माऽपि मुक्तः सन् तादृगेव परमात्मसदृश एव भवति ॥ १५ ॥

इति काठकोपनिषत्प्रकाशिका टीकायां द्वितीयाध्याये प्रथमा वल्ली समाप्ता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्याय २ वल्ली २

पुरमेकादशद्वारमजस्यावक्र चेतसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते ॥एतद्वै तत् ॥१॥

टीका—पुरमेकादशद्वारं। चक्षुषी श्रोत्रे नासिके मुखञ्चेति सप्तशीर्षण्यानि नाभिरासनं गुह्यञ्चेतित्रीणि शिरस्येकमित्येकादशद्वारमिदं पुरं शरीरमजस्य जननादिरहितस्यावक्रचेतसो ऋजुबुद्धेर्विवेकिन आत्मनः शरीराख्यं पुरं भवतीत्यर्थः। यस्येदं पुरं तं पुरस्वामिनं शरीरात्पृथग्भूतमिति। हरेरधीनस्थितिप्रवृत्तिकमिति च विविच्य परमात्मानमनुष्ठाय ध्यात्वा न शोचति। शरीराभिमानकृतोहि शोकः। शरीरस्य भगवदधीनस्थितिप्रवृत्तिकत्वेन तदभिमानाभावान्न शोक इति भावः। एतद्वै तत्। एतन्मन्त्रेण यत्प्रत्यगात्मनः स्वरूपमभिहितं तद्भगवदायत्तत्वात् तदात्मकमेवेत्यर्थः ॥ १ ॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२॥

टीका—हंसः=सूर्य्यः। शुचिषत्=शुचौ ग्रीष्मर्तौ सीदतीति शुचिषत्तेजस्वी। वसुर्वायुः सर्वान्वासयतीति। अन्तरिक्षे सीदतीति अन्तरिक्षसत् अन्तरिक्षगतः। वेद्यां पूज्यतया सीदतीति वेदिषत् होताऽग्निः। "अग्निर्वै होता" इति श्रुतेः। अतिथिः सोमः सन् दुरोणे कलशे सीदतीति दुरोणसत् ब्राह्मणोऽतिथिरूपेण वा दुरोणेषु गृहेषु सीदतीति वा। नृषु मनुष्येषु सीदतीति नृषत्। वरेषु देवेषु सीदतीति वरसत्। देवेषु वर्त्तमानम्। ऋतं सत्यलोकं यज्ञो वा तस्मिन्सीदतीति ऋतसत्। व्योम्नि आकाशे परमपदे वा वर्त्तमानं व्योमसत्। अब्जाः, अप्सु शङ्खशुक्तिमकरादिरूपेण जायत इति। गोजाः, गवि पृथिव्यां व्रीहियवादिरूपेण जायत इति। यज्ञेन जायते ऋतजाः कर्मफलभूताश्च स्वर्गादय इति यावत्।। अद्रिजाः पर्वतेभ्यो जायन्ते नद्याद्याः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतत्सर्वं बृहद्तमपरिच्छिन्न सत्यरूपब्रह्मात्मकमित्यर्थः । ॥ २ ॥

ऊर्द्ध्वम्प्राणमुन्नयत्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वे देवा उपासते ॥ ३ ॥

टीका—सर्वेषां हृदिस्थितः परमात्मा उद्धर्वं हृदयात् प्राणवायुमुन्नयत्यूद्र्ध्वं गमयति, तथाऽपानं प्रत्यगधोऽस्यति क्षिपति। मध्ये हृदयपुण्डरीक आसीनं वामनं वमनीयमुपासकैर्भजनीयम्। सर्वे विश्वेदेवाश्चक्षुरादयः प्राणा रूपादिज्ञानबलिमुद्वहन्तो विशो राजानमिव परमात्मानमुपासते ॥ ३ ॥

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद्विमुच्यमानस्य किमत्र परिशिष्यते॥ एतद्वै तत् ॥४॥

टीका—शरीरस्थस्य स्थूलशरीरस्थस्यास्योपासकस्य देहिनः विस्रंसमानस्य स्थूलं शरीरं त्यजतो देहाद्विशेषेण मुच्यमानस्य मुक्तस्य किमत्र परिशिष्यते। कृतकृत्यत्वात् कर्त्तव्यं किमपि नावशिष्यते। परब्रह्मणो वासुदेवमनवरतध्यायमानस्य मुमुक्षोः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये"। छा० उ० ।६।१४।२। इति श्रुत्यनुसारेण शरीरपात एवान्तरायो न किञ्चित्कर्त्तव्यं परिशिष्यते इति भावः। एतद्वै तत्। पूर्ववत् ॥ ४ ॥

सकलजीवनहेतुप्राणापानप्रेरकत्वं परब्रह्म इति निरूपयन् तयोरपि जीवनहेतुत्वरूप माहात्म्यं दर्शयति।

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥

टीका—न प्राणेन नापानेन मर्त्यो मनुष्यो देहवान् कश्चन जीवति न कोऽपि जीवति। तर्हि केन जीवतीत्यत आह इतरेणेति। प्राणापानाभ्यामितरेण परब्रह्मणैव जीवन्ति सर्वे। यस्मिन् परमात्मनि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतौ प्राणापानावुपाश्रितौ प्राणापानयोरपिजीवनंयद्धेतुकंतद्धेतुकमेव सर्वेषां जीवनमित्याशयः ॥ ५ ॥

ये यं प्रेत इति प्रष्टुर्मुक्तस्वरूपेऽपिसन्देह आसीत् विशेषतस्तन्निवृत्यर्थमिदमुच्यते ।

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ ६ ॥

टीका—हन्तेदानीमपि पुनरपि ते तुभ्यमिदं गुह्यं गोप्यं ब्रह्म सनातनं प्रवक्ष्यामि । हे गौतम आत्मा, प्रत्यगात्मा मरणं, मोक्षं प्राप्य यथा यादृग्रूपसम्पन्नो भवति तथा पुनरपि तुभ्यं वक्ष्यामीत्यर्थः ॥ ६ ॥

अधिकारि विशेषनिर्देशपरेण हन्त इत्यनेन विवक्षितमर्थं विवृण्वन्नाह ।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथाश्रुतम् ॥७॥

टी०—अन्ये परब्रह्मश्रवणमननादिविमुखाः मूढाः शरीरत्वाय, शरीरग्रहणार्थं देहिनो देहवन्तः मनुष्य योनिं प्रपद्यन्ते । स्थाणुं वृक्षादि स्थावरभावमन्येऽत्यन्ताधमाः । मरणं प्राप्यानुसंयत्यनुगच्छन्ति । केषाञ्चित् मनुष्ययोनिप्राप्तिः । अन्येषां स्थाणुयोनिप्राप्तिरित्यत्रकिं विनिगमकमिति जिज्ञासायामाह । यथेति । यथा कर्म यै यादृशं कर्म जन्मांन्तरे कृतं तद्वशेन योनिप्राप्तिः । यथाश्रुतम् । "यादृशं विज्ञानमुपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्ते । रमणीयचरणाः ।" छा० ५।१०।७। "तं विद्या कर्मणी समन्वारभते ।" बृ० ।४।४।२। इत्यादि श्रुत्यनुरोधादितिभावः ॥ ७ ॥

यत् प्रतिज्ञातं तमर्थमुपदिशति ।

य एष सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोकाःश्रिताः सर्वे तदुनात्येतिकश्चन ॥ एतद्वै तत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—यः पुरुषः पूर्णषड्गुणः परमात्मा। एषुजीवेषु सुषुप्तेषु सत्सु तदा कामं कामं सङ्कल्प्य सङ्कल्प्य स्वेच्छानुसारेण रथपथादीन् निर्मिमाणो जागर्ति तदेव शुक्रं प्रकाशकं तदेव ब्रह्मपूर्णगुणं तदेवानन्याधीनममृतमुच्यते तेन मुक्तानां व्यावृतिस्तेषाममृतत्वं भगवदधीनमित्याशयः। तस्मिन् परब्रह्मणि सर्वेलोका आश्रिता। तद्ब्रह्म कोऽपिनात्येति अयञ्चार्थः सन्ध्यधिकरणे भाष्ये श्रीश्रीनिवासाचार्य्यचरणैर्निपुणं प्रकाशितः। एतद्वैतत् इतिपूर्ववत्॥ ८॥

अहमर्थस्यात्मनोदुर्बोधत्वामाशङ्क्याह—

अग्निर्यथैको भुवनंप्रविष्टो रूपंरूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपंरूपं प्रतिरूपोबहिश्च ॥९॥

टीका—यथा एक एवाग्निः प्रकाशकः; भुवनं ब्रह्माण्डं त्रिवृत्करण व्याप्त्या प्रविष्टः सन् रूपं रूपं भौतिक व्यक्तिं प्रति। प्रतिरूपः दाह्यभेदेन बहुविधो बभूव सर्वत्र भौतिक पदार्थेषु तेजोधातोर्मिलितत्वेन प्रतिसङ्क्रान्तरूपत्वात्। तथैक एव सन् परमात्मा सर्वभूतान्तरात्मा, सर्वेषां भूतानां प्रत्यगात्मनामभ्यन्तरात्माऽन्तर्यामितया प्रविष्टत्वात् प्रतिरूपो बभूव। बहिश्च बहिरप्याकाशवत् स्वेनाविक्रियरूपेण व्याप्नोतीत्यर्थः ॥ ९॥

अन्य दृष्टान्तेन परबुद्ध्यारूढं करोति।

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपोबभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपंरूपं प्रतिरूपो बभूव ॥१०॥

टीका-वायुर्यथा त्रिवृत्करणरीत्या भुवनं प्रविष्टःप्राणात्मना सर्वव्यक्तिष्वनुप्रविष्टो रूपंरूपं प्रतिरूपो बभूवेत्यादि पूर्ववत्समानम् ॥१०॥

यद्येकस्यब्रह्मणः सर्वान्तरात्मत्वमिष्टव्यं तदाजीवात्मवद्दुःखित्वं तस्य प्रसज्येतेत्याशङ्क्यान्यथोपपत्तिमाह

सूर्यो यथा सर्वलोकस्य चक्षुर्नलिप्यते चाक्षुषैर्बाह्यदोषैः॥
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेनबाह्यः।११।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्' इतिश्रुत्या यथा सूर्य्यः सर्वलोकस्यचक्षुः चक्षु रधिष्ठातृतया तदन्तर्गतोऽपि चाक्षुषैर्वहिर्निर्गतैश्चक्षुमलादिभिः काणपित्तादिभिश्चाध्यात्मिकदोषैस्तथा बाह्यैश्चाशुच्यादि दर्शनसंसर्ग दोषैश्च नलिप्यते न स्पृश्यते तथा परमात्मा एकः सर्व भूतेष्वात्मतयावर्त्तमानोऽपि तद्गतेनानेकप्रकार लोकदुःखेन नलिप्यते नस्पृश्यते। यतोबाह्यःलोकदुःखाद्बहिर्भूतः तस्यस्वाभाविकापहतपाप्मत्वादि गुणवत्तया स्वेतरवस्तुभ्योविजातीयत्वात् ॥ ११ ॥

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतंनेतरेषाम् ॥ १२ ॥

टीका—एकः मुख्यःसमानातिशयशून्यः वशी सर्वेषां प्रकृतिकालकर्मब्रह्मादीनां वशयिता यतः सर्वभूतान्तरात्मा एकं बीजं स्वेनैकीभूतम्। अविभागावस्थं प्रकृतिलक्षणं बीजं महदादिरूपेण बहुधा बहुविधं विश्वरूपेण करोति 'तमः परेदेवे एकीभवतीतिश्रुतेः'। तमात्मस्थं स्वान्तर्यामिणं ये धीराः निवृत्तबाह्यवृत्तयः विवेकिनोऽनुपश्यन्ति। शास्त्राचार्य्योपदेशमनुसाक्षादनुभवन्ति तेषां भागवतानां शाश्वतं नित्यं भगवद्भावापत्तिरूपं सुखं भवति नेतरेषां तद्विपरीतानामित्यर्थः ॥ १२ ॥

भूयोऽपि तमेवार्थं प्रथयति।

नित्यो नित्यानां चेतनश्चेतनानमेकोबहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥

यः नित्यानां शाश्वतानां चेतनानां जीवानामनन्तानाञ्च नित्यः चेतनः एकस्तैरुपासितः सन् कामान् तद्वाञ्छितान् विदधाति निष्पादयति तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः संसारोपरतिपूर्वक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवद्भावापत्तिरूपा मुक्तिः शाश्वती नित्या स्यात् । नेतरेषामभक्ता-नाम् ॥ १३ ॥

एवमुक्तोऽन्तेवासी आत्मनांदुर्ज्ञेयत्वेनकथं जानीयामिति पृच्छति ।

तदेतदितिमन्यन्तेऽनिर्देश्यं परमंसुखम् ।

कथंनुतद्विजानीयां किमु भाति विभाति वा ॥ १४ ॥

टीका—तदन्तरात्मस्थं ब्रह्मनिर्देश्यमिदमित्थमिति निर्देशानर्हं परमंसर्वोत्तमं सुखं सुखस्वरूपं प्राकृतपुरुषवाङ्मनसयोरगोचरम् । एतदिति भवादृशा विवेकिनः मन्यन्ते साक्षात् कुर्वन्ति कथं नु केनप्रकारेण प्राकृतरूपहीनं ब्रह्म अहं विजानीयाम् । स्ववेद्यत्वमापादयेयं किमु भो तत्किं दीप्तिमत्वेन भाति तत्रापि विशेषेण स्पष्टं प्रकाशते । उततेजोन्तरसम्वृतत्वान्नविस्पष्टं प्रकाशत इति प्रश्नः ॥ १४ ॥

नतत्र सूर्य्यो भाति न चन्द्रतारकं नेमाविद्युतो भान्ति कुतोऽयमग्निः ॥ तमेवभान्तमनुभाति सर्वं तस्यभासासर्वमिदं विभाति ॥ १५ ॥

इति काठकोपनिषदिद्वितीयाध्यायेद्वितीया वल्ली समाप्ता ॥ २ ॥

टीका—"आदित्यवर्णंतमसः परस्तात्" श्वे० ।३।८। सदेकरूपायेति वचनेन परमात्मा दिव्यमङ्गलविग्रहवत्तया सर्वातिशयदीप्तिमानस्तीत्याह । नतत्रेति । 'तत्र' तस्मिन् प्रकृते परब्रह्मणि सूर्य्यः सर्वप्रकाशकोऽपि न भाति तद्ब्रह्म न प्रकाशयति तथा तत्र चन्द्रश्च तारकाणिच तेषां समाहारश्चन्द्रतारकमपि न प्रकाशयति तथा तत्र नेमाविद्युतोभान्ति अस्मत्करणगोचरोऽयमग्निर्न भातीतिकिमु वक्तव्यं ब्रह्मणः सर्वतेजसामाच्छादकत्वादित्यर्थः। ननु भास्वररूपवति सूर्यादौ प्रत्यक्षेणानुभूयमानेन भातीति प्रत्यक्षविरुद्धं कथमभिधीयते इतिचेत्तत्राह । तमेव परमात्मानं भान्तं प्रकाशन्तमनुभाति सर्वमादित्यादिकं भाति प्रकाशते । तस्य सर्व तेजसां कारणत्वात् । भगवदायत्तः सूर्यादीनां प्रकाशः । तथाहि स्मृतिः । "यदादित्यगतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक-मिति अ० १५ । १२" तस्य ब्रह्मणो भासा कान्त्या सर्वमिदं सूर्यादिकं विभाति प्रकाशते ।।

इति काठकोपनिषत्प्रकाशिका टीकायां द्वितीयाध्याये
द्वितीया वल्ली समाप्ता ।।

———

अथ तृतीया वल्ली

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः ।
तदेवशुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चन ।। एतद्वै तत् ।। १ ।।

टीका—प्रकृति कार्य संसार वृक्षावधारणेन तन्मूलभूतस्य परब्रह्मणः स्वरूपादिकमवधारयितुं आदितः षष्ठी वल्लीयं प्रवर्त्तते । उर्द्ध मूल-मिति । ऊर्द्ध्वं भगवद्धामगन्तुर्भगवद्भक्तस्य। सर्व लोकातिक्रमणे सावर्ण ब्रह्माण्डोपरि वर्त्तमानं त्रिगुणात्मकप्रकृत्यावरणमेव मूलमादिर्यस्य संसार वृक्षस्येत्यूर्द्ध्वमूलः । अवाक् शाखः ततोऽर्वाचीनाः सत्यलोक प्रभृति चतु-र्दशलोकाः शाखाइव जीवकर्मफलभोगाश्रयाः शाखा यस्येत्यवाक्शाखः एवम्भूत एषः, अश्वत्थः । अश्वत्थवत् सकामकर्मवातेरितत्वेन नित्य प्रचलितस्वभावः यथातिमन्दवातेनाश्वत्थश्चलति तद्वत् । यद्वा विनाशि-त्वेन श्वः प्रभातपर्य्यन्तमपि न तिष्ठति स्थास्यतीति विश्वासानर्हत्वादश्वत्थः परभक्तिपरज्ञानात् प्राक् प्रवाह रूपेण सनातनश्चिरन्तनः एवम्भूतस्य संसारवृक्षस्य प्रकृतिः मूलं तस्याश्चब्रह्मशक्तित्वात् । शक्तिशक्तिमतो र्भेदाभेदत्वेन । ब्रह्ममूलत्वमाह । तदिति तदेवमूलभूतं शुक्रं शुभ्रं प्रकाशात्मकं तद् ब्रह्मस्वरूपादिनावृहत तदेवामृतं नित्यमुक्तस्वभावं कथ्यते । तस्मिन् मूलभूते सर्वकारणे ब्रह्मणि सर्वे लोका भूरादयः श्रिताः स्थिताःतदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्ब्रह्म कश्चन कश्चिदपि नात्येति नातिक्रामति सर्वं कारणत्वात् । एतद्वै तत्पूर्ववदर्थः ॥१॥

यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम् ।
महद्भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति ॥ २ ॥

टीका- ततो मूलकारणात् ब्रह्मणो जगन्निःसृतमित्याह । यदिति । यदिदं किञ्च इदं सर्वं जगत् प्राणे प्राणशब्दवाच्ये परस्मिन् ब्रह्मणि स्थितं सत् । एजते एजृकम्पने इति धातुः । प्राण इति सप्तम्यन्त पदसामर्थ्यात् स्थितमित्यध्याहारः । (अतएव प्राणः) इति सूत्रेण प्राणशब्दस्य ब्रह्म परत्वं निर्विवादम् । ततो निस्सृतं निर्गतं सत् एजति स्वस्वकार्येषु चेष्टते यज्जगदुत्पत्यादिकारणं ब्रह्म तन्महद्भयम् । बिभेत्यस्मादितिभयं महच्च तद्भयञ्च महद्भयम् । उद्यतमिव वज्रम् । उद्यतवज्रवन्महाभयप्रदम् । स्वधर्मातिलङ्घन इति शेषः । य एतद्विदुर्जगदुत्पत्यादि कारणं सकलजगन्नियामकं ब्रह्मेति जानन्ति ते अमृता मरण धर्म रहिता मुक्ता भवन्तीत्यर्थः ॥ २ ॥

भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३ ॥

टीक—कथं तद्भयेन चेष्टते जगदित्यत्राह । भयादिति । अस्य ब्रह्मणो भयात् भयेनाग्निस्तपति । तथा सूर्यो भयात्तपति । भयादिन्द्रश्च वायुश्च तथा मृत्युः सर्वमारकोप्यस्य भयाज्जगत्सु धावति स्वव्यापारं करोति। धावति शब्दः इन्द्रादीनां स्वस्वव्यापारप्रवृत्तिपरः । यदीदृशानां समर्थानां लोकपालानां सतां वज्रोद्यतकरवत् नियन्ता चेदीश्वरो नस्यात्तदा स्वामिभयाद् भृत्यानामिव नियन्ता प्रवृत्तिर्नस्यादितिभावः ॥३॥

इह चेदशकद्बोद्धुं प्राक्शरीरस्यविस्रसः ।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—इह जीवन्नेव सकल भयकारणं ब्रह्मेति बोद्धुं ज्ञातुं चेत् यद्यशकत् शक्नोति शरीरस्य विसंस्रः विस्रंसनात् पातनात् प्राक् पूर्वं तदा संसृति बन्धनात् मुच्यते न चेत् ततस्तदज्ञानाद्धेतोः सृज्यन्ते स्रष्टव्याः प्राणिनो येषु ते सर्गाःभूरादिलोकास्तेषुलोकेषु शरीरत्वाय जन्ममरण जरादि लक्षण शीर्यमाणत्वाय कल्पते समर्थो भवति शरीरं गृह्णातीत्यर्थः। तस्माच्छरीरपातनात्पूर्वमेवात्मज्ञानाय यतेतेतिभावः ॥ ४ ॥

आत्मतत्त्वस्य दुर्बोधत्वं दर्शयति।

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके।
यथाप्सु परीव ददृशे तथागन्धर्वलोके छायातपयोरिव ब्रह्मलोके॥५॥

टीका—यथा आदर्शे दर्पणे प्रतीयमानमात्मानं लोको विविक्तं पश्यति तथेहात्मनि अन्तरात्मानं ध्यानादौ विवक्तमात्मनोदर्शनं भवतीत्यर्थः। यथा स्वप्ने जाग्रद्दर्शनवत् सम्यक्तया संशयादिविरोधित्वेन ज्ञानाभावः तथा पितृलोके संशयादियुक्तमात्मदर्शनं, यथा अप्सु जलेषु अविविक्तात्मरूपं परीव दृश्यते परिदृश्यत इव नेतरवत् स्पष्टं प्रकाशते तथा गन्धर्वलोके प्यायाततः प्रतीतिमात्रमित्यर्थः। एवमन्यलोकान्तरेपि श्रुतिप्रामाण्याद्ज्ञायते। छायातपयोरिव ब्रह्मलोके। यथा छायातपयोर्मिश्रणे शुद्धातपवर्तिपदार्थवन्नोपलम्भः, एवं ब्रह्मलोकेऽपि नसम्यगुपालम्भः सम्भवति। अतो दुरधिगमात्मतत्त्वमितिभावः ॥ ५ ॥

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ॥ ६ ॥

टीका—तर्हि कथमसौ ज्ञेयः किञ्च तज्ज्ञाने कारणमित्यत्राह। इन्द्रियाणमिति। इन्द्रियाणां चक्षुरादीनां स्वस्यविषयग्रहणार्थं स्वकारणात् राजसाऽहङ्कारात् पृथगुत्पद्यमानानां पृथग्भावं पृथक् भिन्नं विलक्षणं भावः स्वभावोयेषां ते पृथग्भावम्। उदयास्तमयौ यौ, उत्पादविनाशौ च। यदित्यव्ययं यावित्यर्थे। तान् सर्वान् इन्द्रियादिगतान् मत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीरो धीमान्नशोचति। इद्रियाणां परस्पर वैलक्षण्यं स्वभावः। उत्पाद-विनाशौ च ज्ञानस्वरूपे आत्मनि न सन्तीति ज्ञात्वा न शोचतीत्यर्थः ॥६॥

इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम्।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७ ॥
अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वञ्चाधिगच्छति ॥ ८ ॥

टीका—देहेन्द्रियादिभ्यो भिन्नः प्रत्यगात्मेति ज्ञातेऽपि क्षेत्रज्ञानां भगवच्छरणागतिमन्तराऽन्योकोऽप्युपायो न दृश्यते। अतस्तामेव प्रतिपादयति इन्द्रियेभ्यइति। अस्य व्याख्यानं प्रागुपदर्शितरीत्यावसेयम्। सत्वं बुद्धिः। अधि, अधिकः ॥ ७ ॥

पुरुषं परमात्मानं विशिनष्टि। व्यापकेति अलिङ्गः लिङ्गागम्यः। प्राकृत शरीररहितोवा। परत्वञ्च वशीकार्यतायां विवक्षितम्। परस्य भगवतः वशीकरणं शरणागतिरेव यं सर्वेश्वरं भगवन्तमाचार्य्यतः शास्त्रतश्चज्ञात्वा जन्तुः जीवात्मा संसारात् मुच्यते। अमृतत्वञ्च भगवद्भावापत्तिरूपं मुक्तिं लभतइत्यर्थः ॥ ८ ॥

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।
हृदा मनीषा मनसाऽभिक्लृप्तः य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥

टीका—अस्य भगवतो रूपं दिव्यमङ्गलविग्रहं संदृशे दर्शनाय विषये अभिमुखतया न तिष्ठति यद्वा सन्दर्शनाय प्राकृत चक्षुषा सम्यक्दर्शन योग्यं न भवति। दिव्यं ददामि ते चक्षुः इति श्रीमुखवचनात् अथवा अस्यरूपसादृश्यं नीलपीतादिकं नास्ति अतएव न चक्षुषा प्राकृत-चक्षुषा एनं प्रकृतं परमात्मानं कश्चिदपि न पश्यति। चक्षुरित्यन्येन्द्रियोपलक्षणार्थम्। तर्हि किं सर्वथा ज्ञानाविषयः नेत्याह। हृदा प्रेम भक्त्या मनीषा धृत्या मनसा मननेनसम्यग्दर्शनेनाभिक्लृप्तोऽभिग्रहणसमर्थो भवति एतत् प्रकृतं ब्रह्म ये विदुस्तेऽमृताः मुक्ताः भगवद्भावं गता भवन्ति। श्रीबादरायणेन श्रीमहाभारते हृच्छब्दस्य भक्त्यर्थकत्वं मनीषेत्यस्य धृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपार्थत्वं भाषितं' तथाहि-"न सन्दृशे तिष्ठति रूपमस्य नचक्षुषा पश्यति कश्चनैनम्। भक्त्या च धृत्या समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह इति। धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं पश्यति। साक्षात्करोति। भक्तिरेवैनंवर्द्धयति भक्तिरेवैनंदर्शयति भक्तिवशः पुरुषः भक्तिरेवभूयसी। इत्याद्याः श्रुतयः शतशः सन्ति ताभिरिन्द्रचन्द्रब्रह्मरुद्रादिदुर्लभोऽपि भगवान् वासुदेवो रमाकान्तो भक्तिप्रपत्याव्यर्जिमाहात्म्येन शरणागत वत्सलत्वकारुण्यादिगुणविवशतया प्रपन्नभक्तानां सौलभ्यमितिप्रतिपाद्यते। "नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा। भक्त्या त्वनन्यया शक्य अहमेव विधोऽर्जुन। ज्ञातुं द्रष्टुञ्च तत्वेन प्रवेष्टुञ्च परन्तप" इति श्रीमुखवचनेनापि निश्चीयते केवल भक्ति ग्राह्यत्वं भगवत इति भावः॥ ९॥

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्॥ १०॥
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।
अप्रमत्तस्तदाभवति योगो हि प्रभवाप्ययौ॥ ११॥
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥ १२॥

टीका—यदा यस्मिन्काले ज्ञायते ज्ञेयमेभिरितिज्ञानानीन्द्रयाणि यञ्च स्वविषयेभ्यो निवृत्य आत्मन्येवावतिष्ठन्ते मनसा सह बुद्धिश्च अवध्यायलक्षणा स्वव्यापारेषु न विचेष्टते स्व व्यापारं न करोति तां परमां गतिमाहुः विषयान्तरसञ्चरणं विहाय मोक्षार्थ गमनं परमां गतिमाहुरित्यर्थः॥१०॥ तां पूर्व मन्त्रोक्तामिन्द्रियाणां वाह्याभ्यन्तरकरणानां स्थिरामचलां धारणां योगिनः योगमितिमन्यते। तदा तस्मिन्काले अप्रमत्तः प्रमादरहितो भवति। इन्द्रियाणां निर्व्यापारत्वे एवाव्यवहित चित्तता भवतीत्यर्थः। किमर्थं चित्तावधानमित्यत आह। योगइति। हि यस्मात् योगः प्रभवाप्ययौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इष्टप्रभवानिष्टनिवर्त्तकः योगस्य तत्साधनत्वात् तत्राप्रमत्तया भवित व्यमित्यर्थः ॥ ११ ॥

अस्तीत्येवोलब्धव्यस्तत्त्वभावेन चोभयोः ।

अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥ १३ ॥

टीका—नैव वाचा न मनसा न चक्षुषा नान्यैरपीन्द्रियैः प्राप्तुं ज्ञातुं शक्यः यद्दिवागादिना प्राप्तुमशक्यो भगवान् तर्हि केन प्रमाणेन वेद्य इत्यत आह। अस्तीति। अस्तीतिब्रुवतः शब्दादन्यत्रेत्यर्थः। तस्योपनिषदैकसमधिगम्यत्वं वाच्यमितिभावः ॥ १२ ॥

तत्वं भावयतीति तत्वभावो मनस्तेन परमात्माऽस्तीत ये वोपलब्धव्यः उपलभ्यते च वेदान्त वचनैर्ब्रह्मणोऽस्तित्वं तस्य दार्ढ्याय मनसाऽपि तस्यास्तित्वंप्रत्येतव्यमित्येवं मनननिदिध्यासने कार्ये। उभयोर्हेत्वोरुभाभ्यां शब्दमनोरूपाभ्यामस्तित्वेनोपलब्धस्य ज्ञातवतो भुक्ताब्राह्मण इतिवदयं निर्देशः।

तत्वभावो मनः प्रसीदति प्रसन्नं भवति शान्तरागादिदोषो भवतीत्यर्थः ॥ १३ ॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ १४ ॥

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ॥

अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥१५ ॥

टीका—यदा यस्मिन् काले अस्योपासकस्य हृदि श्रिताः कामाः सङ्कल्पास्ते सर्वे प्रमुच्यन्ते दुर्वासना उच्छिद्यन्ते। अथानन्तरमेव मर्त्यः मरणधर्मकोऽपि अमृतो भवति पूर्वोत्तराघरहितो भवति। अत्र दुर्व्यसन मोक्षपूर्वकमोक्षोपासने स्थित उपासको ब्रह्म समश्नुते ब्रह्मविषयकानवच्छिन्नानुभूत्यास्थितो भवतीत्यर्थः। "समानाचाऽऽसृत्युपक्रमादमृतवञ्चानुपोष्य।" ब्र० सू०।४।२ ।७॥ इत्यस्य सूत्रस्य भाष्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूज्यपादैः श्रीश्रीनिवासाचार्य्यचरणैर्भाषितं तथाहि। अमृतत्वञ्चानुपोष्येति। च शब्दोऽवधारणे। अनुपोष्यैव उष दाह इत्यस्य रूपम्। देहेन्द्रियादिसम्बन्धमदग्ध्वैवामृतत्वमुत्तरपूर्वाघाश्लेषविनाशरूपं यत्प्राप्यते तत्। यदा सर्वे प्रमुच्यन्त इति वाक्येनोच्यते। अत्र ब्रह्म समश्नुत इत्यस्यचानुभवेनोपासनाकालेब्रह्मसमश्नुते। इति।

उक्तार्थमेव विशदयति। यदा यस्मिन् काले हृत्स्थानमयत इति हृदयो जीवः तस्य ग्रन्थयःसर्वे यद्वा हृदयस्यान्तःकरणस्य ग्रन्थयः ग्रन्थिवद्दुर्मोचा देहे तत्सम्बन्धिषु अहन्ता ममतात्मकाः अनादिकर्मनिरूपितमायासम्बन्धाख्याः। कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु। इति श्रीमुखोक्तेः। ममेदं धनं स्त्री पुत्रादिकं सुखी दुःखी चाहं एवमादिरूपा इह जन्मनि प्रभिद्यन्ते भेदं प्राप्नुवन्ति। अथ मर्त्यः मरणधर्मा अमृतो भवति।

एतावदेवानुशासनमनुशासनीयमुपासकायोपदेशो वेदान्त वाक्यस्येत्यर्थः॥ १५॥

शतञ्चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विश्वङ्ङन्या उत्क्रमणे भवन्ति॥१६॥

टीका—हृदयस्य प्रधाननाड्यः शतं शतसङ्ख्याका, एका च सुषुम्ना नाम्नी तासां मध्ये एका प्रधाना सुषुम्णाख्या ब्रह्मनाडी मूर्द्धानमभिनिःसृता तया नाड्योर्ध्वं ब्रह्मलोकमायन् गच्छन् अमृतत्वं भगवद्भावापत्तिरूपां मुक्तिं प्राप्नोति। अन्यास्तु नाड्यो विश्वगुत्क्रमणे नानाविध संसारमार्गोत्क्रमणायोपयुज्यन्ते। इदञ्चवाक्यं भगवता बादरायणेनोत्क्रान्तिपादे आलोचितम्। तथाहि। तदेकोग्रज्वलनं तत्प्रकाशित द्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतः शताधिकतया। ब्र० सू० ४।२।१६॥ विवृतञ्चैतत् वेदान्तकौस्तुभे। शताधिकया मूर्द्धन्ययानाड्या विदुषोऽन्याभिरविदुषश्चनिष्क्रमणमित्येवंभूत उत्क्रान्तौ विदुषोऽस्ति न वेति सन्देहे नास्ति विशेषनाडीविशेषज्ञानाऽसम्भवात् इति प्राप्तेऽभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीयते। हार्दानुगृहीतइति। सर्वस्यचाहं हृदिसन्निविष्ट इत्येवम्भूतोहार्द: श्रीपुरुषोत्तमस्तेन स्वानन्यवशीभूतेन सर्वावस्थासु तदनुरूपविद्धयोग-दात्रानुगृहीतः। इयं सा नाडी ययोत्क्रम्य मम साधर्म्यं यास्यसीति प्रति-बोधित इत्यर्थः। ददामि बुद्धियोगं तं येन मामुपयान्ति ते। इति श्रीमुख वचनात्। तदनुग्रहादेव। स एतास्तेजोमात्राः समभ्याददानो हृदयमे वान्ववक्रामतीतिश्रुतिप्रोक्तं तस्य हार्दानुग्रहपात्रीभूतस्य विदुष ओकः स्थानमग्रज्वलनं भवति, अग्रेज्वलनं प्रकाशनं यस्येत्येवमनुकूलं भवति तत्प्रकाशित द्वारस्तेनैवाहार्देन प्रकाशितं द्वारं नाडीमूलं यस्मै स विद्वान् शताधिकया हृदयादुद्गतया मूर्द्धानं गतया सूर्यरश्मिभिरेकीभूतया नाड्यैव निष्कामति। भगवति वैषम्याभावं दर्शयन्ननुग्रहवीजमाह। विद्यासाम-र्थ्यात्। तच्छेष गत्यनुस्मृतियोगाच्च। विद्यापरिपाकजन्यवेद्य वशीकरण लक्षण वेतृसामर्थ्यात्। मम कदा अनया वेदान्तगीतया वेदान्तवेद्यप्रा-प्तिर्भविष्यतीति विद्याशेषस्मृत्यनुस्मृतियोगाच्च तेनानुगृहीत इत्यर्थः। तस्मा-द्विदुषो नाडीविशेषेणोत्क्रमणमिति सिद्धमिति ॥ १६ ॥

अङ्गुष्ठमात्रः पुरुषोन्तरात्मा सदाजनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रम-मृतं तं विद्याच्छुक्रममृतमिति ॥ १७ ॥

टीका—अङ्गुष्ठमात्रो जीवाङ्गुष्ठपरिमितः जनानां प्रत्यगात्मनां हृदये सदा सन्निविष्टोऽन्तरात्मा तं परमात्मानं स्वाच्छरीरात् परमात्म-शरीरभूताज्जनशब्दवाच्याच्चेतनात् प्रवृहेत् विविच्यजानीयात्। जुष्टं यदापश्यत्यन्यमीशम्। श्वै०।४।७। इतिश्रुत्युक्तरीत्यासर्वात्मत्वसर्व नियन्तृत्वसर्वव्यापकत्व स्वतन्त्रसत्वसर्वाधारत्वादिधर्मैः भिन्नं ब्रह्मात्म-कत्वतन्नियम्यत्व तद्व्याप्यत्वतत्तन्त्रासत्वपराधेयत्वधर्मैश्चाभिन्नञ्च जानी-यात् एषः सर्वभूतान्तरात्मा अन्तःप्रविष्टः शास्ता जनानाम्। यच्च किञ्चि-ज्जगत्यस्मिन् दृश्यते श्रूयतेऽपिवा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। आत्माहि परमः स्वतन्त्रोऽधिगुणः तस्मिंल्लोकाःश्रिता सर्वे सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओं शान्तिः शान्तिः शान्तिः ॥

इतिकाठकोपनिषदि द्वितीयोऽध्यायः ।

टीका—स विद्याप्रकाशितो भगवान् हेति प्रसिद्धयर्थे नौ शिष्याचार्य्यायाववतु स्वस्वरूपप्रकाशेन रक्षतु । सह नौ भुनक्तु, विश्लेषमन्तरेण आवां सहितावेव यथा स्यात्तथा पालयतु । यद्वा विद्याफलप्रदानेन नौ पालयत्वित्यर्थः ।

सह वीर्य्यं करवावहै सहैवावां विद्याकृतं वीर्य्यं सामर्थ्यं करवावहै, सनियमविद्याप्रदानेन विद्यायाः सामर्थ्यं निष्पादयावहै, किञ्च तेजस्वि नौ तेजस्विनोरावयोर्यदधीतं तत्स्वधीतमस्तु यद्वा तदतीव वीर्यवदस्त्वित्यर्थः ।

माविद्विषावहै, शिष्याचार्य्यौ परस्परमनवधानकृताध्ययनाध्यापननिमित्तद्वेषं मा करवावहै ।

यश्चाधर्मेण विब्रूते यश्चाधर्मेणपृच्छति । तयोरेकतरः प्रैति विशेषञ्चाधिगच्छति । इति स्मृत्युक्त दोषो माभूदावयोरित्यर्थः । ओं शान्तिः शान्तिः शान्तिः, त्रिवचनं मनोवचनशरीरभेदेन त्रिदोष शान्त्यर्थम् ।

अस्या उपनिषद अर्थः सङ्क्षेपेण समन्वयाध्याये व्यासाचार्यैस्त्रिभिरधिकरणैर्निरूपितः । अन्त्राधिकरणे यस्य ब्रह्मचक्षत्रञ्चेति विषय । वचनमुदाहृत्य अत्रोदनोपसेचनशव्दाभ्यां सूचितः कश्चिदत्ता प्रतीयते किं क्षेत्रज्ञः परमात्मा वेत्तेतिविमर्शः कृतः । तत्रभोक्तृत्वं कर्मनिमित्तम् । तथाच जीवस्यैवात्तृत्वं प्रतिपन्नं भवति न परमात्मन इति पूर्वपक्षं कृत्वा "अत्ता चराचरग्रहणात्" प्रकरणाच्च । गुहां प्रविष्टावात्मानौ हि दर्शयतः विशेषणाच्च । ब्र० सू० ।१।२।६।१०।११।१२ इति चतुर्भिः सूत्रैः सिद्धान्त कृतस्तथाहि अत्रात्ता परमात्मैव कुतः चराचर ग्रहणात् यस्य ब्रह्मचेति मन्त्रे चराचरशव्देन कृत्स्नस्य स्थावरजङ्गमात्मकप्रपञ्चस्य प्रति पादनात् सकल प्रपञ्चसंहर्तृत्वं विश्वोत्पत्तिलयकर्त्तुः परब्रह्मण एव सम्भवति न तु शारीरस्य । महान्तं विभुमात्मानं मत्वा धीरो न शोचति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमेवैष वृणुते तेन लभ्य इत्यादिमन्त्रैः परमात्मप्रकरणमध्यपठितैः निश्चीयते परमात्मैवात्ता न शारीरः। ननु ऋतंपिबन्तावित्युरमन्त्रे कर्मफलभोक्तृत्वप्रतिपादन्नपरमात्मात्ता किन्तु शारीर। एतन्मन्त्रप्रतिपाद्यानि ऋतपानकर्तृत्व सुकृतसाध्यमध्यमलोकवर्त्तित्व गुहावच्छिन्नत्व रूपाणि लिङ्गानि कर्मफलाभोक्तरिविभौ परमात्मनि नोपपद्यन्ते। अतोऽत्र प्रकरणेन परमात्मा प्रत्येतव्य इत्याशङ्क्य समाहितम्। गुहांप्रविष्टौ हि दुर्दर्शनादिति। क्षेत्रज्ञपरमात्मानावेव हृदयगुहां प्रविष्टौ प्रत्येतव्यौ यतः उभयोश्चेतनत्वेनेकस्वभावत्वात् तयोरेकस्मिन् प्रकरणे गुहाप्रवेशदर्शनात्। तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितमिति प्रकरणेऽस्मिन् प्रत्यगात्मपरमात्मनोरुपास्योपासकभावः प्राप्यप्रापकभाव गन्तव्यगन्तृत्वभावादिभिर्विशेषणत्वेन प्रतिपादनात्। ब्रह्मयज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति। यः सेतुरीजानानाम्। आत्मानं रथिनं विद्धि, विज्ञानसारथिर्यस्तु इत्यादि श्रुतिषु तयोरुपासनासौकर्यायेकाधिकरणस्थत्व प्रतिपादनार्थत्वादृतंपिबन्ताविति मन्त्रस्य जीवपरप्रतिपादकत्वमेव भाति। अतो यस्य ब्रह्म च क्षत्रञ्चेति मन्त्रः परमात्मपर एवेति निर्णीतम्।

तथाऽङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानोभूतभव्यस्य न ततो विजुगुप्सते॥ क० २।१।१२॥ इति मन्त्रेऽङ्गुष्ठमात्रतया निर्दिश्यमानो जीव एव। अङ्गुष्ठमात्रस्य जीवधर्मत्वात् 'प्राणाधिपः सञ्चरति स्वकर्मभिः' श्वे० ५।७ 'अङ्गुष्ठमात्रो रवितुल्यः' श्वे० ५।८। अङ्गुष्ठमात्रं निश्चकर्ष यमोबलात्। इति पूर्वपक्षं कृत्वा शब्दादेवप्रमितः। हृद्यपेक्षया तु मनुष्याधिकारत्वात्। ब्र० सू० १।३।२४,२५॥ कम्पनात्। ज्योतिर्दर्शनात्। ब्र० सू० ।१।३।३९, ४०॥ इति चतुर्भिः सूत्रैः सिद्धान्तः कृतः। तेषामर्थाः भाष्ये द्रष्टव्या। इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। क० १।३।१०। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः। क० १।३।११॥ इति वाक्ये साङ्ख्य प्रक्रिया प्रत्यभिज्ञानात् पञ्चविंशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खल्विदं ब्रह्म तज्जलानिति तत्वमसि श्वेतकेतो अहं भगवो देवते, एकमेवाद्वितीयम्। आत्मा वा इदमेक एवाग्र आसीत्। एको ह वै नारायण आसीदित्युभय विधश्रुतीनां भेदाभेदप्रतिपादकाना मुत्क्रमादि षड्लिङ्गोपेतानां तुल्य योगक्षेमत्वात् स्वार्थ एव प्रामाण्याच्च प्राबल्यमितरथैकतराणां श्रुतीनां वाधः प्रसज्येत तस्मादुक्तार्थो वरीयान्। उक्तार्थं दृष्टान्तेन परब्रह्मारूढं करोति। मुञ्जात् तृण विशेषात्। इषीकां तन्मध्यवर्त्ति स्थूलतृणविशेषमिव धैर्येण ज्ञानकौशलेनेति पूर्वेणान्वयः। तं विद्यादिति पूर्ववत्। द्विरुक्तिरुपदेश समाप्त्यर्था ॥ १७॥

एवं मृत्युप्रोक्तां विद्यां प्राप्तवता नचिकेतसा विद्याफलं लब्धमित्याह श्रुतिः।

मृत्युप्रोक्तां नाचिकेतोऽथलब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नं। ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योप्येवं यो विद्ध्यात्ममेव ॥ १८ ॥

टीका—नचिकेतएव नाचिकेतो मृत्युप्रोक्तामेतांविद्यामात्मविद्यां यदापञ्चेत्याद्युक्तं योगविधिञ्च लब्ध्वा प्राप्य ब्रह्म प्राप्तः आविर्भूतगुणाष्टकोऽभूदित्यर्थः। विद्याप्रतिपत्या विरजो विगतमायातत्कार्यं सम्बन्धाख्यरजो विमृत्युर्विगतजन्ममरणञ्चेत्यर्थः। य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेनरूपेणाभिनिष्पद्यत इति श्रुत्यनुसारेण सायुज्यप्राप्तिर्वोद्धव्या। न केवलं नचिकेता एव यः, अन्योप्यध्यात्मविद्यामात्मविद्यां वेत्ति सोप्येवमेव नचिकेता इवैव भवतीत्यर्थः ॥ १८ ॥

शिष्याचार्ययोः शास्त्रीय नियमातिलङ्घनेन विद्याग्रहणप्रतिपादन निमित्त दोषस्य प्रशमनार्थेयं शान्तिरधुनोच्यते।

सह नाववतु सह नौ भुनक्तु सह वीर्य्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिरिक्तपुरुषनिषेधाच्च साङ्ख्याभिमत ब्रह्मात्मकप्रधानमव्यक्तशब्दे-नाभिधीयत इति। आनुमानिकमप्येकेषामिति चेदिति सूत्रखण्डेन पूर्वपक्षं कृत्वा शरीररूपकविन्यस्त गृहीतेर्दर्शयति च। सूक्ष्मन्तु तदर्हत्वात्। तदधीनत्वादर्थवत्। ज्ञेयत्वावचनाच्च। वदतीतिचेन्न प्राज्ञो हि प्रकरणात्। त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। महद्वच्च। ब्र०सू०१।४।१, २, ३, ४, ५, ६, ७। इति सप्तभिः सूत्रैः सिद्धान्तः कृतः। तेषामर्था वेदान्तकौस्तुभे द्रष्टव्या। इयमुपनिषत्सर्वाऽपि परमात्मपरेति त्रिभिरधिकरणैर्निर्णीतम्।

अशेषरसिकचक्रचूड़ामणि श्रीस्वामि हरिदासपदाश्रिताश्रितानुगेना-मोलकरामेण पूर्वाचार्योक्ति द्वारा संगृहीतायां काठकोप-निषद् तत्वप्रकाशिकायां द्वितीयोऽध्यायः समाप्तः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीनिकुञ्जविहारिणे नमः

तत्वप्रकाशिकाटीकासंवलिता

प्रश्नोपनिषद्

श्रीराधावदनाम्भोजगतसौन्दर्यसौरभम् ॥
लिहद्भ्यां लोचनालिभ्यां श्रीकृष्णः पातु नो हरिः ॥१॥

अवलोकयन्निति शेषः ॥

श्रीनिम्बभानुमहं वन्दे स्वान्तध्वान्तनिरासकम् ॥
सन्मार्गस्योपदेष्टारं हंसवंश विभूषणम् ॥ २ ॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम्।
बादरायणसूत्राणां भाष्यकारं मुनीश्वरम् ॥ ३ ॥
नत्वान्यान् देशिकान् मान्यान् पूर्वाचार्योक्तितःखलु ॥
प्रश्नोपनिषदोव्याख्यां व्याकरिष्ये यथामति ॥ ४ ॥

अत्रादौ सुकेशा इत्याद्याख्यायिका विद्याप्रशंसया श्रोतॄणां श्रद्धातिशयजननार्था । यथा पूर्वेऽऽचार्य्याः वेदशास्त्रसम्पन्नाः भारद्वाज प्रभृतयः संवत्सरपर्य्यन्तसमीचीनब्रह्मचर्यानुष्ठानेन वक्ष्यमाणां ब्रह्मविद्यां लब्धवन्तस्तदनन्तरमतिप्रशस्तराजातस्तथास्माभिरप्येवं विधैर्भाव्यमिति स्मर्यते हि तत्वज्ञानोत्पत्तिं प्रति श्रद्धादीनां कारणत्वं श्रद्धावाँल्लभा ज्ञानमिति ॥

सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनः भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वै तत्सर्वं वक्ष्यामीति ते समित्पाणयो भगवन्तं पिप्पलाद-मुपसन्नाः ॥ १ ॥

टीक—सुकेशा नामतः भरद्वाजस्यापत्यं भारद्वाजः। शिवेरपत्यं शैयः सत्यकामो नामतः। सूर्यस्यापत्यं सौर्यस्तदपत्यं सौर्यायणिः। दीर्घः सुलोपश्च छान्दस इति स एव सौर्यायणी। गर्गस्य गोत्रो गार्ग्यः। कौशल्यो नामतः कोशलायां भवो वा। अश्वलायनस्यापत्यमाश्वलायनः। भृगोरपत्यं भार्गवः। विदर्भेषु भवो वैदर्भिः कबन्धि नामतः। कत्यस्यापत्यं कात्यायनः। इतरेतरयोगे च शब्दाः। त एते ह किल ब्रह्मपराः वेदाभ्यासे तातपर्य्यवन्तः ब्रह्मनिष्ठा। तदुक्तानुष्ठाननिष्ठामुनयः कदाचित्समवेताः परंब्रह्म वासुदेवमन्वेषमाणा जिज्ञासवो बभूवुरितिशेषः। ब्रह्मपरा इत्यादि। ब्रह्मजिज्ञासाधिकारि सम्पत्ति कथनम्। ततस्ते किलैष पिप्पलादो यद्वयं प्रक्ष्यामस्तत्सर्वं वक्ष्यति तस्मादेनं प्रति गच्छाम इति निश्चित्य समित्पाणयो भूत्वा भगवन्तं पूज्यं पिप्पलादमुपसन्नास्तत्समीपं प्राप्ताः। ह वै शब्दः पिप्पलादस्य प्रश्न प्रतिवचन सामर्थ्य प्रसिद्धि द्योतकः॥१॥

तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं सम्पत्स्यथ यथाक्रमं प्रश्नान् पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥ २ ॥

टीका—तानागतान्ह स ऋषिः पिप्पलाद उवाच। किमिति। यद्यपि यूयं प्रागेव तप आदि सम्पन्नास्तथापि भूयः पुनरेव तपसा सर्वेन्द्रियनिग्रहलक्षणेन विशेषतो ब्रह्मचर्य्येण श्रद्धया, आस्तिक्यनिष्ठया युक्ताः संवत्सरमेकमस्मान्परिचरन्तः सम्पत्स्यथ, सम्यग्वसत। ततो यथेष्ठं प्रश्नान्, प्रष्टव्यर्थान् पृच्छत। युष्माभिः पृष्टञ्च प्रतिवक्तुं यदि वयं विज्ञास्यामः। तर्हि सर्वं वो युष्मभ्यं वक्ष्याम इति नह्येवं सति अवचने कारणमस्तीति ह शब्दः॥ २॥

अथ कबन्धी कात्यायनमुपेत्य पप्रच्छ। भगवन् कुतो ह वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमाः प्रजाः प्रजायन्त इति तस्मै स होवाच प्रजाकामो ह वै प्रजापतिः स तपो तप्यत ॥ ३ ॥

टीका—अथ तदुक्त नियमानुष्ठानसमनन्तरं तेषां मध्ये कबन्धी कात्यायन उपेत्योपसदनं कृत्वा पिप्पलादं पप्रच्छ । क्रमादर्थक्रमोवलीयानिति पश्चादुक्तस्यापि कात्यायनस्य प्रश्नः प्रतिवचनञ्च प्रथममुक्तम् । एवमन्यत्रापिद्रष्टव्यम् ॥ तच्च क्रमं तत्रैव दर्शयिष्यामः । किमिति भगवन् कस्मात्कारणात् । पुरुषादि मा देवाद्याः सर्वाः प्रजा उत्पद्यन्त इति । ह वा इति प्रजानां प्रजननस्य सुप्रसिद्धिताद्योतकौ निपातौ । सुप्रसिद्धं तावत्प्रजानां प्रजननम् । कार्यं सहेतुकं कादाचित्कत्वात् प्रयोगेण कार्य्यस्य सहेतुकत्वं निश्चीयतेऽन्यथा सर्वत्र सर्वदा सर्वकार्योत्पादापत्तेः ।

नन्वस्तु तावत् प्रत्यगात्मनो विश्वं प्रति हेतुत्वम् । जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः ॥ जीवे प्रलयमिच्छिन्ति न जीवात्कारणं परमिति श्रुत्वा विशेषत्वेन विधानादिति चेन्न स देव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिना कारणस्यैकत्व प्रतिपादनात् । चेतनश्चेतनानामित्यादिना, अंशोनानाव्यपदेशादित्यादिना च प्रत्यगात्मनामनन्तत्वोक्तेर्जीवकारणवादे बहुत्व प्रसङ्गान्त जीवस्य कारणत्वं किन्तु हिरण्यगर्भः समवर्त्तताग्रे आदि कर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य गोप्त्रेति सर्व प्रसिद्धया च एकत्व पूर्वकारणत्व प्रतिपादनाच्चतुर्मुख एव जगत्कारणमित्यपि न तस्य पूर्ववर्तित्वासिद्धया कारणत्वस्याप्यसिद्धत्वात् ।

तथाहि नसन्नचासच्छिव एव केवल इत्यन्यनिषेधपुरस्कारेण पूर्ववर्त्तित्वं केवलत्वञ्चोच्यते । तथैव हिरण्यगर्भस्यावरत्वमपि हिरण्यगर्भं पश्यति जायमानमिति । अतः शिवस्यैव जगत्कारणत्वं निश्चीयत इतिचेन्न । तस्यापि कालादि पारतन्त्र्यात् तथाच ममापि कालो ग्रसत कुतः पुत्र । रसायनमित्यादिना स्कन्दं पुत्रं प्रति स्वयमेव त्रिलोचनेनोक्तत्वात् । कालं तथान्य इति श्रुतेः । तथा च षष्ठेंशे बादरायणः ॥ कालो भवाय भूताना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मभवाय च पाण्डव ॥ कालमिदं ज्ञात्वा भवस्थैर्यधरोऽर्जुन सृष्टाः कालेन कालेन पुन -ास्यन्ति संयमम् । कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहीति स्मृतेश्च काल एव जगद्धेतुर्भवत्विति चेन्न श्रुत्या कालवादिनां भ्रान्तत्व प्रतिपादनात् । 'कालं तथान्ये परिमुह्यमाना' इति तत्रैव स्वभाववादिनां विवेकित्व प्रतिपादनात् । स्वभावमेके कवयो वदन्तीति स्वभाव एव जगत्कारणमिति चेन्न यतः तन्मते च न कारण सापेक्षं कार्य्यम् । अपि स्वत एव तत्र पृच्छते स्वाभाविकं जगदिति प्रतिज्ञायां तत्साधको हेतुरस्ति न वेति । भावपक्षे स्वभाववाद हानिर्यत्तत्र साधनं हेत्वन्तरं तदेव तत्र मुख्यकारणं तस्य चोपचारिकत्वापत्तेः । द्वितीये हेत्वन्तराभावपक्षे मूकतापत्या प्रतिज्ञाभङ्गस्तस्मान्नस्वभावसिद्धिः । स्वतोऽभावरूपस्य गगनकुसुमायमानस्य भावात्मककार्योत्पादनेन कथमपि सामञ्जस्य स्यात् । नहि शशविषाणादीनां कार्योत्पादनं कुत्रापि दृष्टं श्रुतं वा तस्मान्नाभावस्यापि जगत्कारणत्वं नापीश्वरस्तदनुपलभ्भादिति प्रष्टुराशयः । प्रकृतमनुसरामः तस्मै पृष्टवते कात्यायनाय स पिप्पलादः किलोत्तरमुवाच किमिति । प्रजानां ब्रह्मादीनां पतिः पालकः । परमेश्वरः कल्पादौ किलात्मनः प्रजाकामो देवादि प्रजावत्वमात्मन इच्छन्नवर्तत । अथ सर्वज्ञोऽपि लोकविडम्बनाय तपोऽतप्यत कर्त्तव्यमन्वालोचयत् ॥३॥

स तपस्तप्त्वा मिथुनमुत्पादयते रयिञ्च प्राणञ्चेति ।
एतौ मे बहुधा प्रजा करिष्यत इति ॥ ४ ॥

टीका—आलोचित कार्यश्च स प्रजापतिर्मिथुनं स्त्रीपुरुषरूपं द्वंद्वमुत्पादयते । उत्पादयत् किन्तत् । रयिं प्रकृतिं प्राणं पुरुषम् । सर्वाः प्रजाः सिसृक्षुः । परमात्मा कथं तावुत्पादयदिति एवं मन्यतेस्म प्रजापतिः एतौ रयिप्राणौ मम बहुविधाः प्रजाः करिष्यत इति ॥ ४ ॥

रयिप्राणयोरर्थं व्याचष्टे ।

आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः रयिर्वा एतत्सर्वं
यन्मूर्तश्चामूर्तश्च तस्मान्मूर्त्तिरेव रयिः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—आदत्त इत्यादित्यास्तस्य भोक्तृत्वेन प्राण शब्दवाच्यत्वम् । रयिरेव चन्द्रमाः भोग्यवर्गः । सोमत्वाभिधाने वक्तुः किन्तात्पर्य्यमित्यतस्तंदर्शयति । रयिर्वेति । मूर्त्तं पृथिव्यप्तेजो लक्षणम् । अमूर्त्तं वाय्वन्तरीक्षम् । मूर्त्तामूर्त्ते भोक्तुरन्नरूपे भोग्य इत्यर्थः । सर्वस्यापि पाञ्चभौतिक शरीरस्य मूर्त्त शब्दाभिधेयस्य भोग्यत्वेन रयित्वमित्याह तस्मादिति ॥ ५॥

अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते। यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरादिशो यत्सर्वं प्रकाशयति तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते ॥ ६ ॥

टीका—अथ, रयिनिरूपणानन्तरम् आदित्यो निरूप्यत इति शेषः । आदित्यशब्देन विवक्षितस्य भोक्तुः प्राणशब्दवाच्यत्व कथमिति जिज्ञासायामाह । उदयन्निति अयं प्रत्यगात्मा सुषुप्तिस्थानात् उदयन् प्रबुद्ध्यमानः सर्वाः दिशः प्रकाशयन् तत्तद्दिग्वर्त्तीन्द्रियाणि धर्मभूतज्ञानाख्य रश्मिद्वारा बिभर्ति तत एव प्राण शब्द वाच्येन्द्रियाधिष्ठातृत्वात् प्रत्यगात्मा प्राण शब्दत्वेनात्र व्यवाहृतः प्राचीं दिशं प्रविशति प्रकाशयति । प्राग्दिगवर्त्ति पदार्थानुपलभत इति यावत् । तेन, तस्माद्धेतोः । प्राच्यान् प्राणान् । रश्मिषु सन्निधत्ते प्राग्दिवर्त्यर्थप्रकाशक चक्षुरादीन् प्राणान् धर्मभूतज्ञानाख्य रश्मिमुखेनाधितिष्ठति प्रेरयति । नहि कुठारादयः छिदा साधनभूताः कर्त्तारमन्तरेण फलोपधायको एव भुवन्निरूपाद्युपलब्धौ करणभूताश्चक्षुरादयस्तदधिष्ठातृत्व लक्षण कर्त्तारमन्तरेण कार्य्यं जयितुं न क्षमन्ते। अचेतनस्य चेतनाधिष्ठितस्यैव कार्यजनकत्व नियमादिति भावः ॥ एवं दक्षिणां दिशं प्रविशतीति यत्तेन दाक्षिणात्यान् प्राणान् स्वरश्मिषु सन्निधत्त इत्यादि योज्यम् दिशोन्तरा दशदिशां मध्ये । यत्सर्वमिति निगमम् ।

अत्र प्रजाः सिसृक्षुः भगवान् प्रथमं प्रकृतिं पुरुषं ससर्जेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्तव्ये प्रागुपदर्शितरीत्या परोक्षरूपेणाभिधानं तस्य रहस्यत्व सूचनाय परोक्ष प्रियाहि देवाः। (ऐत० १।३) इति श्रुत्या गोप्यार्थस्य स्फुटतरोपदेशानर्हत्वादित्याशयः ॥ ६ ॥

प्राणादित्य शब्देन निर्दिष्टस्य भोक्तृवर्गस्य ब्रह्मात्मकतामुपदिशति।

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते तदेतद्द चाऽभ्युक्तम् ॥ ७ ॥

टीका—स एषो भोक्ता प्राणः वैश्वानरः। विश्वेषां नराणां नेतृत्वेन वैश्वानर शब्द वाच्य परमात्माऽभिन्नः ब्रह्मात्मकत्वेन तन्नियम्यत्वेन च सर्वात्मत्वेन सर्वनियन्तृत्वादिना च भिन्नश्च वैश्वानररूपं परमात्मानं विशिनष्टि। विश्वरूप इति सर्वशरीरतया विश्वरूपपदवाच्यः। स एवाग्रनेतृत्वादिगुणयोगेनाग्निः स परमात्मा भोक्तृत्वेनरूपेणोदयते। तदेतद् ब्रह्म विश्वरूपमितिं मन्त्रेणाऽभ्युक्तं स्पष्टमुक्तमतो दृढ़तर प्रतिपत्तव्यमित्यर्थः ॥ ७ ॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः प्राणःप्रजानामुदये स सूर्यः ॥८॥

टीका—विश्वरूपं सर्वशरीरम्। जातवेदसं जातस्य सर्वस्य वेदितारम्। परायणं सर्वप्राणिनां परमाश्रयं ज्योतिः प्रकाशकम्। एकमद्वितीयम्। तपन्तं जाठराग्न्यादिरूपेण तपन्तम्। संतापयति स्वं देहमापादतलमस्तकम् ॥ 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' गी० १५।१४। इति श्रुतिभ्याम्। हरिणं हरिम्। हरिशब्दस्य नान्तत्वं च्छान्दसम्। सहस्ररश्मिरनन्तरश्मिः सूर्य इव प्रकाशकः प्रजानाम्, भूतानां प्राणः धारकः। एषः पुरुषः। शतधाऽनेकधा प्राणिभेदेन वर्त्तमानः सर्गकाल उदयत इत्यर्थः ॥ ८ ॥

रयिशब्दप्रतिपाद्या प्रकृतिर्भोग्यरूपा प्राणशब्दोदितपुरुषः भोक्तेति विभागं निरूप्य सम्प्रति सर्वोत्पत्ति निमित्तकारणं संवत्सरादिलक्षणं कालं तदवान्तरभेदोत्तरायणादिकं रयिप्राणरूपं विभागं दर्शयति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणञ्चोत्तरञ्च । तद्ये ह वै तदिष्टापूर्त्ते कृतमित्युपासते ते चान्द्रमसं लोकमभिजयन्ते । त एव पुनरावर्तन्ते ॥ तस्मादेके ऋषयः प्रजाकामाः दक्षिणं प्रतिपद्यन्ते । एष वै रयिर्यः पितृयाणः ॥ ९ ॥

टीका—संवत्सराख्यकालरूपस्य प्रजापतेरयने मार्गौ द्वौ दक्षिण-ञ्चोत्तरञ्च । द्वे प्रसिद्धे ह्ययने षण्मासलक्षणे याभ्यां दक्षिणेनोत्तरेण च याति सविता केवलकर्मिणां लोकान् विदधत् तथा च कर्मिणां लोकं विधातुं तयोर्दक्षिणोत्तराभ्यां गमनात्तन्निमित्तत्वाच्चायनद्वयप्रसिद्धिरिति-भावः । तत् तत्र साधकेषु मध्ये ये ऋषयः प्रजाकामाः इष्टं यागादिकं पूर्त्तमन्नदानादिकं कृतमन्यच्च कर्मेत्युपासतेऽनुतिष्ठन्ति त एते दक्षिणं पितृयाणं प्रतिपद्यन्ते प्रतिपन्नाश्च ते चान्द्रमसमेव लोक मभिजयन्ते प्राप्नुवन्ति। त एव पुनः स्वकर्मावसाने चान्द्रमसाल्लोकादावर्त्तन्ते ह वै । ह वा इति प्रसिद्धौ । एष एव पितृयाणः । रयिरन्नप्रधानः वैषयिकभो-गात्मक इति यावत् । अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते । वापीकूपतटाकादि देवतायतना-नि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति इष्टापूर्तयोर्भेदः ॥९॥

अथोत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्ययात्मानमन्वि-ष्याऽऽदित्यमभिजयन्ते ॥ एतद्वै प्राणानामायतनमेतदमृतमभय-मेतत्परायणमेतस्मान्नपुनरावर्त्तन्त इत्येष निरोधस्तदेषश्लोकः॥१०॥

टीका—मार्गान्तरारम्भार्थोऽथशब्दः । ये संसारात् विरक्ताः पुमांसः तपसेन्द्रियजयेन विशेषतो ब्रह्मचर्येण स्त्रीसङ्गराहित्यलक्षणेन श्रद्धयाऽऽस्तिक्यबुद्धिलक्षणया विद्यया प्रत्यगात्मविद्यया परमात्मान-मुपास्यादित्यमभिजयन्ते । अर्चिरादिनोत्तरेणायनेनादित्याच्चन्द्रमसं चन्द्रमसो विद्युतम् । तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति । छा० ५।१०।३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्तप्रकारेण ब्रह्माग्निद्वारभूतमादित्यमभिजायन्ते प्राप्नुवन्तीत्यर्थः। यस्मादेतद्देवयानप्राप्यं परं ब्रह्म प्राणानां प्राणभूतानामायतनमाधारभूतम्। एतत परायणं परमं प्राप्यम्। एतदमृतमविनाशि। अभयमतएव भयवर्जितम्। एतस्मान्न पुनरावर्त्तन्ते उपासका इति शेषः। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते। गी० ८।१६। इत्युक्तरीत्या भगवन्तं प्राप्य न निवर्त्तन्ते। एष निरोधः। एष प्रजापतिशब्दनिर्दिष्टः परमात्मा स्वप्राप्तस्य पुनरावृत्तिनिरोधकारी। अतः प्रजापतिशब्दितं परमात्मानं प्राप्तस्य तदुपासकस्य न पुनरावृत्तिरुपपद्यत इतिभावः। तत्र तस्मिन्नर्थ एष श्लोकः वक्ष्यमाणमन्त्रः सम्मतित्वेन भवति ॥१०॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणम्। अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥११॥

टीका—हेमन्तशिशिरयोरैक्येन पञ्चर्तवः पादा अंशा यस्य तं पञ्चपादं पितरं जनानां पोषकं द्वादश मासा आकृतयोऽवयवा यस्य तं दिवः द्युलोकात् परे परस्मिन्नर्धे स्थाने पुरीषमुदकं तदस्यास्तीति पुरीषिणं वर्षणहेतुम् अथशब्दः पक्षान्तरपरिग्रहार्थकः। तेभ्योऽन्ये परे उत्कृष्टाः कालतत्वविदो सप्तचक्रे सप्तहयरूपेण चक्रे सततं गतिमति कालात्मनि षडरे षडृतुमति जगत्सर्वं विचक्षणं निपुणं निश्चलं यथा भवति तथाऽर्पितमित्याहुः ॥११॥

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेत ऋषयः शुक्ल इष्टं कुर्वन्तीतर इतरस्मिन् ॥१२॥

टीका—संवत्सराख्यकालरूपस्य प्रजापते रयिप्राणात्मना विभागं प्रदर्श्य प्रजापतिरूपमासस्य विभागं विवृणोति मास इति। मासो वै प्रजापतिर्यथोक्तलक्षणस्तस्य मासात्मनः प्रजापतेरेको भागः कृष्णपक्षो रयिरन्नं चन्द्रमा अपरो भागः शुक्लः शुक्लपक्षः प्राणः। यस्माच्छुक्लः प्राणत्वेनोत्कृष्टरतस्मादृषयः मन्त्रद्रष्टारः सर्वेऽपि इष्टं योगं कुर्वन्ति इतरे तरस्मिन् कृष्णपक्ष एव कुर्वन्ति ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः ।
प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ॥
ब्रह्मचर्य्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते ॥ १३ ॥

टीका--अहोरात्रो वै प्रजापतिस्तस्याहोरात्रात्मकस्य प्रजापतेरह एव प्राणः रात्रिरेव रयिः। ये दिवाऽहनि रत्या रतिकरणभूतया सह स्त्रिया संयुज्यन्ते मैथुनमाचरन्ति त एते प्राणमहरात्मानं प्रस्कन्दन्ति निर्गमयन्ति शोषयन्ति वा । यद्रात्रौ संयुज्यन्ते रत्या ऋतौ ब्रह्मचर्यमेव तदिति प्रशस्तमेतदृतौ स्वभार्यागमनमित्यर्थः ॥ १३ ॥

ननु प्रकृतिपुरुषकालात्मकस्य परब्रह्मणः कथं जगदुत्पादनकारणत्वमन्नपरिणामभूतस्य रेतस एव प्रजोत्पादकत्वदर्शनादित्याशङ्कायामाह ।

अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः
प्रजायन्त इति ॥१४॥

टीका--अन्नावस्थं तदुत्पन्नरेतोऽवस्थं च प्रजापतिशब्दवाच्यं ब्रह्मैवातः प्रकृतिपुरुषसंवत्सरमासकालान्नात्मकाद्ब्रह्मणः सर्वाः प्रजाः प्रजायन्ते इति मीमांसितम् ॥ १४ ॥

संसारासक्तजननिन्दापूर्वकं विरक्तं मुमुक्षुं स्तौति ।

तद्ये ह वै प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते ॥
तेषामेवैष ब्रह्मलोको ॥ येषां तपो ब्रह्मचर्य्यं येषु सत्यं
प्रतिष्ठितम् ॥१५॥ तेषामसौ विरजो लोको न येषु
जिह्मनृतं न माया चेति ॥ १६ ॥

इति प्रश्नोपनिषदि प्रथमः प्रश्नः ।

टीका—तत्तस्माद्येऽन्नं वै प्रजापतिरिति प्रजापतिशब्दप्रतिपाद्यस्यान्नस्य व्रतं भक्षणमनुतिष्ठन्ति ते ब्रह्मचर्यहीना एव मिथुन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तपाद्यन्ते तेषामेष लोकः पुत्रपश्वन्नादिलक्षणः लोकः। येषां कायशोषणाख्यं तपो न भक्षणशीलता मैथुनवर्जनं येषु सत्यवचनं प्रतिष्ठितं येषु जिह्मं कौटिल्यमनृतमसत्यवचनं माया विप्रलिप्सा इत्यादयो दोषा न सन्ति तेषामिति सम्बन्धः। विरजोनिर्दोषो ब्रह्मैव लोकः॥ तथैव भगवता बादरायणेन सर्वव्याख्यानाधिकरणे विवृतत्वादिति द्रष्टव्यम्॥ इति शब्दः प्रतिवचनसमाप्तिद्योतकः॥ १५, १६॥

इति प्रश्नोपनिषत्तत्वप्रकाशिकायां टीकायां
प्रथमः प्रश्नः॥ १॥

द्वितीयः प्रश्नः

देहेन्द्रियमनःप्राणादिभ्यो व्यतिरिक्तः प्रत्यगात्मा इति प्रतिपादनाय प्रश्नानवतारयति॥

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजां विधारयन्ते कतर एतत्प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति॥ १॥

टीका--कवन्धिप्रश्नानन्तरं हैनं पिप्पलादं महर्षिं भार्गवो वैदर्भिः पप्रच्छ पृष्टवान्। हे भगवन् कतरे कियत्सङ्ख्याका देवाः स्थावरजङ्गमात्मिकां प्रजां विधारयन्ते विशेषेण धारयन्ते। एतेषु कतरे देवा एतच्छरीरं तत्कार्यं प्रकाशयन्ते कोऽसौ पुनरेषां वरिष्ठः प्रधानः॥ १॥

तस्मै स होवाचाऽऽकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रञ्च ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—एवं पृष्टवते तस्मै स होवाच । ह वा इति प्रसिद्धय-तिशये । एष प्रसिद्ध आकाशः । देवो गमनशीलः प्रसिद्धो वायुरग्निरापः पृथिवी पञ्चमहाभूतानि शरीरारम्भकाणि । वाक्पदोपलक्षितानि कर्मेन्द्रियाणि चक्षुःश्रोत्रपदेन ज्ञानेन्द्रियाणि । ते आकाशादयः देवाः सर्वे मिलिता आत्मनो माहात्म्यं प्रकाश्याभिवदन्ति स्म । किमिति । वयं बाणवत्सञ्चारशीलमेतत्पुरोवर्ति शरीरमवष्टभ्यावलम्ब्य विस्पष्टं धारयाम इत्यर्थः ॥ २ ॥

तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्च धात्मनं प्रविभज्यैतद् बाणमवष्टभ्य विधारयामीति । तेऽश्र-द्दधाना बभूवुः ॥३॥

टीका—तानेवमभिमानवतो वरिष्ठो मुख्यः प्राण उवाचो-क्तवान् मामैवं मोहमापद्यथाविवेकितयाभिमानं मा कुरुत यस्मादहमे-वैतद्बाणं पुरोवर्ति शरीरमवष्टभ्याहमेव स्वात्मानं पञ्चधा विभज्य धार-यामिइत्युक्तवति च तस्मिंस्तेऽश्रद्दधाना अप्रत्ययवन्तो बभूवुः कथ-मेतदिति ॥ ३ ॥

सोऽभिमानादूर्ध्वमुत्क्रामत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिँश्च प्रतिष्ठमाने सर्व एव विप्रतिष्ठन्ते । तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिँश्च प्रतिष्ठमाने सर्वा एव विप्रतिष्ठन्त एवं वाङ्मनश्च-क्षुःश्रोत्रं च ते प्रीताः प्राणं स्तुवन्ति ॥४॥

टीका—स मुख्यप्राणस्तेषां प्रत्यायनायाभिमन्यत इत्यभिमानो देहस्तस्मादूर्ध्वमुत्क्रामत इव किञ्चिदूर्ध्वमुदक्रामत् । अथ तस्मिन् प्राण उत्कामति सतीतरे सर्व देवाः शरीरधारणादौ स्वस्थितौ चासमर्था उत्क्रामन्ते उदक्रामन् । अस्य यादृच्छिकत्वपरिहाराय पुनस्तस्मिन् प्राणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिष्ठमाने शरीर एव विप्रतिष्ठति सर्व एव देवाः शरीरे विप्रतिष्ठन्ते प्रतिष्ठिताः। तत्र निदर्शनम्। तत् तत्र लोके यथा मधुमक्षिका मधुकराः मधुकरराजानं प्रधानमधुमक्षिकां मधुस्थानादुत्क्रामन्तीमुत्क्रामन्ते तस्याञ्च प्रतिष्ठितायां स्वयं सर्वा एव तत्र विप्रतिष्ठन्ति एवं वागादयो देवा इति। इत्थमन्वयव्यतिरेकाभ्यां प्राणस्य वरिष्ठत्वेऽवधारिते प्रीतास्ते देवास्त्वमेव सर्व दिवादिषु स्थित्वा तन्नामा तद्गुणक्रियादिप्रवर्तक इति प्राणं स्तुवन्ति। अस्तुवन्। तदुच्यते ॥ ४ ॥

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष
पृथिवी रयिर्देवः सदसच्चामृतश्च यत् ॥ ५ ॥

टीका—एष मुख्यप्राणोऽग्निरूपेण तपति। एष प्राण एव सूर्यः। सर्वेषां प्राणसत्तास्थितिकत्वात्। यदधीना यस्य सत्ता तत्तदेवेति भण्यत इति रीतिमनुसृत्य सामानाधिकरण्यव्यपदेशो द्रष्टव्यः। रयिर्देवश्चन्द्रमा इति यावत्। सदसच्छब्दौ चेतनाचेतनपरौ स्थूलसूक्ष्मपरौ वा। अमृतपदेन भगवद्भावापत्तिरूपा मुक्तिरुच्यते तस्या अपि तदधीनत्वात् ॥ ५ ॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।
ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च ॥ ६ ॥

टीका—आराः चक्रस्य मध्यदेशो नेमिस्तस्य नेमेरन्तरालवर्तीनि काष्ठानि। यथा आरा रथनाभौ अर्पिता एवं प्राणे सर्वं प्रतिष्ठितम्। सर्वशब्दार्थं विशदयति। ऋच इति तथर्चो यजूंषि सामानीति त्रिविधा मन्त्रास्तत्साध्यश्च यज्ञः क्षत्रं सर्वस्य पालयितृ ब्रह्म च यज्ञादिकर्तृत्वाऽधिकृतम्। इदमुपलक्षणम् तेन सर्वस्य स्थावरजङ्गमात्मकप्राणिमात्रस्य ग्रहणम् ॥ ६ ॥

परोक्षतया स्तुतः प्राणोऽपरोक्षतया स्तूयते।

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—यः प्रजापतिः प्रजानां रक्षकः स त्वमेव। गर्भे प्राणादिरूपेण चरसि पश्चात् पितुः मातुश्च सदृशः सन् प्रतिजायसे हे प्राणेमा देवाद्याः प्रजास्तुभ्यं त्वदीयाः यद्यस्मात् त्वं प्राणैश्चक्षुरादिभिः सह धारणादिकं कुर्वञ्छरीरे प्रतितिष्ठसि तस्माद् बलिमन्नादिकमुपहरन्ति ॥७॥

देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा।
ऋषीणां चरितं सत्यमथर्वाङ्गिरसामपि ॥८॥

टीका—देवानामिन्द्रादीनां वह्नितमो यज्ञभागवाहकतमोऽसि पितृणां प्रथमा स्वधा। स्वधा पितृभ्यो देयमन्नं तस्या अपि वाहकस्त्वमेवासि। त्वमेवाथर्वाङ्गिरसामृषीणां चरितमाचारः सत्यवचनञ्चासि ॥८॥

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता।
त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥९॥

टीका—इन्द्रः परमेश्वरस्त्वं हे प्राण, तेजसा सर्वसंहारलक्षणेन त्वं रुद्रः। स्थितौ च परिसमन्ताद्रक्षिता परिपालयिता त्वमेव जगतः। त्वमन्तरिक्षेऽजस्रं चरसि उदयास्तमयाभ्यां सूर्यस्त्वमेव च सर्वेषां ज्योतिषां पतिः ॥९॥

यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः।
आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥१०॥

टीका– हे प्राण यदा त्वं पर्जन्यरूपोऽभिवर्षसि। अथ तदा ते त्वदीया इमा मानुषादिप्रजाः। कामाय यथेष्टमन्नं भविष्यतीति निश्चित्यानन्दरूपा आनन्दवत्यस्तिष्ठन्ति ॥१०॥

व्रात्यस्त्वं प्राणैकर्षिरत्ता विश्वस्य सत्पतिः।
वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥११॥

टीका—हे प्राण त्वं व्रात्यः, संस्काररहितः, ब्रह्मणोऽपि एकः मुख्यो मन्त्रद्रष्टर्षिरसि विश्वस्यात्ता संहर्त्ता च त्वमेव सतां साधूनां पती रक्षकोऽसि त्वमेव। वयं तवाद्यस्य भोज्यस्य दातारस्त्वत्पूजकाः। कुतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हे मातरिश्व मातरिश्वन्। त्वं नोऽस्माकं पितासि। मातरिश्वन इत्यत्र नकारद्वित्वाश्रवणं छान्दसत्वाद् द्रष्टव्यम ॥११॥

याते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि।
या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः ॥१२॥

टीका—एवं स्तुत्वा प्रकृतमुच्यते या त इति। या ते त्वदीया तनूः मूर्त्तिर्वाचि प्रतिष्ठिता। या श्रोत्रे या च चक्षुषि या च मनसि सन्तता सम्यग्व्याप्य वर्त्तमाना एवमन्येष्वपि तत्त्वेषु या प्रतिष्ठिता तां शिवां शान्तां कुरु। मोत्क्रमीः वागादिभ्यस्तथोत्क्रमणं मा कार्षीः ॥१२॥

प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्।
मातेव पुत्रान् रक्षस्व श्रीश्च प्रज्ञां विधेहि न इति ॥१३॥
इत्यथर्ववेदीयप्रश्नोपनिषदि द्वितीयः प्रश्नः ॥२॥

टीका—वागादिषु प्राणस्य प्रतिष्ठितत्वम् कुतः ? यत एतत्सर्वं वागादिकं प्राणस्य तव वशे वर्त्तते। न त्वां विना प्रवर्तितुं क्षमम्। न केवलमध्यात्मं त्वदधीनं किन्तु त्रिदिवे स्वर्गे यत्प्रतिष्ठितम्। अधिदैवादिकञ्चेति यावत् तदपि प्राणाधीनम्। वागादिषु स्थित्वा च त्वमस्मान् पुत्रानिव रक्षस्व पालय श्रीः श्रियं प्रज्ञां प्रज्ञानं प्रकाशकत्वं शक्तिञ्च नोऽस्माकं विधेहि कुर्विति स्तुवन्तीतिसम्बन्धः ॥१३॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकाटीकायां द्वितीयः प्रश्नः ॥२॥

---*---

अथ तृतीयः प्रश्नः ॥३॥

अथ हैनं कौशल्यश्चाऽऽश्वलायनः पप्रच्छ। भगवन् कुत एष प्राणो जायते कथमायात्यस्मिन् शरीर आत्मानं वा प्रविभज्य कथं प्रतितिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—अथ हैनं कौशल्यश्चाश्वलायनः पप्रच्छ। भगवन् कुतः कस्मात्पुरुषादेष उक्तलक्षणः प्राणो जायते कथं कस्मात् कारणादस्मिञ्छरीरे प्राण आयाति प्रवर्त्तते आत्मानं प्रविभज्य च कथं प्रतिष्ठते प्रतितिष्ठति। के ते विभागास्तैश्च किङ्कुर्वन् कुत्र स्थानविशेषे तिष्ठतीति यावत्। तस्मिन्नुत्क्रान्ते सर्वेप्युत्क्रान्ता इत्युक्तम्। तत्र केन प्रविभागेन जीवादीनादायोत्क्रामति प्राणस्य वशे सर्वं यत्त्रिदिवे प्रतिष्ठितमित्युक्तं तत्र केन प्रकारेण वाह्यमधिभूतादिकमभिधत्ते धारयति। कथञ्चाध्यात्ममभिधत्ते ॥ १ ॥

तस्मै स होवाचाति प्रश्नान् पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ॥ २ ॥

टीका—इत्येवं पृष्टवते तस्मै स होवाच। यस्मादेव त्वमतिप्रश्नान् प्रश्नायोग्यात्रहस्यार्थान् पृच्छसि तस्मात्त्वं ब्रह्मिष्ठो वेदविचारवानसि नह्यन्यथैवंविधाः प्रश्नाः सम्भवन्ति। यस्मात्त्वं ब्रह्मिष्ठोऽसि तस्मादहं तत्तुभ्यमुत्तरं ब्रवीमि ॥ २ ॥

इत्येवं प्रशस्याद्यप्रश्नोत्तरमुच्यते—

आत्मन एवैष प्राणो जायते यथैषा पुरुषे छायैतस्मिन्नेतदाततम्। मनोऽधिकृतेनाऽऽयात्यस्मिन्शरीरे ॥ ३ ॥

टीका—एष एवंमाहात्म्योऽपि प्राणः। आत्मनः परमात्मनः सकाशाज्जायते। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।' मुं०२।१।३।इति श्रुतेरिति द्रष्टव्यम्॥ कस्मात् कारणादस्मिञ्छरीरे प्राण आयातीति प्रश्नस्योत्तरमाह यथैषेति। यथैषा छाया पुरुषे आतता अत्यन्तं शरीराधीना वर्त्तते एवमेवैतस्मिन्पुरुषे जीव एतन्मनोऽकृतेनायत्नेन यत्नमन्तरेणाततमविनाभावेन संश्रितमेवं प्राणोप्यकृतेनायत्नेनास्मिञ्छरीर आयाति। मनःप्राणयोः पुरुषच्छायावत्पुरुषाऽविनाभूतत्वात्। पुरुषेण सहैव प्राणस्य सम्बन्धो न प्राणगमने पृथक्कारणमपेक्षितमितिभावः॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मानं प्रविभज्य कथं प्रतिष्ठित इति तृतीयप्रश्नस्योत्तरं निर्वक्ति ।

यथा सम्राडेवाधिकृतान्विनियुङ्क्ते । एतान् ग्रामानेतान् ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते ॥ ४ ॥

टीका—यथा लोके सम्राट् सार्वभौमोऽधिकृतानुयोगिनो विनियुङ्क्ते । कथं ? त्वमेतान् पाटलिपुत्रादीन् ग्रामानधितिष्ठस्व तदाधिपत्येनातिष्ठस्वेत्येकम् । अन्यञ्च त्वमेतान् कौशाम्बीप्रभृतीन् ग्रामानधितिष्ठस्वेति । एवमेव मुख्यप्राण इतरान् भिन्नानात्मनो ज्ञातत्वादात्मप्रविभागान् प्राणान् वायून् पृथक् पृथगेव स्थानेषु सन्निधत्ते स्थापयति । स्वयञ्च तत्तत्क्रियाप्रवर्तकतया तत्र प्राणादिपञ्चरूपोऽवतिष्ठते । तथाच प्राणादिपञ्चकस्य मुख्यप्राणनियोज्यत्वेन भिन्नत्वं तदधीनस्थितिप्रवृत्तिकत्वेनाभिन्नत्वमिति सिद्धान्तितमितिभावः ॥ ४ ॥

पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतिष्ठते मध्ये तु समानः ॥ एष ह्येतद् भुक्तमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥ ५ ॥

टीका—पृथक् पृथगित्युक्तं विव्रियते । पायूपस्थ इत्यादिना पायुश्चोपस्थश्च पायूपस्थम् तत्र मलादेरपनयनादपानं वायुमात्मनो रूपेणापानेनाधिष्ठितं सन्निधत्त इति सम्बन्धः । चक्षुश्च श्रोत्रञ्च चक्षुःश्रोत्रं तस्मिन् मुखनासिकाभ्यां सह मुखे नासिकायाञ्चेति यावत् । प्राणः स्वयं मुख्य एव श्वासादिप्रणयनात् प्राणनाम्ना रूपेण प्राणवायुमधिष्ठाय विप्रतिष्ठति । समानस्तु समाननामानं वायुमधिष्ठाय मध्ये प्राणापानयोर्नाभिदेश इति यावत् प्रतितिष्ठति तदधिष्ठाता । स चैष यस्मादेतद् भुक्तमन्नं समं यथा तथा शरीरावयवं नयति तेन समाननामेति शेषः । किन्तेन । तस्मादन्नस्य समीकरणादेताः सप्तार्चिषः सप्तज्ञानेन्द्रियवृत्तयो भवन्ति ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदि ह्येष आत्मा अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्याँ द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥ ६ ॥

टीका—एष प्रत्यगात्मा हृदि हृदये यत्र समानरूपेण प्राणस्तिष्ठति तत्र स्वयमपि वर्त्तते। अत्र अस्मिन् हृदये यदेतदेकशतमेकोत्तरशतं नाडीनां प्रधाननाडीनां भवति। तासां नाडीनां मध्ये एकैकस्यां नाड्यां शतं शतं प्रतिशाखानाड्यो भवन्ति पुनस्तासाञ्च प्रतिशाखानाड्यो भवन्तीति वक्तव्यम्। एवञ्च सम्भूय प्रतिशरीरं तासां प्रतिशाखानाडीनां द्वासप्ततिसहस्राणि जानीयात्। प्रतिशाखानाडीसहस्राणां द्वासप्ततिमिति द्वितीया षष्ठ्यर्थे योजनीया। किञ्चातः। आसु नाडीषु व्यानो व्यानवायुमधिष्ठाय चरति ॥ ६ ॥

व्यानस्य प्रवृत्तिं वक्तुमुच्यते।

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकम् ॥ ७ ॥

टीका—अथोदानस्तूदानवायुमधिष्ठायैकया नाड्या सुषुम्नयोर्ध्वगतिश्चरति। स तत्र चरन् पुण्येन जीवकृतं पुण्यं निमित्तीकृत्य पुण्यं स्वर्गादिलोकम्। अतएवोर्ध्वनयनादुदानः। पापेन पापं नरकादिकं दुःखबहुलं लोकं नयति। उभाभ्यां समप्रधानाभ्यां पुण्यपापाभ्यां समदुःखसुखं मनुष्यलोकं नयति। एतेन केनोत्क्रामत इति चतुर्थप्रश्नस्योत्तरमुक्तं भवति ॥७॥

कथं बाह्यमित्यादिप्रश्नद्वयं परिह्रियते।

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः। पृथिव्यां या देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा यदाकाशः स समानः वायुर्व्यानः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—चक्षुषि भवं चाक्षुषं प्राणं प्रकाशेनानुगृह्णानः रूपोपलब्धौ चक्षुष आलोकं कुर्वन् बहिरादित्यरूपेणोदेति प्राणादित्ययोः प्राणत्वेनादित्यत्वेन रूपेण भेदः। प्राणाधीनत्वेन प्राणात्मकत्वादभेदः पृथिव्यां प्राणकलादेवता सैषा पुरुषस्यापानवृत्तिमवष्टभ्याकृष्य वशीकृत्याध एवापकर्षणेनानुग्रहं कुर्वती वर्त्तते। यदेतदन्तरा मध्ये द्यावापृथिव्योर्यः आकाशस्तत्स्थो वायुराकाशः स समानः समानमनुगृह्णानो वर्त्तते। समानस्वान्तराकाशस्थत्वसाम्यात्। सामान्येन यो बाह्यो वायुः स व्याप्ति सामान्याद् व्यानः व्यानमनुगृह्णानो वर्त्तत इति भावः॥ ८॥

तेजो ह वा उदानस्तस्मादुपशान्ततेजाः।
पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः॥ ९॥
यच्चित्तस्तेनैष स प्राणमायाति प्राणस्तेजसा युक्तः
सहात्मना यथासङ्कल्पितं लोकं नयति॥ १०॥

टीका—तेजो ह वेति। बाह्यं तेज उदान उन्नयनहेतुत्वात्. यस्माद्धेतोस्तेजस एवोदानशब्दितोन्नयनहेतुत्वं तस्मादेवोपशान्ततेजाः अपगतदेहौष्ण्यः संमुमूर्षुर्जीवो यच्चित्तो यस्मिंश्चित्तं यस्य स यच्चित्तः यत्काम इति यावत्। देवतिर्यगादिशरीरकामो भवति तत्कामनावशेन पुनर्भवं जन्मान्तरं लब्धुं वाङ्मनसि सम्पद्यते। वाङ्मनसिदर्शनाच्छब्दाच्च। ब्र० सू० ४।२।१। इति श्रुतिसूत्राभ्यां मनसा सह संयोगमापन्ने वागादिभिरिन्द्रियैः सहितं प्राणं संमुमूर्षुर्जीव आयाति। प्राणस्तेजसोदानेन युक्तः परमात्मना सह जीवं यथासङ्कल्पितं तेन जीवेन मरणकाले यादृशः सङ्कल्पितः स्मृतस्तथाविधं लोकं नयति प्रापयति। ततश्च तेजसा सहितस्य प्राणस्योन्नयनहेतुत्वात्तेजसोऽप्युन्नयनहेतुत्वेनोदानत्वं युक्तमितिभावः॥ ९, १०॥

एवम्भूतप्राणोपासकस्य फलमुच्यते।

य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति। तदेष श्लोकः॥ ११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—यो विद्वानेवमुक्तलक्षणं प्राणं वेद विजानाति उपासते इति यावत्। नास्योपासकस्य प्रजा हीयते। अविच्छिन्नसन्तानो भवति परिशुद्धप्रत्यगात्मस्वरूपज्ञानपूर्वकब्रह्मोपासनप्रीतिद्वाराऽमृतः मोक्षहेतुश्च भवति ॥११॥

उत्पत्तिमायतिं स्थानं विभुत्वञ्चैव पञ्चधा। अध्यात्मञ्चैव प्राणस्य विज्ञायामृतमश्नुते। विज्ञायामृतमश्नुत इति॥१२॥

इत्यथर्ववेदीयप्रश्नोपनिषदि तृतीयः प्रश्नः ॥३॥

टीका—उत्पत्तिं प्राणस्य परमात्मनः सकाशात्। आयतिं मनसा सहागमनमस्मिञ्छरीरे। स्थानम् पायूपस्थस्थानेषु स्थितिं विभुत्वं यथा सम्राडेवाधिकृतानित्युक्तं साम्यलक्षणम्। अध्यात्मं प्राणादिरूपेण पञ्चधा स्थितिम्। चशब्देनादित्यादिरूपेण पञ्चधा बाह्यावस्थानयोः परिग्रहः। एतत्सर्वं विशेषेण ज्ञात्वाऽमृतं मोक्षमश्नुते प्राप्नोति ॥ द्विरुक्तिः प्रतिवचनसमाप्तिबोधनाय ॥१२॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिकायां तृतीयः प्रश्नः ॥३॥

अथ चतुर्थः प्रश्नः

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन् जाग्रति। कतर एष देवः स्वप्नान् पश्यति कस्यैतत्सुखं कस्मिन्नु सर्वे प्रतिष्ठिता भवन्ति ॥१॥

टीका—भगवन्नेतस्मिन् पुरुषे शरीरिणि स्वपति सति कानि स्वपन्ति स्वव्यापाराडुपरमन्ते। कानि अस्मिन् पुरुषे स्वपिति सति जाग्रति स्वव्यापारं कुर्वन्ति। सर्वेषामुपरमे शरीरावस्थानासम्भवात्। सर्वेन्द्रियाणामुपरतत्वादेष देवः जीवः कतरः कीदृशः सन् स्वप्नान्पदार्थान् पश्यति। कस्यैतत्सुखं कस्य हेतोरेतद्वैषयिकं सुखम्। एते सर्वे कस्मिन् प्रतिष्ठिताः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मै स होवाच यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्ति ताः पुनः पुनरुद्यतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति तेन ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयति न स्पृशति नाभिवदते नाऽऽदत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥२॥

टीका—एवं पृष्टवते तस्मै स होवाच। हे गार्ग्य यथार्कस्यास्तमदर्शनं गच्छतः सतः सर्वा एव मरीचयः सर्वेऽपि रश्मयः एतस्मिन् दृश्यमाने तेजोरूपमण्डले एकीभवन्ति। तत्रैकीभूता इव दृश्यन्ते। प्रकाशनादिव्यापारादुपरमन्त इति यावत्। ताः पुनस्ते तु रश्मयोऽर्कस्य पुनरुद्यतः सतः प्रचरन्ति। तस्मान्मण्डलान्निर्गत्य लोके प्रचरन्त्य इव दृश्यन्ते स्वस्वव्यापारं कुर्वन्तीति यावत्। एवं खल्वेतत्सर्वमिन्द्रियदेवता जातं परे इतरेभ्य उत्कृष्टे देवे द्योतनादिगुणयुक्ते मनस्येकीभवति। तेन श्रोत्रादीन्द्रियदेवतानामुपरतत्वेन पुरुषो न शृणोति। न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नेयायते न गच्छति। स्वपितीत्याचक्षते। एतेकानि स्वपन्तीति प्रश्नस्य समाधानमुक्तं भवति बाह्यज्ञानेन्द्रियकर्मेन्द्रियाणि स्वपन्तीत्युक्तत्वात् ॥२॥

कानि जाग्रतीत्यस्योत्तरमाह।

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः ॥३॥

टीका—स्वप्नवत्सु बाह्यकरणेष्वेतस्मिन् नवद्वारे पुरे देहे प्राणाग्नयः जाग्रति शरीरधारणरूपस्वव्यापारं कुर्वन्ति। कथं तेषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मग्न्यादित्वमिति उच्यते। गार्हपत्य इत्यादि। तेषां प्राणानां मध्ये एषोऽपानो गार्हपत्यः। गार्हपत्यसदृशः। सादृश्यञ्च पश्चिमत्वेन। व्यानोऽन्वाहार्यपचनो दक्षिणाग्निः। होमाङ्गत्वसाम्यात्। यस्माद्गार्हपत्यादाहवनीयः प्रणीयते। प्राणोऽप्यपानात् तस्मात्प्रणयनात् प्रणयनसाम्यात् प्राण आहवनीयः ॥३॥

यदुच्छ्वास निश्वासावेतावाहुती समं नयति स समानः। मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति ॥४॥

टीका--यद्यस्मात् द्वायेतौ उच्छ्वासनिश्वासौ त एवाहुती समं यथाकालं नयति। तस्मादाहुत्योः समं नयनसाम्यात्समानः सोऽध्वर्युरिति यावत्। तत्र मननान्मनो जीवो यजमानः। पराधीनफलप्राप्तिसाम्यादित्युत्तरार्थं वचनम्। उदान इष्टफलम्। यज्ञफलप्रतिपादक उद्गातेति यावत्। फलप्रतिपादकत्वसाम्यात्। कथमुदानस्य फलप्रतिपादकत्वं स उदानो ह्येनं यजमानं जीवमहरहः प्रतिदिनं सुषुप्ताविति यावत्। ब्रह्म सुषुम्नागतं गमयति प्रापयति ॥ ४ ॥

कतर एष देवः स्वप्नान् पश्यतीत्यस्योत्तरमाह।

अत्रैष देवः स्वप्ने महिमानमनुभवति यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टञ्चादृष्टञ्च श्रुतञ्चाश्रुतञ्चानुभूतञ्चाननुभूतञ्च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ॥ ५ ॥

टीका--अत्रैतस्यामवस्थायां मनइन्द्रियोपरम इति यावत्। एष देवो जीवः स्वप्ने महिमानमात्मनो महत्त्वमन्यच्चानुभवति तत्र च यमर्थं पश्यति तं प्राग्दृष्टमेवानुपश्यति यः प्राक्श्रुतस्तं श्रुतमेवार्थं शब्दं स्वप्ने शृणोति एवमन्यदप्यनुभूतमेवानुभवति नाननुभूतम् किमस्मिन्नेव देशेऽनुभूतमेवानुभवति ? नेति किन्तु देशान्तरे दिगन्तरे च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्प्रत्यनुभूतं पुनः पुनरनुभूतं तदेव स्वप्ने पुनः पुनः प्रत्यनुभवति। नाप्यस्मिन्नैव जन्मन्यनुभूतमनुभवतीति नियमः किन्त्वन्यस्मिन् जन्मनीति। दृष्टमदृष्टञ्च जन्मान्तरे दृष्टम्। एवमुत्तरत्रापि। अनुभूतमननुभूतमिन्द्रियान्तरेण। सत् विद्यमानञ्चानुभवति। असत् अविद्यमानञ्चानुभवति सर्वः पश्यति स्वयञ्च सर्वोऽनेकप्रकारः सन् सर्वं पश्यति। बाह्यकरणानामुपरतव्यापारत्वात् स्वाप्निकैरीश्वरसृष्टैः शरीरेन्द्रियैर्द्रष्टृत्वादिमान् सन्ननुभवतीतिभावः ॥५॥

चतुर्थं परिहर्त्तुमुच्यते।

स यदा तेजसाऽभिभूतो भवति। अत्रैष देवः स्वप्नान् पश्यति अथ यदैतस्मिञ्छरीर एतत्सुखं भवति ॥६॥

टीका--स्वप्ने वर्त्तमानः स जीवो यदा तेजसा परमात्मनाऽभिभूतो भवति सम्पन्नो भवति सम्परिष्वक्तो भवतीति यावत् तदा स्वापान् पदार्थान् न पश्यति मनसोप्युपरतत्वान्न जीवः स्वप्नान् पश्यतीति यावत्। एतेन कतरो देवः स्वप्नान्पश्यतीति प्रश्नस्योत्तरमुक्तं भवति मनोमात्रपरिशेषसमये स्वाप्निकानर्थान् पश्यति प्रत्यगात्मा न ब्रह्मसम्पत्तिसमये। कस्मै तत्सुखं भवतीत्यस्य प्रश्नस्य समाधानमाह। अथेति। प्रत्यगात्मनो यत्सुखं भवति तदेतस्मिन् शरीरे सत्येव भवति। शरीरमेव वैषयिकसुखहेतुरित्युक्तं भवति ॥ ६ ॥

कस्मिन्नर्थे सर्वे प्रतिष्ठिता भवन्तीत्यस्योत्तरमाह।

स यथा सोम्य वयाँसि वासो वृक्षं सम्प्रतिष्ठन्ते।
एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते ॥ ७ ॥

टीका--सोम्य सोमार्ह तत्र दृष्टान्तः। यथा वयांसि पक्षिणो वासो यत्रात्मनो निवासःतं वृक्षं सम्प्रतिष्ठन्ते। अभिगच्छन्ति तमाश्रित्य तिष्ठन्ति। एवं खल्वेतत्सर्वं पृथिव्यादितत्त्वजातं परे ब्रह्मणि वासुदेवे सम्प्रतिष्ठते तदाधारमेव वर्त्तते ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वशब्दार्थं प्रपञ्चयति ।

पृथिवी च पृथिवीमात्रा च आपश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यश्च श्रोत्रश्च श्रोत्रव्यश्च घ्राणश्च घ्रातव्यश्च रसश्च रसयितव्यश्च त्वक् च स्पर्शयितव्यश्च वाक् च वक्तव्यश्च हस्तौ चादातव्यश्चोपस्थश्चानन्दयितव्यश्च पायुश्च विसर्जयितव्यश्च पादौ च गन्तव्यश्च मनश्च मन्तव्यश्च बुद्धिश्च बोद्धव्यश्चाहङ्कारश्चाहंकर्त्तव्यश्च चित्तञ्च चेतयितव्यञ्च तेजश्च विद्योतयितव्यञ्च प्राणश्च विधारयितव्यञ्च ॥ ८ ॥ एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः स परेऽक्षर आत्मनि सम्प्रतिष्ठते ॥ ९ ॥

टीक—पृथिवीत्यादिना पञ्चमहाभूतान्युचन्ते पृथिवीमात्रा चेत्यादिनागन्धादिपञ्चतन्मात्राः चक्षुश्चेत्यादिनादशेन्द्रियाणि द्रष्टव्यमित्यादिनारूपादितद्विषया मनइत्यादिनान्तःकरणपञ्चकं मन्तव्यञ्चेत्यादिना तद्विषयाः तेजश्शब्देन चेतना गृह्यते प्राणो मुख्यो धारकस्तेन विधारयितव्यं पृथिव्यादिकं सर्वम् अतश्चोपपन्नं तस्य सर्वाश्रयत्वमिति । कथं सर्वस्वं तदधीनत्वमित्युच्यते । एष हीति । चक्षुरादीनामेतषामेष हि दर्शनादिशक्तिप्रदः अत्र बोद्धा कर्त्ता विज्ञानात्मेतिनिर्देशादात्मनो ज्ञातृत्वमेव न ज्ञानरूपत्वमिति वदन्तस्तार्किकाश्च ज्ञानत्वमेव न ज्ञातृत्वमिति वदन्तो मायावादिनश्च निरस्ता भवन्ति ॥ ८, ९ ॥

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति । तदेष श्लोकः ॥ १० ॥

टीका—स विज्ञानात्मा पुरुषो यादृश लक्षणमेतमेव विधमच्छायं ज्ञानसङ्कोचकं कर्म छायाशब्देनोच्यते अच्छायमपापम् अतएवाशरीरम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राकृतशरीररहितम्। तस्मादेवालोहितम्। लोहितादिरूपरहितं शुभ्रं शुद्धम्। प्राकृतरूपाद्यभावेऽपि अप्राकृतशुभ्रादिरूपयुक्तं वा अतएवाक्षरं न क्षरतीति क्षरणशून्यं। हे सोम्य यो वेदयते विजानाति स सर्वज्ञः सर्व-प्रधानस्य सर्वकारणस्य च परिज्ञानात्सर्वज्ञो भवति। सर्वस्याऽपि कर्मादेर्ज्ञानस्य फलं परमात्मज्ञानं प्राप्तमनेनेति वा। उपासकः स्तूयते तत् सर्वं भवति तदेष श्लोक इति तद् ब्रह्माभिमुखीकृत्यैवैष श्लोकः ॥१०॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानिसम्प्रतिष्ठन्ति यत्र।
शुभ्रमक्षरं वेदयते यस्तु।
सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ११ ॥

इत्यथर्ववेदीय प्रश्नोपनिषदि चतुर्थः प्रश्नः ॥ ४ ॥

टीका—विज्ञानात्मा विज्ञानस्वरूपो जीवः प्राणाश्चक्षुरादयः तद्विषया रूपादयश्च भूतानि पृथिव्यादीनि तन्मात्राश्च सर्वैः देवैरभिमानि-सूर्याद्यैः सह यत्र यस्मिन्नक्षरे ब्रह्मणि संप्रतिष्ठन्ति तदेतदक्षरं वेदयते विजानाति यः पुरुषः सोम्येति कस्यचित्सम्बुद्धिः स उक्तप्रकारेण सर्वज्ञः सर्वं परं ब्रह्माविवेशाविष्ट एव ध्रुवमाविशत्येवेति ॥ ११ ॥

इति प्रश्नोपनिषत्तत्त्वप्रकाशिका टीकायां चतुर्थः प्रश्नः ॥ ४ ॥

अथपञ्चमःप्रश्न

अथ हैनं शैब्यः सत्यकामः पप्रच्छ ॥
स यो ह वैतद्भगवन्मनुष्येषु प्रयाणान्तमोङ्कारमभिध्यायीत।
कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच ॥ १ ॥

टीका—भगवन्नेतेषु मनुष्येषु स यो यः कश्चित् प्रयाणान्तं प्रयाण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्य्यन्तं यावच्छरीरादुत्क्रमणं तावदिति यावत्। ओङ्कारमोमित्याक्रियमाणं परमात्मानमभिध्यायीत सर्वदा चिन्तयेदोमितिमन्त्रेणेत्यभिप्रायः। स पुरुषस्तेन ध्यानेन कतमं लोकं जयति प्राप्नोतीत्येवं पृष्टवते तस्मै स होवाच पिप्पलादः ॥ १ ॥

एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारः।
तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥ २ ॥

टीका—यदोङ्कारः तदेतत् परञ्चापरञ्च ब्रह्म यस्मात् प्रणवो मुख्यतः परमात्मनः प्रतिपादकः। यस्माच्च तत्प्रतिमानत्वेनमुख्यविरञ्च प्रतिपादकश्च तस्माद्विद्वान् प्रणवेनोपासकः एतेनैवोपासनाख्येनायतनेन गमनसाधनेन। परापरब्रह्मणोरेकतरमन्वेति प्राप्नोति ॥ २ ॥

स यद्येकमात्रमभिध्यायीत स तेनैव सम्वन्दितस्तूर्णमेव जगत्यामभि सम्पद्यते। तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥ ३ ॥

टीका—अकारोकारमकाराख्यांशत्रययुक्तो हि प्रणवः। तत्र स उपासको यद्येकमात्रमेकामात्रा वाचिका यस्य तं परमात्मानं प्रणवेनाभिध्यायीत कामप्येकामेव मात्रां सम्यग्विदित्वा इतरे अविज्ञायेति यावत्। तर्हि स उपासकस्तेनैव ध्यातेन परमात्मना सम्वेदित एहीति सम्बोधित इव देहपातानन्तरं क्षिप्रमेव जगत्यां पृथिव्यामभिसम्पद्यते जन्मनेतिशेषः। कथं कीदृशं जन्मेति। तमुपासकमृचः ऋग्वेदाभिमानिदेवताः पृथिव्यां मनुष्यलोकं मनुष्यशरीरं द्विजाग्र्यलक्षणमुपनयन्ते प्रापयन्ति। स च तत्र जन्मनि तपसाऽनशनादिना ब्रह्मचर्येण मैथुनवर्जनेन श्रद्धयास्तिक्यबुद्ध्या सम्पन्नस्तत्फलरूपं महिमानमनुभवति ॥ ३ ॥

अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते। देवलोकम् ॥ स सोमलोके विभूतिमनुभूय पुनरावर्त्तते ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—अथ यदि द्विमात्रेणापरब्रह्मवाचकेन प्रणवेन यस्य मनसि अपरब्रह्मध्यानं सम्पद्यते सङ्गतो भवति। तर्हि स उपासको यजुर्भिर्यजुर्वेदाभिमानिदेवताभिरन्तरिक्षस्थं सोमलोकमुन्नीयते नीतश्च। स तत्र सोमलोके विभूतिमैश्वर्य्यमनुभूय पुनरावर्त्तते ततश्च्यवते ॥ ४ ॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत। स तेजसि सूर्ये सम्पन्नः। यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः ॥ ५ ॥

टीका—यत एव तस्माद्यस्तु पुरुष एतं पुरुषं त्रिमात्रेण तिस्रोमात्रा अपि सम्यग्विदित्वेति यावत्। ओमित्यक्षरेण परमात्मानमभिध्यायीत स ध्याता ध्येयं परमेश्वरमपरोक्षीकृत्य तेजोरूपे सूर्ये सम्पन्नस्तं प्राप्तो भवति। सूर्य्यं प्राप्य चासौ यथा पादोदरः सर्वस्त्वचा जीर्णया विनिर्मुच्यते। एवं खलु स ध्यानी पाप्मना प्रारब्धेन विनिर्मुक्तो भवति। विधूतपापश्च सामभिः सामाभिमानिदेवताभिः ब्रह्मलोकं सत्याख्यमुन्नीयते स उपासकः एतस्मात्सत्यलोकपतेर्जीवघनाज्जीवसारात्सकलजीवोत्तमाद्विरञ्चात् परात्परमुत्तमोत्तमं पुरिशयं सकलजीवशरीरेषु शयितं पुरुषं पूर्णं वासुदेवमीक्षते। भगवानितिशब्दोऽयं तथा पुरुष इत्यपि निरुपाधित्व च वर्तते वासुदेवे सनातन इति स्मृतिवचनमनुसन्धेयम्॥५॥

तिस्रो मात्रा २ युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः। क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः ॥६॥

टीका—तिस्रोऽकाराद्याः प्रणवमात्रा। अनविप्रयुक्ताः। विप्रयुक्ता न भवन्तीत्यविप्रयुक्ताः न अविप्रयुक्ता अनविप्रयुक्ता विप्रयुक्ता एवेत्यर्थः। अन्योन्यसक्ताः परस्परं युग्मतया सम्बद्धाः। बाह्याभ्यन्तरमध्यमासु तारमन्द्रमध्यमरूपासूच्चारणक्रियासु प्रयुक्ता उच्चारिता मृत्युमत्यो भवन्ति ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरावृत्तिफलं प्रापयन्तीत्यर्थः। तासु सम्यक् प्रयुक्तासु तिस्रोऽपि सम्यग् ज्ञात्वोच्चारितासु सतीषु योगाभिज्ञः पुमान् न कम्पते न च्यवते। अपुनरावृत्तिफलं प्राप्नोति।

एतदर्थ विवरणार्थो द्वितीयो मन्त्रः।

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वदन्ति। तमोङ्कारेणैवाऽयतनेनान्वेति विद्वान् यत्तच्छान्तमजर-ममृतमभयं परञ्चेति ॥ ७ ॥

इत्यथर्ववेदीय प्रश्नोपनिषदि पञ्चमः प्रश्नः ॥ ५ ॥

टीका—एकमात्रज्ञानपूर्वकोपासनादृग्भिरेतं पृथिव्याख्यं मानुषं लोकमुपासको नीयते। द्विमात्राज्ञानपूर्वकोपासनाद्यजुर्भिरन्तरिक्षं तत्रत्यं सोमलोकं नीयते। यत्तत्कवयः सूरयो वेदयन्ते जानन्ति ज्ञापयन्ति वा परात्परं ब्रह्म यत्तच्छान्तं सुखोत्कर्षसीमाभूमिरूपम्। अजरं जरादिवर्जितं परात्परं सर्वोत्तमं तं तद्ब्रह्मोंकारेणैवायनेन अयनं साधनमोंकारं मात्रा-त्रयात्मकं सम्यग् ज्ञात्वेति यावत् सामभिरन्वेतीति। इति शब्दो वाक्य-परिसमाप्त्यर्थः ॥ ७ ॥

इति प्रश्नोपनिषत्तत्वप्रकाशिकाटीकायां पञ्चमः प्रश्नः ॥ ५ ॥

अथ षष्ठः प्रश्नः ॥

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ भगवन् हिरण्यनाभः कौशल्यो राजपुत्रो मामुपेत्यैनं प्रश्नमपृच्छत्। षोडशकलं भारद्वाज पुरुषं वेत्थ इति। तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति। समूलो ह वा एष परि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं स तूष्णीं रथमारुह्य प्रवव्राज तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥

टीका—प्रष्टव्यार्थेऽतिशयित बुभुत्सां स्वस्य ज्ञापयितुं पूर्ववृत्तान्त कथनम्। भगवन् हिरण्यनाभो नामतः कोशलायां भवः कौशल्यः कस्यचिद्राज्ञः पुत्रो मामुपेत्य प्राप्य एनं वक्ष्यमाणं प्रश्नं प्रष्टव्यमर्थमपृच्छतापृच्छत्। हे भारद्वाज षोडशकलो नाम कश्चित् पुरुषोऽस्तीति सामान्यतो मया श्रुतं तं षोडशकलं पुरुषं त्वं वेत्थ विशेषतो जानासि किं? कोसौ पुरुषः क चास्ते का नाम षोडशकलाः कथञ्च तस्य षोडशकलात्वमित्यादि। यदि च जानासि तं तर्हि मह्यं ब्रूहीति एवं पृष्टवन्तं कुमारं पूर्ववयसि वर्त्तमानं। हिरण्यनाभमहमब्रुवम्। अहमिमं त्वया पृष्टं षोडशकलं पुरुषं न वेद न जानामि। कुतः यद्यहमिमं पुरुषमवेदिष विदितवानहम भविष्यं तर्हि कथं कस्माद्योग्याय ते तुभ्यं नावक्ष्यमिति। अतो नाहमिमं वेद। किञ्च यः पुरुषोऽनृतमभिवदति। स एष समूलः परिशुष्यति वै। सर्वात्मनागतसारो भवति। तेनार्जितं समस्तमपि सुकृतं नश्यतीति यावत्। यत एवं तस्माज्ज्ञात्वापि न जानामीत्यनृतं वक्तुं दोषज्ञोऽहं नार्हामि नार्हो भवामीत्येवमनेकप्रकारतः प्रत्यायितः सलज्जया तूष्णीं किमप्यवदन् रथमारुह्य प्रवव्राज। यथागतं तथा गतवान्। एवं तदाप्रभृति ज्ञातव्यतया मम हृदि वर्त्तमानं पुरुषं त्वां पृच्छामि किमिति असौ षोडशकलः पुरुषः क्वास्ते कश्चासौ षोडशकलः काश्च ताः कलाः कथञ्च षोडशकलः पुरुष इत्यादि ॥ १ ॥

इति पृष्टवते तस्मै स होवाच।

तस्मै स होवाच इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥ २ ॥

टीका—प्राणाद्याः षोडश संख्याकाः कला इहैवेति। हे सोम्य यस्मिन् पुरुषे, एता वक्ष्यमाणाः प्राणाद्याः षोडश सङ्ख्याकाः कलाः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवस्य शरीरस्य भोगाः प्रभवन्ति यस्मादुत्पद्यन्ते यस्मिंश्च प्रविष्टा भवन्ति मुक्ताः सत्यो यमाश्रित्य वर्त्तन्ते। अनेन षोडशकलत्वं तस्य कथमिति परिहृतं भवति स पुरुषः परमात्मा इहैवन्तःशरीरे हृदयपुण्डरीकाकाशमध्ये आस्ते नावश्यं तद्दर्शनाय दूरं गन्तव्यमित्यभिप्रायः ॥२॥

यस्मिन्नेताः षोडशकलाः प्रभवन्तीत्युक्तं प्रपञ्चयते।

स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि।
कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्मलोका लोकेषु नाम च ॥४॥

टीका—स पुरुषः कल्पादौ कलाः सृजानीतीक्षांचक्रे चिंतितवान् पुनश्च कस्मिन् पुरुषे शरीरादुत्क्रान्तेऽहमुत्क्रान्तो भविष्यामि। कस्मिन् वा तत्र प्रतिष्ठितेऽहमपि प्रतिष्ठास्यामि प्रतिष्ठो भविष्यामि। कोऽनु मद्वशीकरणक्षमभक्तिज्ञानादिसम्पन्नो यं निमित्तीकृत्याहं कलाः सृजानीत्येवमीक्षित्वा तादृशः प्राणेति निश्चित्य स पुरुषः प्राणमसृजत। प्राणात् प्राणं निमित्तीकृत्य श्रद्धां जीवस्यास्तिक्यनिष्ठामसृजत्। ततःखं वायुर्ज्योतिरापः पृथिवीत्येतानि शरीरोपादानभूतानि इन्द्रियं चक्षुरादिप्रवृत्तावुपकरणं मनः प्रधानकारणम्। अन्नं तत्स्थितिकारणं तस्माच्चान्नादन्नं निमित्तीकृत्य वीर्यं शरीरहेतुभूतं तपो जीवस्य ज्ञानदिहेतुतया सुखसाधनं मन्त्राः ऋगादिवेदाः सम्यग् ज्ञानादिहेतुवः कर्म पुण्यापुण्यलक्षणं सुखादिनिमित्तं लोकाःगोलका इन्द्रियाश्रयीभूताः। नाम च देवदत्तादय इत्येताः कलापुरुषेण सृष्टा इत्यर्थः ॥ ३, ४॥

स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्यंते चासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणा पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—स दृष्टान्तः यथा लोके इमा नद्यः स्यन्दमानाः स्रवन्त्य. समुद्रायणाः समुद्रायनं गतिरात्मभावो यासां ताः समुद्रात्मिकाः समुद्रात् पृथक् स्थितिप्रतिपत्तिका भूत्वा समुद्रं प्राप्याऽस्तं गच्छन्ति अदर्शनं यान्ति तासां नदीनां नामरूपे गङ्गायमुनाइत्यादिलक्षणे भिद्येते विनश्यतः । तदेव दर्शयति समुद्र इत्येवं प्रोच्यते । तथास्य परिद्रष्टरनुभवितुर्जीवस्य भोगोप करणभूता इमाः षोडशाऽपिकला निरूपाधिकपुरुषशब्दप्रतिपाद्यं पुरुषं वासुदेवं प्राप्यास्तं गच्छन्ति । भोगाय समर्था न भवन्तीत्यर्थः । तत्र हेतुमाह पुरुषायणा इति । परमात्मसङ्कल्पाधीन स्वरूपस्थितिप्रवृत्तिका इत्यर्थः । आसां कलानां नामरूपे नस्तः । तदेव स्पष्टयति पुरुष इत्येवं प्रोच्यते एष जीवोऽकल इति प्रोच्यते । तत एवामृतो भवति । कलानिमित्तं हि मरण मस्येत्यर्थः । तत्परमात्मस्वरूपमधिकृत्य वक्ष्यमाणः श्लोक इत्यर्थ ॥ ५ ॥

अरा इव रथनाभौ कला यत्र प्रतिष्ठिताः ।
तं वेद्यं पुरुषं वेत्थ मा वो मृत्युः परिव्यथाः ॥ ६॥

तान् होवाचैतावदेवाहं परं ब्रह्म वेद । नातः परमस्तीति ॥ ७ ॥

ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥८॥

इत्यथर्ववेदीय प्रश्नोपनिषदि षष्ठः प्रश्नः ॥ ६ ॥

टीक—अरा रथनाभाविव कलाः प्राणाद्या यस्मिन् प्रतिष्ठितास्तं वेद्यं पुरुषार्थकामैर्ज्ञातव्यं पुरुषं वासुदेवं वेद यथा जानीध्वं हे शिष्या इति कस्यचिद्वाक्यम् । ततश्च मृत्युः संसारो वो युष्मान् मा परिव्यथाः मा परिव्यथयतु परमपुरुषाज्ञाने संसारव्यथा भवेत् सा भवतां मा भवत्विति । एतत्प्रश्नप्रतिवचनार्थं प्रसङ्गादुपसंहरति अत इति । एवं पिप्पलादस्तेभ्यस्तत्त्वमुपदिश्य तान् भारद्वाजादीन् प्रत्युवाच । किल एतत् । उक्त लक्षणं परंब्रह्म अहमेतावदुक्तमात्रमेव वेद नातः परं मया विदितमऽस्तीति । एवमुपदिष्टास्ते मुनयस्तमाचार्य्यमर्चयन्तः प्रणामादिना पूज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यन्त इदमूचुः। भगवंस्त्वं हि नः पिता निरूपाधिकोपकारकः कथं यस्त्वमस्माकम्। अविद्यायाः परंपारं तारयसि। अतारयः। को हि नामैवमुपकुर्यादिति। एवमख्यायिकां समाप्य वेदपुरुषः शिष्यशिक्षार्थमाह। नमः परमऋषिभ्य इति। द्विर्वचनमादरार्थम्॥

अशेषरसिकचक्रचूडामणि श्रीस्वामि हरिदासपदाश्रिता·
श्रितानुगेन विदुषां अमोलकरामेण पूर्वाचार्य्योक्तितः
संगृहीतायां अथर्ववेदीय प्रश्नोपनिष-
त्तत्वप्रकाशिकाटीकायां
॥ षष्ठः प्रश्नः समाप्तः॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री निम्बार्कमहामुनीन्द्राय नमः ।
॥ श्री निकुञ्जविहारिणे नमः ॥

मुण्डकोपनिषद्

वन्दे कृष्णं परं ब्रह्म परविद्यामपीश्वरम् ।
यस्य विज्ञानमात्रेण सर्वं विज्ञायते ध्रुवम् ॥ १ ॥
श्रीनिम्बार्कमताम्भोधिकौस्तुभोद्धारकृद्गुरुः ।
श्रीनिवासाचार्य्यवर्यः श्रेयसे मेऽस्तु भूयसे ॥ २ ॥
श्रीमुकुन्दं प्रणम्याथ सम्प्रदायानुसारतः ।
मिता सङ्गृह्यते व्याख्या मुण्डकानां स्वबुद्धये ॥ ३ ॥

अथ विद्याप्राप्तावत्यायासं द्योतयन्ती श्रुतिस्तत्प्ररोचनार्थामाख्यायिकां स्वयमेव स्तुत्यर्थमाह—

ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥१॥

'ब्रह्मेति ।' ब्रह्मा परिवृढः ।

ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पते ?
ऐश्वर्य्यञ्चैव धर्म्मश्च स्वतः सिद्धं चतुष्टयम् ॥

इत्यादिस्मृतेरैश्वर्य्यादिभिः सर्वानतिक्रम्य वर्तमानो 'देवतानां' द्योतमानानामिन्द्रादीनां प्रथमोऽग्रे शुक्रशोणितसंयोगमन्तरेण 'सम्बभूव' सम्यक् प्रादुर्भूतः । 'विश्वस्य' सर्वस्य भुवनस्य कर्तोत्पादकः । उत्पन्नस्य तस्य 'गोप्ता' रक्षकश्च । स एवं भूतो ब्रह्मा 'ब्रह्मविद्यां' परमात्मविद्यां सर्वविद्यानां प्रतिष्ठामाश्रयभूतां ब्रह्मणि ज्ञाते सर्वज्ञातव्यान्तर्भावात् ब्रह्मज्ञाने सर्वज्ञानानामन्तर्भूतत्वात्तस्याः सर्वविद्याश्रयत्वमथर्वनाम्ने ज्येष्ठपुत्राय प्राह—उक्तवानित्यर्थः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथर्वणे यां प्रवदेत ब्रह्मा अथर्वा तां प्रोवाचाङ्गिरे ब्रह्मविद्याम् ।
स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥२॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ–
'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति' ॥३॥

'अथर्वणे'यामेतां ब्रह्मा प्रवदेत–प्रावदत्, तामेव ब्रह्मविद्यां, 'अथर्वनामा' पुरा पूर्वमङ्गिर्नाम्ने ऋषये प्रोवाच। 'स चाङ्गिर्नामा' भारद्वाजगोत्रीयसत्यवहनाम्ने उक्तवान्। 'भारद्वाजो'ऽङ्गिरसे स्वशिष्याय परस्मादवरेणावरेण प्राप्तां परावरसर्वविद्याव्याप्तां वा 'परावरां' प्राहेत्यनुषङ्गः ॥ २ ॥

शुनकपुत्रः ह वै प्रसिद्धो महाशालो महागृहस्थोऽङ्गिरसं विधिवत् समित्पाणित्वादिशास्त्रीयनियमानतिक्रमेणोपसन्नः उपगतः सन्प्रपच्छ। किमित्याह–'कस्मिन्निति।' हे भगवः! भगवन्नित्यस्य 'मतुवसो रु सम्बुद्धौ छन्दसि'–इत्यनेन तस्य रुः।

उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इत्युक्तसर्वभूतोत्पत्त्यादिविदित्यर्थः। 'कस्मिन् विज्ञाते सर्वमिदं कार्यजातं विशेषेण ज्ञातं भवतीति, यथा स्वर्णपिण्डे विज्ञाते सर्वं तन्मयं विज्ञातं भवति। एवं कस्मिंश्चिद्वस्तुनि विज्ञाते सर्वं तत्कार्य्यजातं विज्ञातं भवतीति' शिष्टप्रवादो मया श्रुतस्तादृशं सर्वनिमित्तोपादानभूतं वस्तु किमिति प्रश्नेऽभिप्रायः ॥ ३ ॥

इति तस्मै स होवाच द्वे विद्ये वेदितव्ये।
इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४ ॥

तस्मै शौनकाय सः अङ्गिरा ह किलोवाच। किमिति तत्राह-'द्वे इति' यद्वस्तुप्रेप्सुना द्वे विद्ये वेदितव्ये परोक्षापरोक्षरूपे द्वे ज्ञाने उपादातुं योग्ये। इत्येवं ह स्म किल ब्रह्मविदो वेदार्थाभिज्ञाः पराशरादयो वदन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने !॥
आगमोत्थविवेकाच्च द्विधा ज्ञानं तथोच्यते।
शब्दागमोत्थमपरं परंब्रह्म विवेकजम्॥ इत्यादिना।

तस्मिन्वस्तुनि विज्ञाते सर्वं विज्ञातं भवतीत्यर्थः। विद्ये वेदितव्ये इति ओदनपाकं पचतीतिवन्निर्देशः। के ते इत्याह परेति। परोक्षमपरोक्षं चेति द्विविधं ज्ञानमित्यर्थः॥ ४॥

तत्रापरविद्यास्वरूपमाह—

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः,
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते॥ ५॥

'तत्रापरेति'। साङ्गसशिरस्कवेदश्च वर्णादिजन्यपरोक्षज्ञानमपरविद्येत्यर्थः। तत्र शिक्षा—वर्णनिर्णयपरा। कल्पः—सूत्रग्रन्थः अनुष्ठेयश्रौतस्मार्तक्रमप्रतिपादनपरः। व्याकरणं—स्वरवर्णपदादिसमर्थनपरम्। निरुक्तं—पूर्वार्थप्रतिपादकम्। छन्दश्चानुष्टुप्त्रिष्टुबादिकम्। ज्योतिःशास्त्रञ्चाध्ययनानुष्ठानादिकालनिर्णयपरम्। परविद्यामाह-'अथेति'। सूचीकटाहन्यायेनापरविद्याकथनानन्तरं परविद्योच्यते इत्यर्थः। यया येन ज्ञानेन तत्पूर्ववाक्येन यच्छब्दनिर्दिष्टमक्षरमधिगम्यते प्राप्यते साक्षात्क्रियते सा 'परा' विद्या परब्रह्मश्रीपुरुषोत्तमवेदनासाधारणवेदान्तविचारजन्यमपरोक्षज्ञानं परविद्येत्यर्थः।

निचाय्य तं मृत्युमुखात्प्रमुच्यते, तस्मिन् दृष्टे परावरे। इत्यादिश्रुत्यन्तरात्॥ ५॥

परविद्यागम्यमक्षरं सिद्धवत् बुद्धौ संहृत्य परामृशति—

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यत्तदिति'। यत्तत्सर्वशास्त्रप्रसिद्धमक्षरमद्रेश्यमदृश्यं ज्ञानेन्द्रियैरियत्तया द्रष्टुमशक्यम्, अग्राह्यं कर्मेन्द्रियैरियत्तया गृहीतुमशक्यं "यद्वाचाऽनभ्युदितमि"त्यादिश्रुत्यन्तरात्। अगोत्रं मूलरहितं सर्वमूलरूपत्वात, कुलहीनं वा। अवर्णं ब्राह्मणादिरहितम्, अचक्षुःश्रोत्रं तदपाणिपादं जीवानामिव ज्ञानकर्मेन्द्रियानधीनविषयज्ञानम् 'अनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वत आदत्त' इत्यादिश्रुत्यन्तरात्। नित्यमाद्यन्तशून्यं, विभुं व्यापकं, सर्वगतं सर्वस्यान्तः प्रविश्य स्थितम्। तत्र हेतुमाह 'सुसूक्ष्ममिति'। अथ परा ययेत्यक्षरशब्दनिर्दिष्टं यत् तदव्ययमविनाशि, यत् भूतानां सर्वेषां योनिमुपादानकारणम्, धीरा विवेकिनः परिपश्यन्ति जानन्तीत्यर्थः ॥ ६ ॥

तस्य सर्वान्तर्यामितया सर्वव्यापकत्वात् भूतयोनिशब्दितसर्वोपादानत्वमुपपादयन्नाह—

यस्मात्परं नापरमस्ति किञ्चित् यस्मान्नाणीयो नज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥७॥

'यस्मादिति'। यस्मात्परमुत्कृष्टं नापरमन्यत्किञ्चिदस्ति। यस्मादणीयो ज्यायश्च कश्चित् किञ्चिदपि नास्ति, लिङ्गव्यत्ययश्छान्दसः। तस्यैव सर्वव्यापितया सर्वेशितृतया च सूक्ष्मत्वज्यायस्त्वयोः सम्भवात्। 'वृक्ष इव स्तब्धः' अप्रणतस्वभावः स्वाऽन्यरस्यवस्त्वभावात्। एकश्चिन्मुख्यः सन् दिवि व्योम्नि तिष्ठति तेन पुरुषेण सर्वान्तः प्रविश्य नियन्त्रा इदं चिदात्मकं विश्वं पूर्णं व्याप्तमित्यर्थः ॥

यदुक्तं योनिशब्दस्योपादानपरत्वं तद्दृष्टान्तैरुपपादयन्नाह—

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयःसम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम् ॥८॥

'यथेति'। ऊर्णनाभिर्लूताख्यकीटविशेषः सहायान्तरमनपेक्ष्य स्वयमेवाप्रच्युतस्वरूपतया ऊर्णां सूक्ष्मतया स्वान्तः स्थिततन्तून् सृजते स्थूल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तया बहिः प्रसारयति, पुनस्तान् गृह्णते गृह्णाति च। यथा चाप्रच्युतस्वरूपायां पृथिव्यां विलक्षणा अनन्ताः व्रीह्यादिस्थावरान्ता औषधयः सम्भवन्ति। यथा च सतो जीवतः पुरुषादन्नमयात् केशलोमानि विलक्षणानि सम्भवन्ति। तथाऽक्षराद्ब्रह्मणः पूर्वोक्तलक्षणादप्रच्युतस्वरूपादेव निमित्तान्तरानपेक्षादुपादेयविलक्षणान्निर्विकारात् विश्वं समस्तं जगत् परस्परविलक्षणं सम्भवति इह संसारमण्डले ॥ ८॥

ततो जगदुत्पत्तिप्रकारमाह-

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।
अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ ९॥

'तपसेति'। तपसा 'यस्य ज्ञानमयं तप' इति वक्ष्यमाणेन 'बहु स्या'मिति सङ्कल्परूपज्ञानेन ब्रह्म चीयते उपचीयते सृष्ट्युन्मुखं भवति। ततो ब्रह्मणः सकाशात् 'अद्यतेऽत्ति च भूतानी'त्युक्तस्वरूपं भोग्यभोक्तृलक्षणाचिदचित्संघातरूपमव्याकृतमभिजायते। अन्नादन्नशब्दितादव्याकृतात्प्राणो देहधारणः मनःशब्दोपलक्षितमन्तःकरणं सत्यशब्दितो जीववर्गः लोका भूरादयः कर्मसु मध्ये अमृतत्वं च मोक्षसाधनं कर्म चाभिजायते इत्यर्थः ॥ ९॥

तस्य जगत्सृष्ट्युपयोगिसार्वज्ञ्यं दर्शयन् पूर्वोक्ततपःशब्दं विवृणोति—

यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते तदेतत्सत्यम् ॥१०॥

इति प्रथमः खण्डः ॥

य उक्तलक्षणो भूतयोनिः सामान्येन सर्वं जानातीति सर्वज्ञः विशेषेण सर्वं वेत्तीति सर्वदेशकालवस्तुविषयकप्रत्यक्षानुभूतिमत्त्वं तस्यात्र विधीयते। यस्य ज्ञानमयं ज्ञानमेव तपः। तस्मान् सर्वज्ञाद्ब्रह्मणस्तत् ब्रह्म अव्याकृतापरपर्य्यायं 'मम योनिर्महद् ब्रह्मे'ति भगवदुक्तेः त्रिगुणात्मक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मव्यक्तं नामरूपयुक्तम्, अन्नं 'ततोऽन्नमभिजायते' इत्यन्नशब्दनिर्दिष्टं भोग्यभोक्तृरूपचिदचित्संघातलक्षणं जायते इति पूर्वोक्तस्यैवानुवादः। 'तदेतत्सत्यम्' यद्विषयके द्वे विद्ये वेदितव्ये तत् उत्पत्त्यादिषड्भावविकाररहितत्त्वे सति कालत्रयाबाध्यम् ॥ १० ॥

इति प्रथमः खण्डः ।

अथ द्वितीयः खण्डः

मन्त्रेषु कर्म्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधासन्ततानि ।
तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके॥१॥

मन्त्रेषु ऋग्वेदादिषु कर्म्माण्यग्निहोत्रादीनि कवयो मनीषिणो यान्यपश्यन् तानि त्रेतायां त्रेतायुगे बहुप्रकारं सन्ततानि प्रवृत्तानि । यूयं सत्यकामाः सत्यं ब्रह्मैव कामयमानाः फलानुसन्धानरहिता मुमुक्षवः सन्तो नियतमाचरथ नित्यमनुतिष्ठत । निष्कामकर्म्माणि ह्यन्तःकरणशुद्धिपूर्वकज्ञानोत्पादनेन तद्द्वारा ब्रह्मप्राप्तिहेतवो भवन्ति । कर्मफलप्रेप्सून् प्रत्याह 'एष' इति । वो युष्माकं सुकृतस्य सुष्ठु स्वयं निवर्तितस्य कर्मणो लोक्यते दृश्यते भुज्यते इति लोकः कर्मफलं तत्प्राप्तये तु एष वक्ष्यमाणो मार्ग इत्यर्थः ॥ १ ॥

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।
तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥ २ ॥

यदा यस्मिन्नेव काले इन्धनैरभ्याहितैः सम्यक् इद्धे दीप्तेऽग्नौ, अर्चिर्ज्वाला लेलायते चलति तस्मिन्नेव काले आज्यभागावन्तरेणाज्यभागयोर्मध्ये आवापस्थाने आहुतीः प्रक्षिपेदित्यर्थः । सूर्य्याय स्वाहा प्रजापतये स्वाहेति प्रातः, अग्नये स्वाहा प्रजापतये स्वाहेति सायं च। अग्निहोत्राहुत्योर्द्वित्वप्रसिद्धेर्बहुवचनमनेकाहुतिप्रयोगापेक्षया ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च । अहुतमवैश्वदेवमश्रद्धयाऽविधिना हुतमासप्तमांस्तस्य लोकान् हिनस्ति ॥ ३ ॥

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः॥४॥

यस्याग्निहोत्रिणोऽग्निहोत्रं कर्म दर्शाख्येष्टिवर्जितं पौर्णमासाख्येष्टिवर्जितं चातुर्मास्येष्टिवर्जितं शरत्कालीननूतनान्नेन कर्तव्याग्रयणाख्येष्टिविशेषवर्जितमतिथिसत्कारवर्जितं च काले च न हुतमावश्यकवैश्वदेवकर्मवर्जितं हूयमानमप्यश्रद्धयाऽविधिना हुतमनुष्ठितं तस्य सप्तपुरुषपर्य्यन्तं सुकृतफलं लोकांश्च सर्वं नाशयतीत्यर्थः । दर्शादीनां पृथक् फलवत्तयाऽग्निहोत्रानङ्गत्वेपि नित्यनैमित्तिकं सर्वं कर्मानुष्ठेयमित्यभिप्रायेणैवमुक्तम् । कालीत्याद्या लेलायमाना रुचिराहुतिग्रसनार्था अग्नेः सप्त जिह्वाः, 'देवीति' विश्वरुच्या विशेषणम् ॥ ३ , ४ ॥

एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् । तं नयन्त्येताः सूर्य्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः ॥ ५ ॥

एतेषु भ्राजमानेषु देदीप्यमानेषु जिह्वाभेदेषु यथाकालं कालमनतिक्रम्याहुतिर्होमद्रव्यम् , आहुतय इति पाठे द्वितीयार्थे प्रथमा, आददायन् आददानो योऽग्निहोत्रादिकं कर्म्माचरति, तं यजमानं एता आहुतयः सूर्य्यस्य रश्मयो भूत्वा नयन्ति प्रापयन्ति । क्व ? 'यत्र' सत्यलोके देवानां पतिरेकोऽसमानः अधि-सर्वानुपरि वसति इत्यधिवासश्चतुर्मुख आस्ते तत्रेत्यर्थः ॥ ५ ॥

एह्येहि इति तमाहुतयः सुवर्चसः सूर्य्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यसुकृतो ब्रह्मलोकः॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एह्येहीतियजमानमाह्वयन्त्यः आहुतयः सुवर्चसो दीप्तमत्यः यतः सूर्य्यस्य रश्मिभिर्मिश्राः अर्चयन्त्यः पूजयन्त्यः एषः पुण्यः पवित्रः सुकृतसाध्यश्चतुर्मुखलोको वो युष्माकं युष्मत्स्वामिकम्, एवं प्रियां स्तुतिरूपां वाचं अभिवदन्त्यो यजमानं वहन्ति ब्रह्मलोकं प्रापयन्तीत्यर्थः ॥ ६ ॥

एवं ब्रह्मलोकसाधकान्यपि कर्म्माणि क्षयिफलानीति तानि निर्दिशति—

प्लवा ह्येतेऽदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति ॥७॥

"प्लवा इति" । प्लवन्ते सफलत्वेन गच्छन्ति विनश्यन्तीति प्लवा एते हि यतोऽदृढ़ा अस्थिराः, यज्ञो रूप्यते निरूप्यते स्वाश्रयतया निर्वर्त्यते यैस्ते यज्ञरूपा यज्ञनिर्वर्तकाः । एते के तानाह षोडशर्त्विजः अध्वर्य्युः प्रतिष्ठाता नेष्टा उन्नेता ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः होता उद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्यः होता मैत्रावरुणः अच्छावाकः ग्रावस्तुदिति नायकाः पत्नी यजमानश्चेत्यष्टादशकर्त्राश्रितत्वेनोक्तं शास्त्रेण कथितम्, अवरं फलाभिसन्धिमत्तयाऽश्रेष्ठं कर्म येषु यजमानेषु वर्त्तते इत्यर्थः । स्वर्गादिफलेच्छया कर्म कुर्वाणाः पुरुषा जीर्णनौका इव स्वात्मनः संसारसमुद्रसन्तारणे न समर्था इत्यभिप्रायः । यद्वा प्लवन्ते एभिरिति प्लवास्तरणसाधनानि एते यज्ञस्वरूपाः प्लवा अदृढा विनाशित्वात्, एते के ? अष्टादशकर्म्माश्रितत्वेनोक्तमवरं निकृष्टं परहिंसनादिरूपं कर्म येषु वर्तते इत्यर्थः । एतत्कर्म्म श्रेयःसाधनमिति मत्वा ये मूढा अभिनन्दन्ति हृष्यन्ति ते जरामृत्युं जरां च मृत्युं च पुनरेव भूयोऽपियन्ति प्राप्नुवन्ति ॥ ७ ॥

अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।
जंघन्यमानाः परियन्ति मूढा अन्धेनैव नीयमानाः यथाऽन्धाः ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च अविद्यायामन्तरे मध्ये वर्तमाना अज्ञानबहुलाः स्वयं स्वयमेव धीरा धीमन्तः पण्डितमूहापोहक्षमबुद्धिशालिनमात्मानं सम्भावयमानास्ते मूढा जंघन्यमाना जरारोगाद्यनेकानर्थसमूहैरतिशयेन पीड्यमानाः परिभ्रमन्ति । यथा लोके अन्धेनैवाचक्षुष्मता नीयमाना प्रदर्श्यमानमार्गा अन्धा गर्तकण्टकादौ पतन्ति तद्वत् ॥ ८ ॥

अविद्यायां बहुधा वर्त्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः । यत् कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते ॥ ९ ॥

किञ्च अविद्यायां बहुधा देवादिबहुविधाभिमानितया वर्तमाना वयमेव कृतार्थाः कृतप्रयोजना इत्यभिमानं कुर्व्वन्ति बाला मूर्खा, यद्यतः कर्मिणः कर्मठा रागात् कर्मफलस्वर्गादिप्रीत्यतिशयात् न प्रवेदयन्ति तत्वं न जानन्ति, तेन तत्वज्ञानाभावेन हेतुना आतुरा दुःखार्ताः सन्तः क्षीणलोकाः क्षीणकर्मफलाश्च्यवन्ते मर्त्यलोकं विशन्तीत्यर्थः ॥ ९ ॥

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति॥१०॥

इष्टं यागादिश्रौतं कर्म पूर्तं वापीकूपतडागादिस्मार्तमेतदेव वरिष्ठं श्रेष्ठं पुरुषार्थसाधनं मन्यमानाः अन्यत् ज्ञानादिकं श्रेयःसाधनं न जानन्ति प्रमूढाः पुत्रादिषु प्रकर्षेण मोहयुक्ताः । ते च सुकृतसाध्ये नाकस्य पृष्ठे स्वर्गलोकोपरिलोके कर्मफलमनुभूय पुनरिमं मनुष्यलोकमतो हीनतरं वा नरकादिकं विशन्ति ॥ १० ॥

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः । सूर्य्यद्वारेण ते विरजाः प्रयान्ति यत्रास्तेऽमृतः पुरुषो ह्यव्ययात्मा ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ये तु विद्वांसो ज्ञानिनः कृतश्रवणमननाः अरण्ये वर्तमानाः सन्तः शान्ता उपरतकरणग्रामा वानप्रस्थाः भैक्ष्यचर्यां चरन्तः संन्यासिनश्च तपःशब्दितं ब्रह्म "ये चेमेऽरण्ये श्रद्धां तप इत्युपासते" इति श्रुत्यन्तरे तपःशब्दस्य ब्रह्मपरत्वात् तद्विषयिणीं श्रद्धां चोपवसन्ति सेवन्ते। ते विरजाः निर्मलाः सन्तः सूर्यमण्डलं भित्त्वा यत्रामृतो निर्विकारः अव्ययात्मा नित्यविग्रहयुक्तः पुरुषः परमात्माऽऽस्ते तत्र प्रयान्तीत्यर्थः ॥ ११ ॥

अथ विरक्तस्य मुमुक्षोर्ब्रह्मप्राप्तिहेतुज्ञानप्रेप्सोर्गुरूपसत्तिर्विधीयते—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् । नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥

'परीक्ष्येति'। लोकान् कर्मचितान् कर्मसंपाद्यान् ऐहिकामुष्मिकानि सर्वाणि सकामकर्मफलानीत्यर्थः "परीक्ष्य तद्यथेह कर्मचितो लोकः क्षीयते' इत्याद्यागमादिना क्षयिष्णुत्वेन निश्चित्य ब्राह्मणोऽधीतसाङ्गवेदो यो निर्वेदं वैराग्यमायात्। निर्वेदप्रकारमाह "नास्तीति"। अकृतः नित्यो मोक्षः कृतेन कर्मणा न सिध्यतीति तस्य वेदान्तवेद्यस्य परब्रह्मणः स्वरूपगुणशक्त्यादिविषयकविज्ञानार्थं साक्षादनुभवार्थं स मुमुक्षुर्गुरुमेवाभिगच्छेत्। एवकारेण शास्त्रज्ञोऽपि न स्वातन्त्र्येण ब्रह्मज्ञानमन्विष्यादिति नियम्यते। समित्पाणिः "रिक्तहस्तस्तु नोपेयाद्राजानं दैवतं गुरुम्" इति स्मृतेः समिदुपलक्षितपूजोपकरणहस्त इत्यर्थः। गुरुलक्षणमाह श्रोत्रियं वेदान्तार्थावगाहिनं ब्रह्मस्वरूपगुणाद्यनुभवपरिपूर्णमनस्कम् शिष्यसंशयछेतृत्वब्रह्मणिरुच्युत्पादकत्वयोरन्यथानुपपत्तेर्विशेषणद्वयम् ॥ १२ ॥

तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां तदेतत्सत्यम् ॥ १३ ॥ ॥इति द्वितीयखण्डः प्रथममुण्डकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्यलक्षणमाह तस्मै सम्यगुपसन्नाय मायादंभादित्यागपूर्वकंस्व-शरणापन्नाय, तत्र हेतुः प्रशान्तचित्तं लोकाद्येषणादिशून्यं चित्तं यस्य तस्मै, अत एव शमान्विताय शमशब्दो बाह्येन्द्रियनियमनपरः प्रशान्तचित्तायेत्यन्तःकरणनियमनस्योक्तत्वात् विक्षेपादिशून्यायेत्यर्थः, बाह्येन्द्रियविक्षेपहेतुकामादीनां नष्टत्वात् "कारणाभावे कार्याभाव" इति न्यायात्। एतादृशाय शिष्याय स विद्वानुक्तलक्षणो गुरुः तां ब्रह्मविद्यां प्रोवाच प्रब्रूयात् प्रकर्षेणोपदिशेत्। उपदेशप्रकर्षं व्यञ्जयन्नाह येन तत्वतोऽक्षरं निर्विकारं पुरुषं वेद साक्षादनुभवति। तल्लक्षणं द्योतयन् विशिनष्टि सत्यम्, उपलक्षणमेतत् ज्ञानादीनां "सत्यं ज्ञानमनन्तं ब्रह्मेति" लक्षणलक्षितमित्यर्थः। येनेति यच्छब्दो ब्रह्मविद्यापरामर्शपरः यत्तदोर्नित्यसंबन्धात्, लिङ्गव्यत्ययश्छान्दसः। यद्वा येनोपदेशेनेत्यर्थः। तदेतत्सत्यमिति पूर्ववत्॥ १३॥

॥ इति द्वितीय खण्डः प्रथम मुण्डकः॥

अथ द्वितीयः मुण्डकः

प्रथम खण्डः

यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।
तथाऽक्षराद्विविधाः सौम्य! भावाः प्रजायन्तेत त्र चैवापियन्ति॥१॥

दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ २॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥ ३॥

यथा सुष्ठु दीप्तादाध्मायमानादग्नेरग्निकणा अनेकशः सरूपाः पूर्वरूपसलक्षणाः प्रभवन्ते प्रादुर्भवन्ति। एवमेव सृष्ट्युन्मुखादक्षराद्ब्रह्मणो नानाप्रकाराः हे सौम्य प्रियदर्शन! भावाः कार्य्यवर्गाः प्रादुर्भवन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रलये तत्रैव लीयन्ते च। दिव्यो द्योतमानः सर्वस्तुत्यो वा दिवि तिष्ठत्येक इत्युक्तसम्बन्धी वा अमूर्त्तो विभुः पुरुषः पूर्णः सह बाह्याभ्यन्तरेण वर्तत इति बाह्याभ्यन्तरसर्ववस्त्वात्मा अजो जन्मादिविकारशून्यः, अप्राणः प्राणानधीनस्थितिः अमनो मनोऽनधीनज्ञानः, यद्वा प्राणमनःशब्दितकर्मज्ञानेन्द्रियाणि कर्मज्ञानेन्द्रियानधीनविषयज्ञान इत्यर्थः। शुभ्रः शुद्धश्च यः स अक्षरोद्भूतसूक्ष्मरूपादव्याकृतात्प्रधानात्परो यः समष्टिजीवस्तस्मादपि कारणत्वेन पर इत्यर्थः। तयोस्तज्जन्यत्वादिति भावः। अर्थविस्तरस्तु "अदृश्यत्वादिगुणको धर्म्मोक्ते"रित्यधिकरणे कौस्तुभप्रभायां द्रष्टव्यः। ततो विश्वसृष्टिं प्रपञ्चयति 'एतस्मादिति'। प्राणो मुख्यः चकारात्सर्वेन्द्रियविषयाः विश्वस्य सर्वस्य धारिणी पृथिवी। स्पष्टार्थान्यन्यानि ॥ १, २, ३ ॥

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ ४ ॥

अस्येति सर्वत्रानुषज्यते। अस्याग्निर्द्युलोको मूर्धा शिरः, 'असौवाऽवलोको गौतमाग्नि'रिति श्रुतेः। एवमग्रेपि। वाग्विवृता वागिन्द्रियव्यापाराः वायुर्महावायुरस्य देहधारकः प्राणः विश्वं सर्वजगदस्य हृदयमन्तःकरणं सर्वं जगदस्य सङ्कल्पजमित्यर्थः। पद्भ्यां पादावित्यर्थः, 'प्रकृत्यादिभ्य उपसंख्यानमिति' तृतीया। एष सर्वभूतानामन्तःप्रविश्य नियन्ता।

यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः।
सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः ॥

द्यां मूर्धानं यस्य विप्रा वदन्ति खं व नाभिश्चन्द्रसूर्यौ च नेत्रे।
दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता ॥

इत्यादिस्मृतिरत्र ज्ञेया ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चाग्निविद्योक्तक्रमेण सृष्टिमाह—

तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम् ।
पुमान्रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥५॥

तस्मादक्षरात् परतःपरस्मात्पुरुषादग्निर्द्युलोकः सम्भवति यस्याग्नेः सूर्य्यः समिध इव समिधः काष्ठानि सूर्य्येण हि द्युलोकः संदीप्यते 'असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिदिति' पञ्चाग्निविद्यायां श्रुतेः। ततो हि द्युलोकाग्नेर्निष्पन्नात्सोमात् पर्जन्यो द्वितीयोऽग्निः, पर्जन्यादोषधयः पृथिव्यामग्नौ ओषधिभ्यः पुरुषाग्नौ हुताभ्य उपादानभूताभ्यः पुमानग्निर्योषिद्रूपाग्नौ रेतःसेकं करोति। एवं द्युपर्जन्यपृथिवीपुरुषयोषद्रूपपञ्चाग्निद्वारेण बह्वीर्बह्वयः प्रजाः परस्मात्पुरुषात्समुत्पन्नाः ॥ ५ ॥

तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्य्यः ॥ ६ ॥

तस्मादेव पुरुषात् ऋग्यजुःसामवेदाः समुत्पन्नाः तत्र ऋचो नियताक्षरपादावसाना गायत्र्यादिछन्दोविशिष्टाः, साम हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्यपञ्चभक्त्यवयवकं स्तोमादिगीतिविशिष्टं, यजूंषि अनियताक्षरपादावसानानि वाक्यरूपाणि, दीक्षाः कर्तृनियमविशेषाः, यज्ञा अग्निहोत्राद्याः, क्रतवः सयूपाः दक्षिणाश्च, संवत्सरः कालः यजमानः कर्माङ्गकर्ता, लोकास्तस्य कर्मफलभूताः, स्वर्गाद्याः समुत्पन्ना इत्यर्थः। लोका यत्र येषु पवते स्वकिरणैस्तान्पुनातीत्यर्थः। ते लोकाश्चन्द्रसूर्य्यकिरणभूता इति यावत् ॥ ६ ॥

तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि ।
प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥७॥
सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्तहोमाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताःसप्त सप्त॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तस्माच्चेति' नियोगे तस्मादेव पुरुषाद्देवा बहुधा कर्मजाऽजानजादिभेदेन वस्वादिगणभेदेन वा संप्रसूता उत्पन्नाः। यवो दीर्घशूकधान्यविशेषः, व्रीहियवोपलक्षितं सर्वधान्यं, तपः कर्माङ्गं पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येत्यादिविहितं पुरुषसंस्कारलक्षणं कृच्छ्रचान्द्रायणादिलक्षणं वा, श्रद्धा आस्तिक्यबुद्धिः, सत्यं यथार्थभाषणम्, ब्रह्मचर्य्यं स्त्रीसङ्गादित्यागः, विधिर्नित्यनैमित्तिकादिः। तस्मादेव सप्त प्राणाः शीर्षण्याः श्रोत्रचक्षुर्नासायुग्मास्यसंचारशीलानि इन्द्रियाण्युत्पद्यन्ते। अर्चिषो दीप्तयः स्वस्वविषयावद्योतनानि, समिधो विषयाः विषयैर्हि प्राणाः समिध्यन्ते होमास्तद्विषयविज्ञानानि "यदस्य विज्ञाने तज्जुहोतीति" श्रुत्यन्तरात्। किञ्च सप्तमे लोका इन्द्रियस्थानानि उत्पन्नानि येषु लोकेषु चक्षुरादिगोलकप्रदेशेषु सुषुप्तिकाले हृदयगुहासु शयानाः सप्त प्राणा निहिता स्थापिताः सन्तश्चरन्ति सञ्चरन्तीत्यर्थः। वीप्सा पुरुषभेदाभिप्राया प्रतिपुरुषं सप्तेत्यर्थः॥ ७, ८॥

अतः समुद्रा गिरयश्च सर्वेऽस्मात् स्पन्दन्ते सिन्धवः सर्वरूपाः।
अतश्च सर्वा ओषधयो रसाश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा॥९॥

'अत इति'। अस्मादेव समुद्राद्या उत्पन्नाः स्पन्दन्ते प्रस्रवन्ति सिन्धवो गङ्गाद्या नद्यः सर्वरूपा बहुरूपाः। नन्वोषधीनां पृथिवीयोनित्वं दृश्यते कथं सर्वस्याक्षरयोनित्वं कथ्यते इत्याशङ्क्याह 'येनैष इति'। येन यस्मात्कारणादेषोऽक्षरपुरुषः भूतैः सर्वैः परिवृत इव तदन्तरात्मत्वेन तिष्ठते वर्त्तते तस्मादोषध्यादीनां पृथिव्यादियोनित्वेपि पृथिव्याद्यन्तरात्मब्रह्मयोनित्वं नो विरुध्यते इतिभावः॥ ९॥

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्।
एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सौम्य!॥१०॥

इति प्रथमखण्डः

यत इदं सर्वं पुरुषात्परमात्मनो जातं पुरुषात्मकं च तस्मात्पुरुष एव कार्यकारणयोर्नियम्यनियन्त्रोश्चाभेदेन पुरुषस्य सर्वशब्दवाच्यत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन् विज्ञाते सर्वमिदं चेतनाचेतनात्मकं विज्ञातं भवति इति, कर्म-जगत्सृष्ट्याद्यनुकूलो व्यापारः तपो ज्ञानं स्रष्टव्यालोचनात्मकं परं प्रकृतेः परभूतं च ततः अमृतं मुक्तानाममृतवत्परमानन्दतया भोग्यभूतं च ब्रह्माप्यक्षरपुरुष एवेत्यर्थः। गुहायां निहितं सर्वप्राणिनां हृदयगुहायां स्थितमेतदक्षरं ब्रह्म इह लोके यो वेद सः अविद्याग्रन्थि ग्रन्थिवत् दुर्मोच्याम् अविद्यां विकिरति विक्षिपति निरस्यतीत्यर्थः। हे सोम्य ! ॥ १० ॥

॥ इति प्रथम खण्डः ॥

अथ द्वितीयः खण्डः

आविः सन्निहितं गुहाचरं नाम महत्पदम्।
अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्च यत् ॥ १ ॥

आविरित्यव्ययं प्रकाशवाचि योगिनां सदा प्रकाशमानं प्रत्यक्षमिति यावत्। सन्निहितं व्यापकतया सर्वेषां समीपे स्थितं गुहायां हृदयगुहायां चरमन्तर्बहिः सर्वं व्याप्य विद्यमानमित्यर्थः। नाम प्रसिद्धं महत्पूज्यं पदं प्राप्यं ब्रह्म। अत्रास्मिन् ब्रह्मणि यदेतत् एजत् एजृ कंपने जाग्रदित्यर्थः। निमिषत् सुषुप्तं च प्राणत् प्राणिजातं तत्सर्वं समर्पितमित्यर्थः ॥ १ ॥

तदेतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ।
यदर्चिष्मद्यदणुभ्योऽणिमच्च यस्मिन् लोका निहिता लोकिनश्च॥२॥

तदेतत् सर्वस्याधारभूतं ब्रह्म हे शिष्या ! जानथ जानीत अवगच्छत। किंभूतं सदसद्भिर्मूर्त्तामूर्तैः स्थूलसूक्ष्मवस्तुभिर्वरेण्यं वरणीयमाधारत्वेन प्रार्थनीयं विज्ञानात् जीवात्मनः परं श्रेष्ठं 'विज्ञानं यज्ञं तनुते यो विज्ञाने तिष्ठन्नि'त्यादिश्रुतौ विज्ञानशब्दस्य जीववाचकत्वात्। यत्प्रजानां वरिष्ठं उपायोपेयभावेनात्यन्तं वरणीयं यदर्चिष्मदादित्यादीनामपि प्रकाशकं यदा कङ्गुभ्यः श्यामाकादिभ्यो-प्यणिमदणिष्ठमतिसूक्ष्मतया सर्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तःप्रवेशार्हं चकारात् स्थूलेभ्यः पृथिव्यादिभ्यः स्थूलं यस्मिन् लोकिनो लोकवासिनश्च निहिताः स्थितास्तदित्यर्थः ॥ २ ॥

तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः ।
तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सौम्य ! विद्धि ॥ ३ ॥

तदेतत्सर्वाधारभूतमक्षरं ब्रह्म स प्राणः तदु तदेव वाङ्मनः प्राणादिकं सर्वं तदात्मकमित्यर्थः । सत्यं कालत्रयाबाध्यं अमृतममृतव-त्स्वादुतया सुखभोग्यं, हे सौम्य ! तद्ब्रह्म वेद्धव्यं एकाग्रमनोविषयं विद्धि तत्र मनःसमाधानं कर्तव्यमित्यर्थः ॥ ३ ॥

वेधनप्रकारमाह—

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत ।
आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य! विद्धि ॥ ४ ॥

'धनुरिति'। औपनिषदमुपनिषत्सु प्रसिद्धं प्रणवं महच्च तदस्त्रं च महास्त्रं धनुर्गृहीत्वा तस्मिन् शरं जीवं उपासया भगवद्ध्यानार्चनादिरू-पया निशितं तीक्ष्णीकृतं संस्कृतं सन्धानं कुर्यात् । सन्धाय च तस्मिन् लक्ष्ये भावनातद्गतेन चेतसा तत्प्राप्त्येच्छया शरमायम्य सेन्द्रियान्तः-करणं तद्विषयान्तरविमुखीकरणपूर्वकं लक्ष्याभिमुखीकृत्येत्यर्थः, लक्ष्यं तदेव पूर्वोक्तलक्षणं हे सौम्य ! विद्धि जानीहीत्यर्थः ॥ ४ ॥

उक्तार्थं विवृणोति—

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ५ ॥

'प्रणव इति'। धनुरिवात्मरूपशरसमर्पणहेतुरित्यर्थः, "ओमि-त्यात्मानं युञ्जीत" इति श्रुत्यन्तरात् । अप्रमत्तेन सर्वविषयतो विरक्ते-नैकाग्रचित्तेन वेद्धव्यम्, स्वात्मत्वेनानुसन्धानं हि वेधः । ततश्च शरवत्तन्मयो भवेत् । यथा शरस्य लक्ष्ये निमग्नत्वेन लक्ष्याद्भेदकाकारो न स्फुरति, एवं "निरञ्जनः परमं साम्यमु-पैतीत्याद्युक्त" तत्साम्यापन्नस्य ज्ञानैकस्वरूपस्य प्रत्यगात्मनोऽपि देवत्वा-दिलक्षणभेदकाकारो न स्फुरति इति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोक्तस्यैव दार्ढ्यार्थं पुनराह—

यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः।
तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुः ॥६॥

'यस्मिन्निति' । यस्मिन् द्युपृथिव्यादिकमोतं समवेतं तमेवैकम्, एवैकशब्दौ साम्यातिशयव्यवच्छेदपरौ, साम्यातिशयशून्य-स्वेतरसमस्तनियन्तारमात्मानं परब्रह्मभूतं भगवन्तं जानथ जानीत अन्या अन्यदेवविषया अनात्मविषयो वा वाचो विमुञ्चथ परित्यजत। यतोऽमृतस्यैष सेतुः कूलप्रापकनद्यादिसेतुरिव एष परमात्मा संसारमहोधेः पारभूतस्यामृतत्वस्य मोक्षस्य प्रापक इत्यर्थः ॥ ६ ॥

अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः। ॐइत्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥ ७ ॥

किञ्च रथनाभौ समर्पिता अरा इव "सन्ततं च शिराभिस्तु लंवत्याकोशसन्निभमिति" श्रुत्यन्तरोक्तरीत्या यत्र हृदये नाड्यः संहताः सङ्गताः तत्र हृदये अन्तर्मध्ये स एष प्रकृत आत्मा चरते वर्त्तते। किम्भूतः "अजायमानो बहुधा विजायत" इत्यादि श्रुत्यन्तरोक्तरीत्या भक्तानां समाश्रयणीयत्वाय तज्ज्ञानाय च स्वरूपसंस्थानगुणादिसंयुतः स्वस्वभावमजहदेव स्वेच्छया बहुधाऽनेकरूपेण जायमान इत्यर्थः। तमात्मानमोमित्येवं तद्वाचकौकारावलम्बनाः सन्तो ध्यायथ । एवं तमसः प्रकृतेः परस्तात्परस्मैं पाराय परतीराय प्राप्य भूताय तुमर्थे चतुर्थी च तत्प्राप्तुं प्रवृत्तेभ्यो वो युष्मभ्यं स्वस्ति मङ्गलं भवत्वित्यर्थः॥७॥

स कस्मिन् वर्तत इत्याह—

यः सर्वज्ञः सर्ववित् तस्यैष महिमा भुवि ।
दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ॥ ८ ॥

यः सर्वज्ञः सर्ववित् यस्य भुवि भूलोके लीलाविभूतौ एष प्रसिद्धः सर्वशासनरूपो महिमा। स एष आत्मा दिव्ये द्योतमाने ब्रह्मपुरे परमव्योम्नि वैकुण्ठाख्ये त्रिपाद्विभूतौ प्रतिष्ठित इति ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ।
तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥९॥

मनोमयः शमदमादिसाधनासहकृतपरमात्मोपासननिर्मलीकृतेन मनसा ग्राह्यः सर्वप्राणिधारकः प्राणः शरीरमाधेयं नियम्यभूतं यस्य स चासौ नेता प्रभुश्चेति 'स प्राणशरीरो भारूप' इति श्रुत्यन्तरात्, यद्वा जीवस्य प्राणशरीरयोः प्रापकः अन्ने भुज्यमानाऽन्नपरिणामे शरीरे अन्तर्यामितया प्रतिष्ठितस्तस्मिन् हृदयं चित्तं सन्निधाय अमृतं संसारातीतमानन्दरूपं दुःखलेशशून्यं यद्विभाति तद्ब्रह्म विज्ञानेन निदिध्यासनपरिपाकजन्यध्रुवास्मृत्याख्यापरोक्षज्ञानेन धीराः परिपश्यन्ति साक्षात्कुर्वन्तीत्यर्थः ॥ ९ ॥

परमात्मसाक्षात्कारस्य फलमाह—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ १० ॥

'भिद्यते' इति । तस्मिन् सर्ववेदान्तप्रसिद्धे ब्रह्मणि श्रीपुरुषोत्तमे दृष्टे साक्षात्कृते सति हृत्स्थानमयते इति हृदयो जीवस्तस्य ग्रन्थिः, यद्वा अस्य साक्षाद् द्रष्टुः हृदयग्रन्थिः हृदयस्थो ग्रन्थिरिव दुर्मोच्यो देहे तत्सम्बन्धिष्वहन्ताममतात्मकोऽनादिकर्मनिरूपितमायासम्बन्धः, 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मस्वि'ति श्रीमुखोक्तेः, भिद्यते ध्वंसमापद्यते स्वयमेवेति कर्मकर्तृ प्रयोगः साधनान्तरनिरपेक्षत्वद्योतनार्थः । सूर्य्यप्रकाशे तमोवत् तत्कार्य्यभूताः सर्वसंशयाः आत्मपरमात्मसाधनफलसम्बन्धादिविषयकाः स्वयमेव छिद्यन्ते 'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष' इति श्रुत्यन्तरात् । तत्र हेतुः 'क्षीयन्ते चास्ये'ति । अस्य भगवत्प्रसादैकविषयस्य चरमजन्मनो विदुषः सञ्चितक्रियमाणप्रारब्धाख्यानि सर्वकर्माणि पुण्यापुण्यरूपाणि क्षीयन्ते क्षयं फलजननशक्तिनाशमापद्यन्ते । परमेश्वरं विशिनष्टि परावरे लोकदृष्ट्या मनुष्यादिभ्यः परे उत्कृष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मादयोऽवरे निकृष्टा यस्मादित्यर्थः । अस्य विस्तरस्तु चतुर्थाध्यायचतुर्थपादकौस्तुभप्रभायां द्रष्टव्यः ॥ १० ॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ ११ ॥

हिरण्मये कमनीये स्वप्रकाशे वा परे उत्कृष्टे परमपदे कोशे कोश इवात्युत्कृष्टपदार्थोपलब्धिस्थानत्वात्तत्तुल्ये विरजं रजोपलक्षितप्राकृतगुणशून्यं ब्रह्म स्वरूपगुणादितो बृहत्तमवस्तु निष्कलं दिव्यालङ्करणोपेतं कलाः पञ्चभूतानि तद्रहितं वा भौतिकशरीरशून्यमिति यावत् । यद्वा तद्धस्तपादादीनामपि सच्चिदानन्दस्वरूपत्वाद्धेयप्राकृतावयवशून्यम् । अत एव तत् शुभ्रं शुद्धं ज्योतिषां प्रकाशकानां सूर्य्यादीनामपि ज्योतिः प्रकाशकं यदात्मतत्त्वं तदात्मविदो विदुर्जानन्ति ॥ ११ ॥

सूर्य्यादिप्रकाशकत्वं सप्रपञ्चमाह—

न तत्र सूर्य्यो भाति न चन्द्रतारका नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १२ ॥

'नेति' । तत्र तस्मिन् स्वप्रकाशे ब्रह्मणि सूर्य्यादयो न भान्ति प्रकाशं न कुर्व्वन्ति तदीयतेजसा अभिभूतत्वात्कुतोऽयमस्मद्गोचरोऽग्निस्तत्र प्रकाशेत । ननु प्रत्यक्षतोऽनुभूयमानेष्वतिभास्वररूपवत्सु सूर्य्यादिषु न भान्तीति विरुद्धं कथमभिधीयते इति चेत्तत्राह 'तमेवेति' । तमेव भगवन्तं भान्तं दीप्यमानमनु पश्चात्सर्वं सूर्य्यादिकं भाति इति सूर्य्यादेः भास्वररूपं भगवद्दत्ततया भगवदीयमेव न स्वीयं "यस्यादित्यो भामुपयुज्य भाती"त्यादिश्रुतेः, "तत्तेजो विद्धि मामकमि"ति भगवदुक्तेश्च । अधिष्ठानब्रह्मरूपभानव्यतिरिक्तशून्यत्वमध्यस्तप्रपञ्चस्येति परोक्तं त्वयुक्तम् , अनुशब्दस्य वैयर्थ्यापत्तेः । नहि तिष्ठति यज्ञदत्ते देवदत्तं गच्छन्तं यज्ञदत्तोऽनुगच्छतीति प्रयोगो दृष्टचरः । वह्निमेव दहन्तमयोऽनुदहतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ।
तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥९॥

मनोमयः शमदमादिसाधनासहकृतपरमात्मोपासननिर्मलीकृतेन मनसा ग्राह्यः सर्वप्राणिधारकः प्राणः शरीरमाधेयं नियम्यभूतं यस्य स चासौ नेता प्रभुश्चेति 'स प्राणशरीरो भारूप' इति श्रुत्यन्तरात्, यद्वा जीवस्य प्राणशरीरयोः प्रापकः अन्ने भुज्यमानाऽन्नपरिणामे शरीरे अन्तर्यामितया प्रतिष्ठितस्तस्मिन् हृदयं चित्तं सन्निधाय अमृतं संसारातीतमानन्दरूपं दुःखलेशशून्यं यद्विभाति तद्ब्रह्म विज्ञानेन निदिध्यासनपरिपाकजन्यध्रुवास्मृत्याख्यापरोक्षज्ञानेन धीराः परिपश्यन्ति साक्षात्कुर्वन्तीत्यर्थः ॥ ९ ॥

परमात्मसाक्षात्कारस्य फलमाह—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ १० ॥

'भिद्यते' इति । तस्मिन् सर्ववेदान्तप्रसिद्धे ब्रह्मणि श्रीपुरुषोत्तमे दृष्टे साक्षात्कृते सति हृत्स्थानमयते इति हृदयो जीवस्तस्य ग्रन्थिः, यद्वा अस्य साक्षाद् द्रष्टुः हृदयग्रन्थिः हृदयस्थो ग्रन्थिरिव दुर्मोच्यो देहे तत्सम्बन्धिष्वहन्ताममतात्मकोऽनादिकर्मनिरूपितमायासम्बन्धः, 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मस्वि'ति श्रीमुखोक्तेः, भिद्यते ध्वंसमापद्यते स्वयमेवेति कर्मकर्तृप्रयोगः साधनान्तरनिरपेक्षत्वद्योतनार्थः । सूर्य्यप्रकाशे तमोवत् तत्कार्य्यभूताः सर्वसंशयाः आत्मपरमात्मसाधनफलसम्बन्धादिविषयकाः स्वयमेव छिद्यन्ते 'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष' इति श्रुत्यन्तरात् । तत्र हेतुः 'क्षीयन्ते चास्ये'ति । अस्य भगवत्प्रसादैकविषयस्य चरमजन्मनो विदुषः सञ्चितक्रियमाणप्रारब्धाख्यानि सर्वकर्माणि पुण्यापुण्यरूपाणि क्षीयन्ते क्षयं फलजननशक्तिनाशमापद्यन्ते । परमेश्वरं विशिनष्टि परावरे लोकदृष्ट्या मनुष्यादिभ्यः परे उत्कृष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मादयोऽवरे निकृष्टा यस्मादित्यर्थः । अस्य विस्तरस्तु चतुर्थाध्यायचतुर्थ पादकौस्तुभप्रभायां द्रष्टव्यः ॥ १० ॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ ११ ॥

हिरण्मये कमनीये स्वप्रकाशे वा परे उत्कृष्टे परमपदे कोशे कोश इवात्युत्कृष्टपदार्थोपलब्धिस्थानत्वात्तत्तुल्ये विरजं रजोपलक्षितप्राकृत-गुणशून्यं ब्रह्म स्वरूपगुणादितो बृहत्तमवस्तु निष्कलं दिव्यालङ्करणोपेतं कलाः पञ्चभूतानि तद्रहितं वा भौतिकशरीरशून्यमिति यावत् । यद्वा तद्धस्तपादादीनामपि सच्चिदानन्दस्वरूपत्वाद्धेयप्राकृतावयव-शून्यम् । अत एव तत् शुभ्रं शुद्धं ज्योतिषां प्रकाशकानां सूर्य्यादीना-मपि ज्योतिः प्रकाशकं यदात्मतत्त्वं तदात्मविदो विदुर्जानन्ति ॥ ११ ॥

सूर्य्यादिप्रकाशकत्वं सप्रपञ्चमाह—

न तत्र सूर्य्यो भाति न चन्द्रतारका नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १२ ॥

'नेति' । तत्र तस्मिन् स्वप्रकाशे ब्रह्मणि सूर्य्यादयो न भान्ति प्रकाशं न कुर्व्वन्ति तदीयतेजसा अभिभूतत्वात्कुतोऽयमस्मद्गो-चरोऽग्निस्तत्र प्रकाशेत । ननु प्रत्यक्षतोऽनुभूयमानेष्वतिभास्वररूपवत्सु सूर्य्यादिषु न भान्तीति विरुद्धं कथमभिधीयते इति चेत्तत्राह 'तमेवेति' । तमेव भगवन्तं भान्तं दीप्यमानमनु पश्चात्सर्वं सूर्य्यादिकं भाति इति सूर्य्यादेः भास्वररूपं भगवद्दत्ततया भगवदीयमेव न स्वीयं "यस्यादित्यो भामुपयुज्य भाती"त्यादिश्रुतेः, "तत्तेजो विद्धि मामकमि"ति भगवदुक्तेश्च । अधिष्ठानब्रह्मरूपभानव्यतिरिक्तशून्यत्वमध्यस्तप्रपञ्चस्येति परोक्तं त्वयु-क्तम् , अनुशब्दस्य वैयर्थ्यापत्तेः । नहि तिष्ठति यज्ञदत्ते देवदत्तं गच्छन्तं यज्ञदत्तोऽनुगच्छतीति प्रयोगो दृष्टचरः । वह्निमेव दहन्तमयोऽनुदहतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्स्यादिति चेत्, अयसः पृथग् दग्धृत्वाभावात् अतस्तस्य भगवत एव भासा दीप्त्या इदं सर्वं जगद्विभातीति ॥ १२ ॥

उपसंहरति—

ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ १३ ॥

इति द्वितीय मुण्डकः द्वितीयः खण्डः

'ब्रह्मैवेति'। पुरस्तादित्यादिसर्वदिक्षु यदिदं प्रसृतं दृश्यमानं तत्सर्वममृतमस्पृष्टसंसारगन्धं ब्रह्मैव किं बहुना विश्वं समस्तमिदं जगत् वरिष्ठं वरणीयतमं ब्रह्मैवेति सर्वस्य तत्कार्य्यत्वतदात्मकत्वतदाधेयत्वतद्व्याप्यत्वादिना तदभिन्नत्वात् ॥ १३ ॥

॥ इति द्वितीय मुण्डकः द्वितीयः खण्डः ॥

अथ तृतीय मुण्डकः

प्रथम खण्डः

जीवपरयोर्देहानुप्रवेशे प्रकृतिसम्बन्धवत्त्वाविशेषेपि जीवस्यैव प्रकृतिसम्बन्धजन्यफलभोक्तृत्वं न तु परस्येतद्दृष्टान्तयन्नाह—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १ ॥

'द्वेति'। द्वेत्यादिषु सुपां सुलुगित्यनेन औङ् आकारादेशः। द्वौ जीवपरौ सुपर्णौ गमनसाधनतया पर्णशब्दोक्तपक्षतुल्यज्ञानादिगुणवन्तौ। सयुजौ नित्यसम्बन्धिनौ, यद्वा युज्यत इति युक् युक्शब्दो गुणपरः समानगुणकौ, सखायौ चैतन्यादिना समानख्यानौ उपकार्योपकारकभावेन वर्तमानौ वा परस्पराविनाभूतौ वा, समानमेकं वृश्च्यते छिद्यते इति वृक्षस्तं वृक्षवच्छेदनयोग्यं शरीरं परिषस्वजाते परिष्वज्य वर्त्तेते। तयोर्द्वयोर्मध्ये अन्यः शरीराद्भिन्नो जीवस्तत्रासक्तः सन् पिप्पलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरसम्बन्धकृतकर्मफलं स्वादु यथा तथा अत्ति भुनक्ति। अनश्नन्नन्यः द्वाभ्यां भिन्नः द्वयोर्नियन्तृतया वर्तमानः परमात्मा तत्रानासक्तस्तत्फलान्यनश्नन्नेवाभितोऽतिशयेन प्रकाशते। अत्र वृक्षादिशब्देषु योगवशाच्छरीरादिप्रतीतिर्न तु रूपकातिशयोक्तिः॥ १॥

जीवस्यासक्तिं दर्शयन् परमात्मदर्शनात्तस्य मोक्षमाह—

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥२॥

'समाने इति'। समाने एकस्मिन् वृक्षे वृक्षलक्षणयुक्ते देहे अनीशया ईश्वराधीनया कर्मात्मिकाविद्यया भोग्यभूतयाऽस्त्र्यादिमय्या प्रकृत्या वा अनीशत्वेनासमर्थत्वेन मुह्यमानो मोहं प्राप्नुवन् पुरुषु देहेषु सीदति कर्मवशतया गच्छति इति पुरुषो जीवः नितरां मग्नः कृशोऽहं स्थूलोऽहं कालोऽहं खञ्जोऽहमिति तादात्म्यबुद्ध्या तदेकतामापन्नः सन् शोचति तत्सम्बन्धजन्यसुखदुःखान्यनुभवति। यदा तु जुष्टं ब्रह्मादिसेवितं स्वस्मिन्वाऽनेकजन्मकृतपुण्यपुञ्जैः प्रीतं स्वस्मादन्यं स्वामितया नियन्तृतया मोक्षदातृतया च भिन्नमीशं परमात्मानं पश्यति साक्षात्करोति तदा वीतशोकः सन् अस्य महिमानं सार्वज्ञ्यादिलक्षणं तत्साम्यापत्तिमिति एति प्राप्नोतीत्यर्थः॥२॥

यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥३॥
प्राणो ह्येष सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी।
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः॥ ४॥

यदा यस्मिन् काले अनेनोत्तरायणादिकालव्यावृत्तिः, पश्यो भगवत्स्वरूपगुणशक्त्यादिसाक्षात्कारानुभवाश्रयः पुरुषं पश्यते अपरोक्षेण स्वात्मतयाऽनुभवति। तदा विद्वान् पुण्यपापे विधूय निरस्य निरञ्जनः प्रकृतितत्कार्यदेहादिसम्बन्धलक्षणोपाधिविनिर्मुक्तः सन् साम्यमुपैति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यन्वयः। पुरुषं विशिनष्टि रुक्मवर्णं कमनीयवर्णं प्रकाशमानं सौन्दर्यलावण्यसौकुमार्यमाधुर्य्यमार्दवसौगन्ध्यसौशील्याद्यनन्तकल्याणगुणाश्रयपरमयोगिध्येयव्यातृकर्मभर्जिष्णुसर्वपुरुषार्थसुरद्रुमदिव्यमङ्गलविग्रहयुक्तमिति यावत्, "आदित्यवर्णं तमसः परस्तात् आप्रणखात् सुवर्णं परस्तात् आप्रणखात्सुवर्णः हिरण्यकेशः हिरण्यश्मश्रु"रित्यादिश्रुत्यन्तरात्, अनेन नीरूपस्यैव ब्रह्मणो दर्शनं मोक्षहेतुरिति मन्यमाना निरस्ताः। जीवेऽतिव्याप्तिं वारयन् आह 'कर्त्तारमिति'। जगत इति शेषः। तत्र हेतुरीशं नियन्तारम्। चतुर्मुखेऽपि तयोः सत्त्वात्तद्व्यावृत्त्यर्थमाह ब्रह्मयोनिं चतुर्मुखस्यापि कारणं "यो ब्रह्माणं विदधाति" इति श्रुतेः, यद्वा वेदस्यापि विधिद्वारेणेशनशीलत्वाज्जगन्निमित्तत्वाच्च तद्व्यावृत्तिर्वेदस्यापि कारणमित्यर्थः। साम्यं विशिनष्टि 'परममिति'। अपहतपाप्मत्वादिलक्षणब्रह्मरूपेण सार्वज्ञ्यादिगुणेन च साम्यात्परमत्वमित्यर्थः। एषः प्रकृतः प्राणशब्दनिर्दिष्टः परमात्मा सर्वभूतैः इत्थंभूतलक्षणे तृतीया सर्वभूतेराश्रितः सर्वभूतान्तरात्मा सन् विभाति विविधं प्रकाशते। तं विशेषेण श्रवणादिना जानन् विद्वानुपासीनस्तेन ब्रह्मणाऽतिवादी भव स्वोपास्यदेवताया रम्यवदनशीलो भवेत्यर्थः। आत्मनि तस्मिन्नेव क्रीडा यस्य नोपजनादिषु आत्मन्येव रतिः प्रीतिर्यस्य न स्रक्चन्दनादौ क्रियावान् फलानुसन्धानशून्यकर्मानुष्ठानकर्ता च भवेत्यर्थः। एवं निष्कामकर्मणा शुद्धान्तःकरणे विद्यानिष्पत्तेरेष विद्वान् ब्रह्मविदां वरिष्ठः श्रेष्ठो भवतीत्यर्थः॥ ३, ४॥

मुमुक्षोः सम्यग्ज्ञानसहकारीणि साधनानि विधीयन्ते—

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।
अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः॥५॥

'सत्येनेत्यादिना'। एष आत्मा सत्येन मृषावदनत्यागेन लभ्य उपासनद्वारा प्राप्यः। किञ्च तपसा हि इन्द्रियमनसामेकाश्रयलक्षणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्युक्तसत्यज्ञानादिनाम 'आदित्यवर्णं तमसः परस्ता'दित्यादि श्रुत्युक्ताऽप्राकृतरूपं च प्राश्नोपनिषदि स्पष्टम् । यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे समुद्र इत्येवोच्यत इत्यादिना ॥ ८ ॥

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति । तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥

'स इति'। यः कश्चिद्ध वै किल लोकं तत्परमं ब्रह्म वेद स ब्रह्मैव भवति ध्वस्तावरणप्रभाविशिष्टदीपवदाविर्भूतबृहद्ज्ञानगुणविशिष्टो भवतीत्यर्थः। आनुषङ्गिकप्रयोजनमाह नास्य विदुषः कुले अब्रह्मविद भवति। किञ्च शोकमिष्टवैकल्यनिमित्तं मानसं तापं पापं च तरति अतिक्रामति । गुहाग्रन्थिभ्यः अनादिकर्मनिरूपितमायासम्बन्धतत्कार्यरागद्वेषादिभ्यो विमुक्तः सन् अमृतो मुक्तो भवत्याविर्भूतापहतपाप्मत्वादिगुणाष्टकविशिष्टो भवतीत्यर्थः ॥ ९ ॥

एतद्ग्रन्थद्वारकब्रह्मविद्यासम्प्रदाने विधिमुपदर्शयन्नुपसंहरति—

तदेतदृचाभ्युक्तं क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत् शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥

'तदिति'। तद्विद्यासम्प्रदानविधानमभिमुखीकृत्य ऋचा मन्त्रेणोक्तम् क्रियावन्तः नित्यनैमित्तिककर्मानुष्ठानयुक्ताः, श्रोत्रियाः अधीतश्रुतयः, ब्रह्मनिष्ठा ब्रह्मबोद्धुमिच्छवः, श्रद्धयन्तः सन्तः एकऋषि एकर्षिरूपान्नसाध्यतया एकर्षिशब्दोदितमग्निहोत्रं स्वयं जुह्वते ये तेषामेवैतां ब्रह्मप्रतिपादिकामुपनिषद्रूपां विद्यां प्रब्रूयात्। शिरोव्रतं शिरस्यङ्गारधानिकाधारणलक्षणाथर्वणानां वेदव्रतत्वेन प्रसिद्धं यैस्तु यथाविधि चीर्णमनुष्ठितम् तेषामेव च वदेत् नान्येषाम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तविज्ञान सुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥ ६ ॥

वेदान्तेऽपि यतयो यतनशीलाः सम्यक् सर्वकर्मफलत्यागलक्षण-योगात् शुद्धान्तःकरणास्ततो वेदान्तजनितविज्ञानेन सुष्ठु निश्चितार्था ज्ञातस्वपरस्वरूपास्ते परान्तकाले उत्कृष्टे अन्तकाले चरमशरीरावसाने परमात्मलोकेषु परामृताः परामृतं ब्रह्म प्राप्तास्ते सर्वे परिमुच्यन्ति परि-सर्वतो निःशेषाविद्यया विमुक्ता भवन्तीत्यर्थः, 'भूयश्चान्ते विश्वमाया-निवृत्तिरिति' श्रुत्यन्तरात् । ते ब्रह्मलोकेतु परान्तकाले परामृतादिति पाठे ब्रह्मैव लोकस्तत्र स्थितास्तन्निष्ठा इत्यर्थः परामृतात् उपासनप्रसन्नाद्-ब्रह्मणो हेतोरित्यर्थः ॥ ६ ॥

गताः कलाः पञ्चदशप्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।
कर्म्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ॥७॥

किञ्च मुच्यमानस्य जीवस्य या उपकरणभूताः प्राणादिनामान्त-षोडशकलासु कर्म्व्यतिरिक्ताः पञ्चदशकलास्ताः स्वाः प्रतिष्ठागताः स्वका-रणं प्राप्ता भवन्ति । देवाश्चेन्द्रियाणि प्रतिदेवतासु तदधिष्ठात्रादित्या-दिषु संयोगविशेषं प्राप्नुवन्ति यानि च तत्कृतानि कर्म्माण्यप्रवृत्तफलानि तानि विज्ञानमय आत्मा च एते सर्वे सर्वस्मात् परेऽव्यये ब्रह्मणि एकी-भवन्ति । कर्मणां तत्रैकीभावस्तज्ज्ञाने नाशः जीवस्यैकीभावो नाम रूपविमुक्तः ॥ ७ ॥

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥८॥

'यथेति' । यथा स्यन्दमाना गच्छन्त्यो नद्यः समुद्रं प्राप्य नाम-रूपे विहाय च भगवती-भागीरथीत्यादिशुक्ला-नीलेत्यादिनामरूपाभ्यां विमुक्ताः सन्त्योऽस्तं गच्छन्ति समुद्रे समुद्रसाधारणनामरूपे भजन्ति । तथा विद्वान् अपि नामरूपात् देवदत्ततिर्यगादिलक्षणाद्विमुक्तः परात्परं पुरुषं परमात्मानमुपैति । परमात्मासाधारणनामरूपे सत्यं ज्ञानमित्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥३॥

'नायमिति' । यत्कामयमानस्य कामा इहैव प्रविलीयन्ति सोऽयमात्मा प्रवचनेन शास्त्राध्ययनबाहुल्येन न लभ्यः, तथा मेधया ग्रन्थार्थधारणशक्त्या भूयसा श्रवणेन च न लभ्यः । यद्वा मेधाशब्दो निदिध्यासनपरस्तत्साधनत्वात्प्रवचनशब्दो मननपरः श्रवणादिभिः केवलैर्न लभ्य इत्यर्थः । तर्हि केन लभ्य इत्यत्राह यमिति । यमुपासकमेष परमात्मा वृणुते आत्मसात्करोति । तेनात्मीयेन तत्प्रियतमेन लभ्यः तस्य प्रियतमस्योपासकस्यैष आत्मा स्वां तनुं मूर्तिं विवृणुते प्रकाशयति प्रत्यक्षीभवतीत्यर्थः ॥ ३ ॥

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वान् तस्यैष आत्मा विशते ब्रह्म धाम ॥४॥

अयमात्मा बलहीनेन दैन्यवता न लभ्यः तथा प्रमादात् विषयासङ्गनिमित्तानवहितचित्तात् लिङ्गरहितात्तपसस्तपः प्रधानसंन्यासाश्रमात् । उपलक्षणमेतत् आश्रमान्तरस्यापि लिङ्गशून्यैः सर्वैराश्रमैर्न लभ्य इत्यर्थः । यस्तु विद्वान ब्रह्मप्राप्त्यर्थं एतैरुपायैर्बलाप्रमादसलिङ्गाश्रमैर्यतते तस्यैष आत्मा स्वरूपं धाम प्राप्तं ब्रह्म विशते प्राप्नोति ॥ ४ ॥

संप्राप्यैनमृषयो ज्ञानतृप्ताःकृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥५॥

ऋषयस्तत्त्वदर्शिन एनं परमात्मानं सम्प्राप्य सम्यग्ज्ञात्वाऽनुभूय तेन ज्ञानतृप्ताः सन्तुष्टाः कृतात्मानः ज्ञातात्मतत्त्वाः संयतमनसो वा वीतरागा विगतविषयाभिलाषाः अत एव प्रशान्ता उपरतेन्द्रियाश्च ये ते सर्वतः सर्वदेशकालावच्छेदेन सर्वगमन्तर्बहिश्च सर्वव्यापिनं परमात्मानं देशविशेषे प्राप्य धीमन्तो युक्तात्मानः आविर्भूतापहतपाप्मत्वादिगुणविशिष्टात्मानः सन्तः सर्वमेवाविशन्ति धर्म्मभूतज्ञानेन सर्वमनुभवन्तीति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्नोति । यतो लोकादीन्प्राप्तुमन्येभ्यः प्रापयितुं चायं समर्थस्तस्मादैश्वर्य्यकाम आत्मज्ञं पूजयेत् ॥ १० ॥

इति प्रथमखण्डः ।

अथ द्वितीय खण्डः

आत्मज्ञपूजाफलमाह—

स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम् ।
उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १ ॥

'स इति' । स प्रकृत आत्मवित् एतत्पूर्वोक्तलक्षणं परमं सर्वोत्कृष्टं धाम सर्वकामास्पदभूतं ब्रह्म वेद जानाति यस्मिन् ब्रह्मणि विश्वं समस्तं जगन्निहितं अर्पितम्, यच्च ब्रह्म शुभ्रं शुद्धं भाति स्वयं प्रकाशते, यद्वा यस्मिन् विश्वं सर्वकर्मनिहितं समर्पितं सत् शुभ्रं निर्मलं भाति तदेतद्ब्रह्म स वेद तादृशमात्मानं ये निष्कामा मुमुक्षवः सन्त उपासते ते एतत् शुक्रं चरमधातुमतिक्रम्य वर्तन्ते न पुनर्जायन्त इत्यर्थः ॥ १ ॥

मुमुक्षोः कामत्यागमेव मुख्यतया दर्शति—

कामान्यः कामयते मन्यमानः सकामभिर्जायते तत्र तत्र ।
पर्य्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामः ॥२॥

'कामानिति' । यस्तु भोग्यतया मन्यमानो यान् कामाननिष्टविषयान् देवत्वादीन् कामयते प्रार्थयति स तेषु तेषु विषयेषु देवत्वादिषु कामप्रेरितः सन् कामभिः कामैः प्रवृत्तिहेतुभिर्विषयेच्छारूपैः सह देवादिरूपेण जायते । पर्याप्तकामस्य परिपूर्णब्रह्म कामयसानस्य कृतात्मनो ज्ञातात्मतत्त्वस्य तु इहैवात्रैव जन्मनि सर्वे कामा विषयेच्छारूपाः प्रविलीयन्ति नश्यन्ति न जन्मान्तरप्राप्तिरित्यर्थः । कृ धातोः शास्त्रवित्करोतीतिवत् ज्ञानार्थत्वम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्षुषा प्राकृतचक्षुषा वाचा वेदवाण्याऽपि इयत्तया न गृह्यते देवैरिन्द्रियैरतीन्द्रियत्वात् तपसा कर्मणा वाग्निहोत्रादिना न गृह्यते । तर्हि कथं गृह्यते तत्राह 'ज्ञानेति' । ज्ञानशब्दः परमात्मवाची "प्रज्ञा च तस्मात्प्रसृता पुराणीति" श्रुतेस्तस्य ज्ञानप्रसरणहेतुत्वात् । निष्कलमुक्तार्थं परमात्मानं ध्यायमानो मुमुक्षुस्तत्प्रसादेन विशुद्धान्तःकरणो भवति ततस्तु तं पश्यते ध्रुवास्मृत्या तं स्वानुभवविपर्याकरोतीत्यर्थः ॥ ८ ॥

एवं तत्पदार्थमुक्त्वा तच्छक्तिभूतत्वं पदार्थस्वरूपमाह—

एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश । प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा ॥ ९ ॥

'एष इति' । अणुरणुपरिमाणक एष आत्मा जीवात्मा चेतसा विशुद्धमनसा वेदितुं योग्यः । एषः कस्तत्राह 'यस्मिन्निति' । प्राणापानादिरूपेण पञ्चप्रकारः प्राणो यस्मिन् संविवेश यदाश्रितः स इत्यर्थः । किञ्च यस्मिन् प्राणैरिन्द्रियैः सह प्रजानां सर्वचित्तमन्तःकरणमोतं समवेतं क्षीरमिव सर्पिषा येन व्याप्तं "सर्वस्य चाहं हृदि संनिविष्ट" इति श्रीमुखोक्तेः यस्मिन् परमात्मनि विशुद्धे प्रसन्ने सति एष जीवात्मा विभवति विशेषणाविभूतापहतपाप्मत्वादिगुणाष्टको भवतीत्यर्थः ॥ ९ ॥

आत्मज्ञप्रशंसामाह—

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ १० ॥

इति प्रथमः खण्डः

'यमिति' । विशुद्धसत्वो निर्मलान्तःकरण आत्मज्ञो यं यं लोकं जनं मित्रादिरूपं मनसाऽऽप्तं विभाति सङ्कल्पयति यांश्च कामान् स्त्रीपुत्रादीन् प्रार्थयते तं तं लोकं तांश्च सङ्कल्पितान् कामान् जयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः" इति स्मृतेः, सम्यग्ज्ञानेन चागमोत्पन्नेन ब्रह्मचर्य्येण च स्त्रीसङ्गादित्यागेन लभ्य इत्यनुषङ्गः। नित्यं सर्वदा नित्यमिति अन्धदीपकन्यायेन सत्यादिषु सर्वेष्वभिवक्तव्यम्। किंभूतः ज्योतिर्मयो ज्ञानमयः शुभ्रः सर्वदोषशून्यः। कोऽसौ तत्राह अन्तःशरीरे शरीरस्यान्तर्मध्ये हृदयकमले यतयो जितेन्द्रियाः क्षीणदोषाः रागादिदोषरहिताः योगिनो यं पश्यन्ति एष इत्यर्थः ॥ ५ ॥

सत्यं स्तौति—

सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः।
येनाक्रमत्पृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥

सत्यमेव सत्यवानेव नानृतवादीत्यर्थः। लोके सत्यवादिनाऽनृतवादि पराभवो दृश्यते। अर्चिरादिरूपेण विस्तीर्णो देवयानाख्यः पन्थाः सत्येन भवति। येन पथा ऋषयस्तत्त्वविदो ह्याप्तकामाः प्राप्तसर्वकामाः सन्तः तत्राक्रमन्ति गच्छन्ति, यत्र स्थाने सत्यस्य सत्यवचनस्य तत्परं सर्वोत्कृष्टप्रयोजनभूतं निधानं प्राप्यरूपेण निधीयते व्रजते तत्रेत्यर्थः ॥६॥

देवयानपथा प्राप्यवस्तु विशिनष्टि—

बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।
दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥७॥

'बृहच्चेति'। तत्प्रकृतं वस्तु स्वरूपतो गुणतश्च बृहत् दिव्यं स्वयंज्योतिः अचिन्त्यरूपमियत्तया चिन्तनानर्हकमनीयरूपयुक्तं सूक्ष्माज्जीववर्गादपि सूक्ष्मतरं तस्याप्यन्ततः प्रविष्टत्वात् विभातीति विशेषेण दीप्यते। किञ्च दूरात्सुदूरे प्रकृतेः पारभूते परमपदे इहन्तिके सूर्य्यमण्डलादौ पश्यत्सु ब्रह्मदर्शिषु योगिषु इहैव गुहायां सर्वप्राणिनां हृदयाकाशे च निहितं स्थितमित्यर्थः ॥ ७ ॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते ।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ११ ॥

इति तृतीय मुण्डकः द्वितीय खण्डः ।

इति मुण्डकोपनिषत्समाप्ता ।

तदेतत् सत्यमक्षरमङ्गिरा ऋषिः पूर्वं शौनकाय यथोवाच तथाऽन्योपि मुमुक्षवे ब्रूयात् । एतद्ग्रन्थरूपमचीर्णव्रतो नाधीते न पठति । इयं ब्रह्मविद्या येभ्य ऐतिह्यक्रमेण प्राप्ता तान् ब्रह्मादीन् नमस्यति नम इति, द्विर्वचनं विद्यासमाप्तिद्योतनपरम् , सर्वोऽयं मुण्डकग्रन्थः परमात्मपरः ।

इति प्रथमाध्यायद्वितीयतृतीयपादयोरदृश्यत्वादिगुणको धर्मोक्ते द्युभ्वाद्यायतनस्वशब्दादित्यधिकरणद्वयकौस्तुभप्रभायां द्रष्टव्यः ॥ ११ ॥

॥ इति तृतीय मुण्डकः द्वितीय खण्डः ॥

मुण्डकोपनिषद्व्याख्या मिताऽस्तु सुगमाक्षरा ॥
सङ्गृहीता मया स्वीयबोधाय नान्यबुद्धये ॥ १ ॥
श्रीमुकुन्दप्रसादेन लब्धवेदान्तबुद्धिना ॥
ईक्षणीया मुदा सद्भिश्चापल्य क्षम्यतां मम ॥ २ ॥

इति सनकसम्प्रदायप्रवर्त्तकाद्याचार्य श्री १०८ श्री महामुनीन्द्रभगवन्निम्बार्काचार्योपबृंहितवैदिकानादिसत्सम्प्रदायानुगत निखिलशास्त्रपारावारीणातिविसृत्वरकीर्तिधवलीकृतदिङ्मण्डलेन स्वाभाविकद्वैताद्वैतसिद्धान्तसमर्थनदक्षजगद्विजय्याचार्य श्री १०८ केशवकाश्मीरि भट्टेन निर्मिता मुण्डकोपनिद्व्याख्या सम्पूर्त्तिमगात ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री निकुञ्जविहारिणेनमः

उपनिषत्प्रकाशिका टीका सम्वलिता

माण्डूक्योपनिषत्

आनन्दमजरं नित्यं निखिलगुणसागरम् ।
राधारमणमिष्टार्थं प्रपद्ये पुरुषोत्तमम् ॥ १ ॥
पान्तु नः वासुदेवस्य श्रीपादाम्बुजरेणवः ।
मूर्ध्नि दधुर्विधीशेन्द्राः यान्निजाभीष्टप्राप्तये ॥ २ ॥
निम्बभानुपदद्वन्द्वं प्रणमामि मुहुर्मुहुः ।
यद्वन्दनेन मन्दोऽपि लभते तत्समानताम् ॥ ३ ॥
श्रीनिवासं गुरुं वन्दे करुणा वरुणालयम् ।
बादरायणसूत्राणां भाष्यकारं मुनीश्वरम् ॥ ४ ॥
नत्वान्यान् देशिकान् मान्यान् पूर्वाचार्य्योक्तितः खलु ।
माण्डूक्योपनिषद् व्याख्यां करिष्येऽहं यथामति ॥ ५ ॥

विषयविरक्तस्य शमदमादिसाधनसम्पन्नस्य भगवद्दिदृक्षालम्पटस्य गुरुभक्तिसम्पन्नस्य मुमुक्षोरनिष्टनिवृत्तिपूर्वकं परमानन्दावाप्तये समस्तव्यस्तप्रणवप्रतिपाद्यस्य भगवतो वासुदेवस्य रमाकान्तस्योपास्तिमाह ।

ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥

टीका—अवरक्षणगतिकान्तिप्रवेशेत्यादिधातोः प्रवेशार्थकस्यावतेः कर्मणि मनिन् प्रत्यये प्रत्ययस्य टेर्लोपे ज्वरत्वरेत्यादिनोपधाकारस्य वकारस्य चोठि सवर्णे दीर्घे च सति ऊम् इति जायते । सार्वधातुकार्धधातुकयोरिति च गुणे च सति ओमिति निष्पन्नम् । ओतं प्रविष्टं चेतनाचेतनजातमस्मिन्नित्योम् । ओमिति प्रणवप्रतिपाद्यं यत् तदेतदक्षरं

फा, नं० २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यं ब्रह्मैव सन्निकृष्टतरवस्तुवाचको ह्येतच्छब्दः । परमात्मनः सर्वान्तरयामित्वेन सन्निहितत्वादेतदित्युच्यते । तदिदं प्रणववाच्यं ब्रह्मगुणपूर्णत्वात्सर्वमित्युच्यते । प्रागुपदर्शितं प्रणवस्याभिधेयमुक्तं प्रवृत्तिनिमित्तं किमिति जिज्ञासायां त्रिकालातीतत्वमित्याह । तस्येत्यादिना तस्य परब्रह्मण उपसमीपे वाचकत्वेन स्थितस्योङ्कारस्य विशेषेणाख्यानं प्रवृत्तिनिमित्तं कथ्यत इत्यर्थः । तत्किमित्यत आह । भूतमिति ओमित्युक्तं ब्रह्मभूतं भवद्भविष्यमिति योजना कालत्रये विद्यमानमक्षरं ब्रह्म सदैकरसमित्यर्थः । इदं सर्वमित्युक्तं पूर्णत्वमक्षरादन्यस्य नेत्याह सर्वमोङ्कार एवेति । ओंकार एव सर्वमिति योजना भूतं भवद्भविष्येत्युक्तं प्रवृत्तिनिमित्तं त्रिकालातीतत्वञ्चाक्षरादन्यस्य नेत्याह । यच्चेत्यादिना कालत्रयविकाररहितं त्रिकालातीतञ्च यदन्यद्वस्त्वति तदप्योङ्कार एव । ओंपदवाच्यमक्षराख्यं ब्रह्मैव न ततोऽन्यत्तादृशमित्यर्थः ॥ १ ॥

ब्रह्मणः पूर्णत्वं कुत इत्यतस्तत्र प्रमाणं सूचयन्नाह ।

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोयमात्मा चतुष्पात् ॥ २ ॥

टीका—एतद्ब्रह्मोंकारप्रतिपाद्यमक्षराख्यं परं ब्रह्म सर्वं गुण पूर्णमित्येतत् हि पूर्णमद इत्यादिश्रुतिप्रसिद्धम् । चतुर्मुखप्रभृतीनां प्रत्यगात्मनां नियन्तुः कस्यचित् पूर्णत्वत्रिकालातीतत्वयोः स्वीकर्त्तव्यत्वादवधारणमयुक्तमित्यतः सोऽपि परमात्मैवेत्याह अयमात्मा ब्रह्मैवेति । चतुर्मुखादिषु स्थितोऽयमात्माऽनादि कर्त्ता प्रतीयते सोऽपि ओंङ्कारपदवाच्यो भगवान् वासुदेव एवेत्यर्थः । एवं समस्त प्रणवप्रतिपाद्य भगवदुपास्तिमभिधायेदानीं प्रणवांशाकारोकारमकारनादप्रतिपाद्यानां विश्वतैजसप्राज्ञतुरीयाणमुपास्तिं, अकारः प्रथममात्रेत्यत्र वक्तुमादौ प्रस्तावयति । सोयमात्मेति । यः चतुर्मुखादीनामादानकर्तृत्वेनाभिहितः सोयमात्मोंकारवाच्यो भगवान् चतुष्पात् । चत्वारः पादा अंशा यस्यासौ चतुष्पादित्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु के ते चत्वारः पादाः कानि च तेषां स्थानानि कश्च तेषां व्यापारः किं विधञ्च रूपं किञ्च तेषां भोग्यमित्यतो नान्तःप्रज्ञमित्यादिना वक्तुं विश्वतैजसप्राज्ञानां स्थानादीनि तावदाह जागरितस्थानइत्यादिना तृतीयःपाद इत्यन्तेन तत्र विश्वस्य स्थानादिकं दर्शयति ।

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः
स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ ३ ॥

टीका—जागरितं स्थानमक्ष्यादिरूपं यस्यासौ तथोक्तः । चक्षुःस्थान इत्यर्थः । बहिः प्रज्ञः । बहिष्ठं वस्तु ज्ञापयति बाह्यपदार्थविषयकसम्वित्ति निर्मातेति यावत् । सप्ताङ्गः । द्वौ पादौ चत्वारो हस्ता हस्तिकर इति-सप्ताङ्गवान् । एकोनविंशति मुखः । तत्राष्टादशमुखानि प्रमाकाराणि मध्यमन्तु गजाकारमितिशेषः । स्थूलभुक् । स्थूलान् बाह्यान् विषयान् जीवेन्द्रियद्वाराभुङ्क्त इत्यर्थः । वैश्वानरः विश्यते ज्ञानेन प्रविश्यत इति व्युत्पत्या ज्ञानविषयीभूतं स्थूलं विश्वशब्दोक्तं भोक्तृत्वेन तत्सम्बधी वैश्वः अनशनान्तरः वैश्वश्चासौ नरश्चेति वैश्वानरः । विश्वइति यावत् ॥ प्रथमःपादः प्रथमांशः ॥ ३ ॥

एवं विश्वस्य स्थानादिकं निरूप्य तैजस्य स्थानादिकं निरूपयति ।

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः
प्रविविक्तभुक्तैजसो द्वितीयःपादः ॥ ४ ॥

टीका—स्वप्नं मनोरूपं स्थानं यस्यासौ तथोक्तः । अन्तःप्रज्ञः । अन्तः स्थितवासनामय पदार्थान् प्रकर्षेण ज्ञापयति जानाति चेत्यन्तःप्रज्ञः प्रज्ञ इतिजानातेःकः । सप्ताङ्ग एकोनविंशति मुख इति पूर्ववद् व्याख्येयम् । प्रविविक्तभुक् । जाग्रत्पदार्थानुभवजन्य वासनोत्पादकत्वेन तद्रूपत्वात् स्वप्नस्थितं वस्तु जाग्रत्पदार्थविलक्षणत्वात् प्रविविक्तमुच्यते । तद्भुङ्क्ते तदनुभवजन्य भोगवानित्यर्थः तैजसो द्वितीयः पादो द्वितीयांशः ॥ ४ ॥

एवं विश्वतैजसयोः स्थानं निर्वाच्य प्राज्ञस्य स्थानं प्रदर्शनपरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तरग्रन्थः तत्र प्राज्ञस्य सुषुप्तिस्थानं कीदृशमिति जिज्ञासायां लक्षणोक्त्याऽऽदौ तन्निरूपयति ।

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् ॥ सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयःपादः ॥ ५ ॥

टीका—यत्र यस्यामवस्थायां सुप्त अज्ञानावृतः । मनआदीन्द्रियाणामुपरतत्वात् न कामं काम्यमानमर्थं न कामयते न कञ्चन स्वप्नपदार्थं पश्यति तत् स्थानं सुषुप्तमित्युच्यते सुषुप्तमेव स्थानं यस्य स सुषुप्तस्थानः हृदयाकाशरूप इति यावत् । एकीभूतः प्रत्यहं विश्वतैजसाभ्यामेकीभावस्यापद्यमानत्वेनैकीभूत इत्युच्यते । प्रज्ञानघन एव । सुषुप्तिसमये घनं तज्जीवं जानाति प्रज्ञापयति जीवस्येति प्रज्ञानघनः । प्रपूर्वादन्तर्णीतण्यर्थाज्ज्ञा अवबोधन इति । कृत्यलुटो बहुलम् पा० सू० ३।३।११३ । बहुल ग्रहणात्कर्मणि ल्युट्यनादेशे प्रज्ञानः प्रज्ञापितो घनो जीवो येन स प्रज्ञानघन इति विग्रहः । आनन्दमयः आनन्दप्रचुरः पूर्णानन्द इति यावत् । आनन्दभुक् विषयभोगं विनाऽप्यभिव्यक्त केवलस्वरूपभूतानन्दभुक् । तेन विश्वतेजसोर्व्यावृत्तिः । तयोः स्थूलान्तर विषयभोगेनानन्दोक्तेः । हीत्येतदुभयं विशेषानन्तशक्तिभ्यां उपपन्नमिति प्रसिद्धं सूचयति । चेतोमुखः । ज्ञानरूपमुखः । मुखेत्युपलक्षणं ज्ञानरूपसर्वावयव इत्यर्थः । एतादृशः प्राज्ञः तृतीयःपादः तृतीयोंऽशः आनन्दमयत्वं चेतोमुखत्वं यत्प्राज्ञस्यकथितं तदितररूपत्रयेऽपिबोध्यम् ॥ ५ ॥

एवं विश्वादीनां त्रयाणां महिमानं निरूप्यनान्तःप्रज्ञमित्यादिना तुरीयमहिमानं पृथग्वक्तुं चतुर्णामपि महिमानं युगपदादावाह ।

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—एष चतूरूपो भगवान् सर्वेषामीश्वरः। एष सर्वज्ञः सर्वान्तर्यामी एष सर्वस्य योनिः कारणम्। एतदेव विशदयति भूतानां प्रभवाप्ययौ। भूतानां प्रभवः प्रभवत्यस्मादिति प्रभवः। अप्येत्यस्मिन्नित्यिप्ययः। एतो-हि यस्मात्। चतूरूपोपेताद्धरेः सकाशाद्भवत इति ॥ ६ ॥

स्वोक्त दार्ढ्याय ब्रह्मदृष्टान् मन्त्रान् प्रमाणत्वेन वक्तुं प्रतिजानीते। अत्रैते श्लोका भवन्ति।

बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथाप्राज्ञ एक एव त्रिधा मतः ॥ १ ॥

टीका—अत्र जागरितस्थान इत्याद्यर्थे। एते वक्ष्यमाणा ब्रह्मदृष्टा-मन्त्राः प्रमाणतया भवन्तीत्यर्थः। विश्वो बहिःप्रज्ञः तैजसोऽन्तःप्रज्ञः प्राज्ञः प्रज्ञानघन इत्यत्र मन्त्रं पठति। बहिरिति। विश्वो वैश्वानरः। बहिः प्रज्ञइत्याद्युक्तरीत्या स्पष्टार्थाः। एक एव भगवान् विश्वादिरूपेण त्रिधा बहिःप्रज्ञत्वादि प्रकारत्रयोपेतत्वेन च स्मृतः ॥ १ ॥

जागरितस्थानः स्वप्नस्थानः सुषुप्तस्थानइत्युक्तार्थे मन्त्रं पठति।

दक्षिणाक्षि मुखे विश्वो मनस्यन्तस्तु तैजसः।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥

टीका—हृदयस्थ आकाशे त्रिधा स्थानत्रयवत्वेन देहे व्यवस्थित इत्यर्थः ॥ २ ॥

स्थूलभुक् प्रविविक्तभुगानन्दभुगित्युक्तार्थे मन्त्रं पठति।

विश्वो हि स्थूलभुक् नित्यं तैजसः प्रविविक्तभुक्।
आनन्दभुक् तथा प्राज्ञस्त्रिधाभोगं निबोधत ॥ ३ ॥

टीका—स्थूलभुगित्याद्युक्तार्थं त्रिधा प्रकार त्रयेण भोगं विश्वा-दीनाम् ॥ ३ ॥

तत्रैव मन्त्रान्तरं पठति।

स्थूलं तर्पयते विश्वं प्रविविक्तन्तु तैजसम्।
आनन्दश्च तथा प्राज्ञं त्रिधातृप्तिं विजानथ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—स्थूलं भोग्यं वस्तुकर्तृ विश्वं कर्म तर्पयते । तैजसं प्राज्ञमुभयत्र तर्पयते इत्यनुवर्त्तते । आनन्दम् । आनन्दः तृप्तिं विश्वादीनाम् नित्यतृप्तस्य स्थूलादिनातृप्तिः क्रीडारूपा बोध्या ॥ ४ ॥

जागरितादिस्थानेषु विश्वादिरूपो भोक्ता स्थूलादिरूपं तद्भोज्यञ्चेत्युभयं सर्वथाज्ञेयमित्याशयवान् तद्वेत्तुः फलमाह ।

त्रिषु धामसु यद्भोज्यं भोक्ता यस्तु प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानोऽपि न लिप्यते ॥ ५ ॥

टीका—धामशब्दो गृहापरपर्यायस्थानवाची तथा च त्रिषु दक्षिणाक्षि मुख इत्यादिनोक्तेषु जागरितादि धामसु स्थानेषु भोक्ता विश्वो हि स्थूलभूगित्यादिनोक्तप्रकीर्तितो विश्वादिः तस्य स्थूलादिकं भोज्यं स्थूलं तर्पयत इत्यादिना कीर्तितमेतदुभयञ्च यो वेद स भुञ्जानोऽभ्यवहारादिकं कुर्वाणोऽपि न लिप्यते । अहं भोक्ता ममेदं भोज्यमित्यभिमानरहितो भवति विश्वादिरूपस्य, हरेरेव भोक्तृत्वज्ञानादित्यर्थः ॥ ५ ॥

एष योनिःसर्वस्येत्यत्र मन्त्रं पठति ।

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोंऽशून् पुरुषः पृथक् ॥ ६ ॥

टीका—चतूरूपो हरिरेव सर्वभावानां वस्तूनां प्रभवः उत्पादक इति निश्चयरूपं ज्ञानं सतामेवासतां त्वन्यथेति भावः । एतदेव विवृणोति सर्वं जनयतीति सर्वस्य प्रणेतृत्वात् प्राणः । पुरिशेतेऽसौ पुरुषः विश्वादिचतूरूपो हरिः सर्वमचेतनं स्वरूपेण जनयति चेतोंऽशून् ज्ञानरश्मियुक्तान् चेतनान् जीवान् पृथग् जडवैलक्षण्येन जनयतीत्यर्थः ॥ ६ ॥

सतां विनिश्चित्य इत्यत्र सतां वैपरीत्येन निश्चय इत्यर्थात् प्राप्तं तदुभयं व्यनक्ति ।

विभूतिं प्रभवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमाया सरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—केचित् सृष्टिचिन्तकाः सृष्टिस्वरूपनिरूपणे दक्षत्वाभिमानवन्तो ब्रह्मस्वरूपपरिणामवादिनोऽ सन्तः प्रभवं विभूतिं जीवजडतया विविधया भवनं ब्रह्मणो मन्यन्ते अयं पक्षः अविकारितया श्रुत्यादिप्रसिद्धस्येश्वरस्यैतादृश विविधभवनाङ्गीकारे हीनत्वादिदोष प्राप्त्याऽयुक्त इति हृदयम्। अन्यैः प्रच्छन्नबौद्धैर्मायाभिरेषासृष्टिः स्वप्नमायासरूपा स्वप्नपदार्थ सृष्टिसदृशी ऐन्द्रजालिकमायासदृशी वा न यथार्थेति विकल्पिता निश्चितेत्यर्थः। अयमपि पक्षः पूर्णशक्तेः कुतो माया सर्वज्ञत्वात् स्वप्नवत्कुतः याथातथ्यतोऽर्थान् व्यदधात् असक्तः सत्यसृष्टौ मायासृष्टिं वितन्वते अनन्ताचिन्त्यविभवः कथन्तामीहते हरिः वैधर्म्याच्च न स्वप्नादिवदित्यादि श्रुति स्मृति सूत्र विरुद्धत्वादुपेक्ष्यः॥ ७॥

सृष्टिविषये सिद्धान्तं निरूपयति।

इच्छामात्रं प्रभोः सृष्टिरितिसृष्टौ विनिश्चिताः।

टीका—प्रभोः अविकारिणो मायातीतस्य हरेः सकाशाद्या सृष्टिरखिलस्य जगतः सा इच्छामात्रम्। इच्छामात्राधीनेति सृष्टिविषये यथार्थ निश्चयवन्तो ब्रह्मादयः प्राहुः। अनेन ब्रह्मणे जगज्जन्मादिकर्तृत्वमेव सिद्धान्त इत्युक्तं भवति। एवं सिद्धान्तकर्तारं प्रति पूर्वपक्षमध्ये सिद्धान्तमभिधाय पुनः पूर्वपक्षान्निरूपयति। काल इत्यादिना।

कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः॥ ८॥

टीका—कालस्यैव सर्वोत्तमत्वेन चिन्तकाः भूतानां कालादेवोत्पत्तिं मन्यन्ते। उपलक्षणमेतत्। यदृच्छा नियति स्वभावप्रधानचतुर्मुखादीनां निरासः पुरुषप्रभुपदाभ्यामेव द्रष्टव्यः तथाहि कालप्रधानयोर्जडत्वेन कर्तृत्वायोगात् रुद्रस्य पत्युरसामञ्जस्यादित्युक्त न्यायेन दुष्टत्वात् ब्रह्मणोप्येको नारायण आसीन्न ब्रह्मेत्यादिना प्रलयेऽभावावगमेन जगत्कर्तृत्वायोगेनैते पक्षा अयुक्ता एव। अतो भगवान् वासुदेव सर्वस्य जगतः कर्तेतिपक्षः साधीयान्॥ ८॥

ब्रह्मण इच्छामात्रेण यत्स्रष्टृत्वमुक्तं तच्च न सम्भवति। यतः तस्य चाप्तसमस्तकामत्वेन प्रयोजनाभावादन्यथा स्वार्थप्रवृत्तौ पूर्णकामत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हानिः परार्थप्रवृत्तावनन्तदुःखबहुलं जगत्सृजतः करुणावत्वादि-हानिरित्यतोऽत्रापि सिद्धान्तं प्रदर्शयितुं मन्त्रान्तराण्याह ।

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।

देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ ६ ॥

इत्यथर्ववेदीय माण्डूक्योपनिषदि प्रथमः खण्डः ॥ १ ॥

टीका—अतृप्तस्यैव हरेः भोगार्थं भोगाख्यप्रयोजनाय सृष्टिरित्यन्ये मन्यन्ते । अपरे तु क्रीडार्थं सृष्टिः । क्रीडायाः । तत्रापि सिद्धान्तमाह देवस्येति देवस्यैषोयं जगत्सर्जनादिरूपो व्यापारः क्रीडारूपत्वात्स्वभाव एव न तेन प्रयोजनापेक्षाः यथोक्तं भगवता श्रीबादरायणेन 'लोकवत्तु लीला कैवल्यम्' ब्र० सू० २ । १ । ३३ । आप्तसमस्तकामस्यापि परब्रह्मणो विचित्र सृष्टौ प्रवृत्तिलीलैव केवला न तत्र प्रयोजनोद्देश इत्याह । आत्मकामस्य पूर्णकामस्य का स्पृहा न कार्यात्यर्थः इति शब्दो रूपत्रयनिरूपण समाप्तौ ॥ ६ ॥

इत्यथर्ववेदीय माण्डूक्योपनिषत्प्रकाशिकाटीकायां प्रथमः खण्डः ॥ १ ॥

पाद त्रये व्याख्याते व्याख्येयत्वेन क्रमवशात्प्राप्तं तुरीयं पादं व्याख्यातुमुत्तरग्रन्थप्रवृत्तिस्तत्रमुखेन तत्स्वरूपं निरूपयति ।

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्य प्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

टीका—नान्तःप्रज्ञं देहान्तस्थिता ये स्वाप्नपदार्थास्तान् न प्रज्ञापयतीति नान्तःप्रज्ञः तं, स्वप्नावस्थाया अकर्त्तारमित्यर्थः । न बहिःप्रज्ञं बहिस्थिता पदार्था जाग्रत्कालीनास्तान् न प्रज्ञापयतीति न बहिःप्रज्ञः तम् । जाग्रदवस्थाया अकर्त्तारमित्यर्थः । नोभयतःप्रज्ञं बहिः शब्दादिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जानाति अन्तः स्व नञ्च पश्यति कस्याञ्चिदवस्थायां तामुभयज्ञानशब्द-वाच्यावस्थायाञ्च न प्रज्ञापयतीति नोभयतःप्रज्ञः तम् एतदवस्था-प्रवर्त्तकौ विश्वतैजसाविति सम्प्रदायविदः । न प्रज्ञानघनं घनेत्यज्ञा-नावृत्तस्य जीवस्य सुषुप्त्यवस्था कालसुखानाञ्च प्रज्ञापनं यस्मान्न भवत्यसौ न प्रज्ञानघनस्तम् सुषुप्त्यवस्थाया अकर्त्तारमित्यर्थः । नप्रज्ञं प्रज्ञाश-ब्दोक्ता सम्प्रज्ञातसमाध्यवस्था ज्ञानं यस्मान्नभवत्यसौ न प्रज्ञस्तम् अस-म्प्रज्ञात समाध्यवस्थाया अकर्त्तारमित्यर्थः । नाप्रज्ञम् चरमदेहमुत्सृज्य मुक्तिं गच्छन्तां ज्ञानप्रदो न भवतीति नाप्रज्ञस्तम् अदृष्टम् । मुख्यप्राणा-नुग्रहाभावेनामुक्तो यस्तेनादृश्यमानत्वाददृष्टस्तम् । अव्यवहार्यम् मुक्तिं विना संसारे ग्रहणापरपर्य्याय व्यवहाराद्यविषयत्वादव्यवहार्यस्तम् । अग्राह्यमित्यर्थः । अलक्षणम् । विश्वादि त्रयवत् जाग्रदाद्यवस्थाप्रव-र्त्तकत्व रूपानुमापक धर्मशून्यत्वादलक्षणस्तम् । अचिन्त्यम् । अनुमाप-कधर्मशून्यत्वादेवानुमितिरूपचिन्तविषयो न भवतीत्यचिन्त्यस्तम् । अव्यपदेश्यम् । व्यवहारस्य व्यवहर्त्तव्यज्ञानसाध्यत्वादचिन्त्यत्वादेव व्यपदेष्टुमशक्यत्वादव्यपदेश्यस्तम् । ऐकात्म्यप्रत्ययसारम् । एकः प्रधान आत्मापूर्ण एकश्चासावात्माचैकात्मा एकात्मेवैकात्म्यं स्वार्थेष्यञ् । ज्ञान-रूपत्वात् प्रत्ययश्चानन्दरूपत्वात्सारः । ऐकात्म्यश्चासौ प्रत्ययश्चासौ सारश्चेति तथोक्तस्तम् । प्रपञ्चोपशमम् । गुणादिभिर्विस्तृतत्वात् प्रपञ्चः । उ शब्द उच्छब्दवदुपशब्दोऽप्युत्कृष्टवाची । शम शब्दश्चानन्दरूपत्ववाची तथा चोत्कृष्टानन्दरूपत्वादुपशमः प्रपञ्चश्चासावुपशमश्च प्रपञ्चोपश-मस्तम् । यद्वा प्रपञ्चस्य देहस्य सम्बन्धरूपस्योपशमो नाशो यस्माद्भवत्यसौ प्रपञ्चोपशमस्तम् । शिवम् । निर्दुःखरूपत्वाच्छिवस्तम् । अद्वैतम् । वस्तुस्वरूपापेक्षया । अन्यथाप्रत्ययो द्वैतं तच्छमयतीत्यद्वैतस्तम् । अन्यथा-प्रत्ययाकारणमित्यर्थः । एतादृशमात्मनस्तुर्यं पादं मन्यन्त औपनिषदा मन्यन्ते । सोऽयमात्मा चतुष्पादित्युक्तमुपसंहरति स इति । स विश्वादिरूपेण चतुष्पादात्मा आद्यनादिकर्त्ता स एव मुमुक्षुभिर्विशेषेण ज्ञेय इत्यर्थ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन्नर्थे ब्रह्मदृष्टान् मन्त्रान् सम्वादयन्नाह । अत्रैत इति ।

अत्रैते: श्लोका भवन्ति

प्रपञ्चोपशममिति तुरीयस्य सर्वानिष्टनिवृत्तिकारणत्वमुक्तं तत्र तावन्मन्त्रं पठति ।

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।

टीका—सर्वदुःखानां निवृत्तेः कारणमिति शेषः । ईशानः । ईशान् ब्रह्मादीननतिप्रेरयतीतीशानः । प्रभुः स्वामी । अव्ययः सदैकरसः ।

अद्वैतमित्युक्तार्थे मन्त्रं पठति ।

अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ १० ॥

टीका—अद्वैतः मिथ्याज्ञाननिवर्तकः । सर्वभावानां भवन्ति देहयोगेनोत्पद्यन्त इति भावाः जीवास्तेषां कर्तरि षष्ठी। तैः मुक्तिं गमिष्यद्भिर्देव उपास्यो विभुः समर्थः कारणभूतः तुर्यस्तुरीयः स्मृतः मन्त्रदृग्भिरिति शेषः ॥ १० ॥

नान्तःप्रज्ञं न वहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनमिति तुरीयस्य विश्वादिभ्यस्त्रिभ्यो वैधर्म्यमुक्तं तत्र मन्त्रं पठति ।

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः ॥ ११ ॥

टीका—अथ विश्वादीनां बद्धत्वोक्तिरन्यगत वन्धस्य तदधीनत्वात् तदधीनत्वादर्थवदिति न्यायेन वा बन्धयतीति बद्ध इति कर्तृव्युत्पत्या वेति ज्ञातव्यं न तु बद्धत्वं सर्वमानविरुद्धत्वात्। कार्यं भ्रमः कारणमनादि कर्मात्मिकाऽविद्या विश्वतैजसौ कार्यकारण रूप द्विविध बन्धवन्तौ प्रज्ञः कारणरूपैकबन्धनात् कार्यकारणाकारेण द्वावपि बन्धौ तुरीये न स्त इत्यर्थः । ननु विश्वतैजसयोर्द्विविधबन्धवत्वेन प्राज्ञतुरीयाभ्यां भेदेऽपि परस्परं व्यावर्त्तकधर्माभावेन कथं भेद इति चेदुच्यते। अविद्यारूपकारणबद्धत्वस्योभयत्राविशिष्टत्वेऽपि कार्यबद्धत्वे वैलक्षण्यसद्भावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाहि अविद्या तत्कार्य स्वातन्त्र्यादि विषयक जाग्रत्कालीन भ्रमरूपो भयबन्धप्रदो विश्वः। अविद्या तत्कार्यजाग्रत्कालीन भ्रमकार्य स्वाप्नभ्रमरूपो भयबन्धप्रदस्तैजसः। न च स्वप्नस्य जाग्रत्कालीन भ्रमकार्यत्वं कथमिति शङ्क्यम्। अदृष्टे चाश्रुतेऽभावेन भाव उपजायत इति वचनेन तत्संस्कारद्वारा तत्कारणकत्वस्य सत्वात्। द्वौ तौ तुर्य्ये न सिद्धयत इत्यनेन तुरीयस्य सर्वथाऽबन्धकत्वमुक्तम्। तेनार्थात्सर्वज्ञानप्रदत्वं तस्येति सूचितं भवति तथा च नाप्रज्ञमित्युक्तार्थेप्ययं मन्त्रः प्रमाणमिति द्रष्टव्यम्॥ ११॥

न प्रज्ञानघनमित्युक्ते प्राज्ञाद्वैधर्म्ये मन्त्रं पठति।

नात्मानं न परांश्चैव न सत्यं नापि चानृतम्।
प्राज्ञः किञ्चन सम्वेत्ति तुरीयं सर्वदृक् सदा॥ १२॥

टीका—प्राज्ञः, आत्मानं स्वरूपं परान्, जीवाज्ञानसुषुप्त्यवस्थाकालसुखेभ्योऽन्यान् पदार्थान् सत्यानृतशब्दलक्षितं तत्कार्य्यं पुण्यं पापञ्च न सम्वेत्ति। णिजन्तमेतत् न सम्वेदयतीत्यर्थः। इतरेषामसम्वेदनरूप क्रियाप्रदाने प्राज्ञस्यैव स्वतन्त्रत्वात्। न सम्वेत्तीति श्रुतावुक्तं स्वतन्त्रे कर्तृ शब्दः स्यादिति वचनादवगन्तव्यम्। तुर्यमिति सर्वदृगित्येतदपि णिजन्तम्। तथा च तुरीयंरूपमात्मानं परान् ज्ञानोत्तरकृत पुण्यञ्चै तत्सर्वं मुक्तौ दर्शयतीति सर्वदृगित्यर्थः। अनेनाप्रज्ञमित्युक्तं सर्वज्ञानप्रदत्वञ्च प्रमाणितं भवतीति ज्ञातव्यम्॥ १२॥

शिवमद्वैतमिति। तुरीयस्योक्तमद्वैतमिति विशेषणं सुषुप्तज्ञान इत्यादौ प्राज्ञस्वरूपकथनपरे वाक्ये प्राज्ञस्याभिप्रेतम्। अतः प्राज्ञतुरीययोरद्वैतत्त्वं समानमित्यत्र मन्त्रं पठति।

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते॥ १३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—प्राज्ञतुरीययोरुभयो देहादिविषयस्वातन्त्र्यभ्रम रूप द्वैताग्रहणाकारणत्वं तुल्यमित्यर्थः। नात्मानमित्यादिना प्राज्ञ-तुरीययोर्वैधर्म्यञ्चोक्त्वा द्वैतस्येति साम्यञ्चोक्त्वा पुनर्वैधर्म्यं प्रकारान्त-रेणाह। बीजेति। देहगेहादौ स्वातन्त्र्यबुद्धिबीजभूता मूलाविद्या-युतः प्राज्ञः तस्यास्तदधीनत्वेन प्राज्ञस्य तत्प्रवर्तकत्वात्तद्युक्तत्वं युक्तम्। मृत्युयुतः स्वामीत्यादाविवेति द्रष्टव्यम्। सा च मूला विद्या तुर्ये न वर्त्तते तत्प्रवर्तको न भवतीत्यर्थः॥ १३॥

विश्वतैजसयोर्द्विविधबन्धत्वेन साम्यं प्राज्ञस्यैक बन्धत्वेन, ताभ्यां वैलक्षण्यं सर्वबन्धशून्यत्वेन तुरीयस्य, त्रिभ्यो वैधर्म्यं कार्य-कारणावित्यनेनोक्तं तत्रैव मन्त्रान्तरं पठति।

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्न निद्रया।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः॥ १४॥

टीका—स्वप्नः कार्यरूपो भ्रमः निद्रा अविद्या आद्यौ विश्वतैजसौ स्वप्ननिद्रायुतौ। उक्तरीत्या कार्यकारणबद्धौ। प्राज्ञस्त्व स्वप्न निद्रया स्वप्न शब्दोक्त कार्य भ्रमं विना निद्रया अविद्यया युतः। कारण-मात्र बद्ध इत्यर्थः। निश्चिताः यथार्थ निश्चयवन्तः तुरीये निद्रां स्वप्नञ्च नैव पश्यन्ति सर्वथा कार्यकारणबन्धशून्यत्वेनैव तं पश्यन्ती-त्यर्थः॥ १४॥

नन्वेतादृश तुरीयस्य प्राप्तिः कदेत्याशङ्का परिहारायाह।

अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः।
विपर्यासे तयोः क्षीणे तुरीयपदमश्नुते॥ १५॥

टीका—तत्त्वं स्वतन्त्रत्वं भगवतोऽजानतः पुंसो या निद्राऽविद्यास्ति तयान्यथा गृह्णतोऽहं ममेत्यादिजाग्रत्कालीनस्वातन्त्र्यभ्रमयुक्तस्य स्वप्नः स्वप्नदर्शित्व भ्रमो भवति जाग्रदवस्थायां स्वातन्त्र्यादि-विषयभ्रमजन्यसंस्कारेण जाग्रत्कालीनमिदमिति स्वप्नरूपो भ्रमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति। एवं रूपे तयोर्विपर्यासे जाग्रत्स्वप्नभ्रमयोर्विपरिवर्तने क्षीणे सति पद्यत इति पदं तुरीयमश्नुते प्राप्नोतीत्यर्थः ॥ १५ ॥

नन्वनादि विद्या बद्धस्य जीवस्य जाग्रत्स्वप्नयोर्विपर्यास क्षय एव कथं स्यादित्यतो यदा सद्गुरूपदेशादिना भगवत्प्रबोधोदयस्तदैवेत्याशयेनाह।

अनादि मायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥ १६ ॥

टीका—अनादेर्विष्णोरनादिभूतया मायया इच्छया तदधीनया प्रकृत्या च सुप्तः स्वापितो जीवो यदा ईश्वरेच्छयैव सद्गुरूपदेशेन प्रबुध्यते प्रबोधमायाति श्रवणादिमान् भवतीति यावत्। तदा अजं जनि रहितम्। अनिद्रम् अज्ञानरहितम्। अस्वप्नं स्वप्नाद्युपलक्षित जाग्रदवस्थातीतम्। अद्वैतम्। अन्यथाज्ञानशून्यं भगवन्तं बुध्यतेऽपरोक्षतो जानातीत्यर्थः। अनन्तरं विपर्यास क्षयो भवतीति भावः ॥ १६ ॥

नन्वहं ममेत्यादि स्वस्वामिभावसम्बन्धरूपप्रपञ्चो यदि जीवस्वभावः स्यात्तदा भगवदनुग्रहादपि कथं निवर्तेतेत्याशङ्कायां स न जीव स्वभावः किन्त्वाभिमानिको भगवदिच्छाधीन एव अतस्तज्ज्ञानजनिता तत्प्रसादान्निवृत्युपपत्तिरित्याशयेनाह।

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १७ ॥

टीका—प्रपञ्चः देहादिनिरूपितस्वस्वामिभावरूपः जीवस्याभिमानाद्विद्येत अस्वाभाविकतयाऽभगवद्वशत्वेन च विद्यते इत्यङ्गीकारो यदि भवेत्तथापि भगवज्ज्ञानान्निवर्तेतैव नात्र संशय इत्यर्थः। ननु भगवज्ज्ञानादपि कथं तन्निवृत्तिरित्यतो भगवदिच्छाधीनत्वात् तदिच्छयैव निवृत्तिर्युक्तेत्याशयेनाह। मायामात्रमिति। अद्वैतं मद्भिर्यथावत्तया ज्ञातं ब्रह्मादिवस्तुजातमज्ञैर्द्वैतं द्वितीयेन प्रकारेण ज्ञातं तद्वैपरीत्येन ज्ञातः तच्च मिथ्याज्ञानं तेषां मायामात्रं भगवदिच्छयामात्रं निर्मितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातमित्यर्थः । तथा च तादृश मिथ्याज्ञानस्यानादितोऽनुवृत्तस्या-पीच्छया जातत्वेनास्वाभाविकत्वात्तत्प्रसादेन तन्निवृत्तिर्युक्तेतिभावः । उक्तं हि संसारबन्धस्थितिमोक्षहेतुः ।

दैवीह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

इति श्री मुखवचनस्य जागरूकत्वात्। इदमत्राकूतम् ननु चेतना-चेतनात्मक वस्तुनो विद्यमानत्वात् । अद्वैतानुपपत्त्या कथमद्वैतमुच्यते न च ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेणाभिन्नत्वान्नाद्वैतानुपपत्तिस्तथात्वे गुणदोषसाङ्कर्य प्रसक्ते दुर्वारत्वात्। स्वाभाविकभेदाभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमाद् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोष ब्रह्मतादात्म्योपदेशा विरुद्धा एवेति चेन्न यतो न वयं स्वरूपेण जीवेशयोरैक्यमभ्युपगच्छामः येनोक्तापत्तिः प्रसज्येत किन्त्वतरे तरात्यन्तविलक्षणत्वेन ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेण भिन्नत्वं प्रतिपादयामस्तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम् अचेतनस्य च स्थूलत्वेन ब्रह्मणस्तयोर्वैलक्षण्येनेति विवेकः ।

यथा ब्रह्मणश्चेतनाचेतनयोश्च स्वाभाविकभेदस्तथैवाभेदः सर्वात्मत्व सर्वनियन्तृत्व सर्वव्यापकत्व स्वतन्त्रसत्व सर्वाधारत्व धर्म-पुरस्कारेण भेदः ब्रह्मात्मकत्व तन्नियम्यत्व तद्व्यापत्व तत्तन्त्रसत्व-पराधेयत्वेन रूपेणाभेदः एतद्रूपेणाद्वैतज्ञानं द्वैतज्ञानञ्च यथार्थ-ज्ञानमेतद्वैपरीत्येन ज्ञानं मिथ्याज्ञानमिति ॥ १७ ॥

उक्तमेव पूर्ववाक्यार्थं विशदयन्नुपसंहरति ।

विकल्पो न निवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ १८ ॥

इत्यथर्ववेदीय माण्डूक्योपनिषदि द्वितीयःखण्डः ॥ २ ॥

टीका—देहादौ स्वीयताभिमानलक्षणबन्धरूपो विकल्पो यदि केनचिदज्ञादिना कल्पितः । उपदेशात् । श्रीगुरुकृताद्भगव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुपदेशाच्छ्रवणारूपात् तज्ज्ञानादपरोक्षज्ञानद्वारा न निवर्तेतापितु निवर्तेतैव। उक्तार्थेऽप्रामाण्य शङ्का परिहारायाह। अयं वाद इति। ब्रह्मणि प्रागुपदर्शित प्रकारेण यथावज्ज्ञाते सति द्वैतं देहगेहादौ स्व-स्वामिभावसम्बन्धज्ञानरूपमन्यथाज्ञानं न विद्यते निवर्तते। तद-नन्तरं भगवद्भावापत्ति रूपां मुक्तिमेतीत्ययं सतां वादः सिद्धान्तः। अतो नात्राप्रामाण्य शङ्का कलङ्कावकाश इति भावः॥

इत्यथर्ववेदीय माण्डूक्योपनिषत्प्रकाशिकाटीकायां द्वितीयः खण्डः॥ २॥

एवं चतुरो विश्वादीन्निरूप्य तेषामेव चतुर्णां प्रणवांशाकारो-कार मकार नादं प्रतिपाद्यस्वरूपं महिमानं वक्तुमुत्तरखण्डद्वयम्। तत्राद्यखण्डं विश्वादीनां त्रयाणां प्रणवांशाकारादि त्रयप्रतिपाद्यत्वं वक्तुमनूद्यते।

सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति॥ १॥

टीका—सोऽयं विश्वादि चतूरूप आत्मा अध्यक्षरं सर्वतोऽधि-कत्वादधि, अविनाशित्वादक्षरमोमित्याक्रियत इत्योंकारः। यद्वक्तु मुक्तमनूदितं तन्निरूपयितुं प्रस्तावयति अधिमात्रमिति। अधि अधिकाः पूर्णा मात्रा यस्यासावधिमात्रः। कास्ता मात्रा इत्यत आह। पादा मात्रा इति पादाः, अंशाः मात्रा मात्रा शब्दवाच्याः। ते पादा अपि क इत्यत आह। अकार इत्यादिना। अत्र नादोऽपि ग्राह्यः॥ १॥

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादि-मत्त्वाद्वाऽऽप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद॥ २॥

टीका—तत्राकारवाच्यः क इत्यत आह। जागरितेति। यो जागरित-स्थानो वैश्वानरो भगवतः प्रथममात्रा प्रथमोंऽशो विश्वः स अकार अकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाच्यः। विश्वे अकारप्रवृत्तौ निमित्तद्वयं निर्वक्ति। आप्तेरादिमत्वाद्वेति। आप्तेर्जीवस्य विषयानापयति प्रापयतीत्याप्तिस्तन्निमितात्। आदिमत्वाद्वा। सुषुप्त्यवस्थातो जाग्रदवस्थायां प्रत्यागमने विश्वस्य प्राज्ञाद्विभज्यमानत्वेन प्राज्ञरूपादिमत्वम्। स्वप्नप्राद्वुत्थाने तैजसाद्विभज्यमानत्वेन तैजसरूपादिमत्वमस्तीत्येवमादिमत्वाद्वा अ इत्युच्यते इत्यर्थः। आप्त्यादिमत्व रूपनिमित्तद्वयेनाकारवाच्यतया विश्ववेत्तुः फलमाह आप्नोतीति। य एवं निमित्तद्वयेन विश्वस्याकारवाच्यत्वं वेद स सर्वान् कामान् काम्यान् विषयान्विश्वानुग्रहेण प्राप्नोति॥ २॥

उकार वाच्यः क इत्यत आह।

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा उत्कर्षादुभयत्वाद्वा उत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित् कुले भवति य एवं वेद॥ ३॥

टीका—यः स्वप्नस्थानस्तैजसो द्वितीयामात्रा स उकारः, उकारवाच्यः। तत्रोकारशब्दप्रवृत्तौ निमित्तद्वयमाह। उत्कर्षादुभयत्वाद्वेति। शरीराभिमानादुत्थाप्योद्धृत्य स्वप्नमण्डलं प्रति वासनामयपदार्थानुभवाय कर्षतीत्युत्कर्षस्तस्मात्। बाह्यव्यापारोपरतिरूपनिद्रायाः स्वाप्नविषयानुभवस्य च हेतुत्वादुभयत्वं तस्माद्वा उकारवाच्य इत्यर्थः। एवं निमित्तद्वयेन तैजसस्योकारवाच्यत्व वेत्तुः फलमाह। उत्कर्षतीत्यादिना एवं निमित्तद्वयेन तैजसस्योंकारवाच्यत्वं यो वेद स ज्ञान सन्ततिमुत्कर्षति ज्ञान सन्तत्योत्कृष्टो भवति। समानश्च भवति स्नेहाद्द्वेषभावाच्च सर्वमुक्तानां मध्यस्थो भवति। अस्यैवमुकार वाच्यतया तैजस वेत्तुः कुलेऽब्रह्मवित्पुत्रो न भवति। ब्रह्मवित्पुत्रो भवतीत्यर्थः॥ ३॥

सुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मकारवाच्यः क इत्यत आह । सुषुप्तस्थान इति । यः सुषुप्तस्थानः प्राज्ञो भगवतस्तृतीयामात्रा स मकारो मकारवाच्यः । प्राज्ञे मकारप्रवृत्तौ निमित्तद्वयमाह । मितेरपीतेर्वेति । मितिरन्तर्गतिः तथा च सुषुप्तौ जीवमात्मन्यन्तर्गमयतीति हेतोः । तथाऽपीतेः सुषुप्तौ वाङ्मज्ञानलयकर्तृत्वाद्वा मकारवाच्य इत्यर्थः । मानं ज्ञानं लयश्चैवमर्यादा चापि कथ्यत इतिवचनात् । एवं निमित्तद्वयेन प्राज्ञस्य मकारवाच्यत्ववेत्तुः फलमाह ।। मिनोति ह वा इत्यादिना । एवं निमित्तद्वयेन प्राज्ञस्य मकारवाच्यत्वं यो वेद स इदं सर्वं जगन्मिनोति । प्रत्यणूनामपि जीवानां प्रकाशतो व्याप्तेः सत्वात् प्रकाशस्यान्तर्गमयति । अणुमात्रस्थितं पदार्थजातं जानातीति यावत् । अपीतिर्दुःखादेः संसारस्य विलापकश्च भवतीत्यर्थः ।। ४ ।।

जागरितस्थान इत्यादिनोक्तार्थे विश्वाससम्पादनाय ब्रह्मद्रष्टान् मन्त्रान्सम्वादयन्नाह ।

अत्रैते श्लोका भवन्ति ।

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।

मात्रासम्प्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ १६ ॥

टीका—अत्रैत इति । तत्र जागरितस्थान इत्याद्यर्थे मन्त्रं पठति विश्वस्येति । विश्व अकारवाच्य इत्येव विश्वस्यात्वविवक्षामुक्तरीत्या अकारवाच्यत्वविवक्षां कृत्वेति यावत् मात्रासम्प्रतिपत्तौ मात्रायाः विश्वलक्षणभगवदंशस्य सम्प्रतिपत्तौ ध्याने क्रियमाणे सति अस्यधातुरुत्कटं विस्पष्टं यथा भवति तथाऽऽदि सामान्यम् । उक्तरीत्या विश्वस्य प्राज्ञतैजसरूपादिमत्वं विद्यते तदुपासकस्यापि भवतीत्येवमादिमत्वेन साम्यं भवति । शब्दसाम्यमेवात्र द्रष्टव्यम् । तथाप्तिसामान्यम् । उक्तरीत्याप्तिमत्वेनापि साम्यं स्यात् भवतीत्यर्थः ।। १६ ।।

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम् ।

मात्रासम्प्रतिपत्तौ स्यादुभयत्वं तथा विधम् ।। २० ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वप्नस्थान इत्याद्यर्थे मन्त्रं पठति । तैजसस्येति । तैजसस्योकार-वाच्यत्वविज्ञाने, उक्तरीत्या उकारवाच्यत्वविवक्षां कृत्वामात्रा सम्प्रतिपत्तौ तैजसलक्षणभगवदंशध्याने । अस्योपासकस्य स्फुटमुत्कर्षः ज्ञानोत्कर्षरूपं फलं विद्यते । तथाविधं भगवन्निष्ठोभयत्वसदृशमुभयत्वञ्च विद्यते । निद्रास्वप्नविषयानुभवश्च भगवता क्रियते इति तस्योभयत्वम् ।

अस्याप्युपासकस्य वाह्येन्द्रियोपरमरूपनिद्रामुक्तौ भवति । वाह्येन्द्रियाणि जडानि सर्वाण्यपि नश्यन्तीति यावत्, स्वरूपेन्द्रियेण विषयानुभवश्च भवतीत्युभयत्वं विद्यते भवतीत्यर्थः ॥ २० ॥

सुषुप्तिस्थान इत्याद्यर्थे मन्त्रं पठति ।

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ।
मात्रासम्प्रतिपत्तौ तु लयसामान्यमेव च ॥ २१ ॥
त्रिषु धामसु यत्तुल्यं सामान्यं वेति निश्चितम् ।
स पूज्यस्सर्वभावानां वन्द्यश्चैव महामुनिः ॥ २२ ॥

टीका—प्राज्ञस्य मकारभावे मकारवाच्यत्वे उक्तरीत्या मकार-वाच्यत्वविवक्षांकृत्वामात्रासम्प्रतिपत्तौ प्राज्ञरूपभगवदंशध्यानेऽस्यो-त्कटं मानसामान्यम् । उक्तरीत्या स्वान्तर्यामित्वेन साम्यमुक्तरीत्या लयकर्तृत्वेन च साम्यञ्च भवतीत्यर्थः ॥ २१ ॥

यत् आकाराद्यभिधेयविश्वाद्युपासकानां सर्वकामावाप्त्यादि-फलमुक्तं तत्सत्यमेव कुत इति चेत् । अकाराभिधेय विश्वाद्युपासकाः सर्वकामाप्त्यादिमन्त इति वेत्तुरपि फलोक्तेः । न हि तस्य मिथ्यात्वं-तद्धेतुः फलं भविष्यतीत्याशयेनाह । त्रिष्विति । यो निश्चितो निश्चय ज्ञा-ज्ञानवानधिकारी । त्रिषु धामसु तेजः स्वरूपञ्च गुहं प्राज्ञधामेति गीयत इति वचनात् । विश्वादिस्वरूपेषु अकारादि वाच्यतयोपासकेनोपासितेषु सत्सूपजायमानं यदुपासकस्योपास्यत्वेन भ्रान्त्यादिमत्वरूपं सामान्यं साम्यं तत्तुल्यम् मोक्षपर्य्यवसायित्वादविकारीति वेत्ति । सर्वभावानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तरि षष्ठी। सर्वभावैः सर्वजीवैः पूज्यो वन्द्यश्च भवति महामुनिश्च भवतीत्यर्थः॥ २२॥

विश्वाद्युपासकानां सर्वकामावाप्त्यादिफलमुक्तम्। तत्प्राप्तिरूप फलान्तरञ्चास्तीत्याह॥

अकारो नयते विश्वमुकारश्चापितैजसम्।

मकारश्च पुनः प्राज्ञं नामात्रे विद्यतेऽगतिः॥ २३॥

टीका—अकारः, अकारवाच्यो विश्वः तथा ध्यातः विश्वं स्वं प्रति नयति उपासकं नयतीत्यर्थः। एवमुत्तरत्रापि व्याख्येयम्। विश्वादीनां जाग्रदादिप्रवर्त्तकत्वेन तत्तदवस्थायां जीवेन गम्यत्ववत्तुरीयस्य तदभावात् तत्प्रयुक्तं गम्यत्वमपि नास्तीत्याशङ्कां परिहरति। नामात्र इति। विश्वादिवत्तत्प्रत्यहमेकीभावे विभागयोरभावे नामात्रो यस्तुरीयस्तस्मिन्नगतिः कर्मणि क्तिन् भावप्रधानश्च निर्देशः। अगम्यता नास्तीति सोऽपि उपासकः प्राप्य एव। आत्मानं संविशतीति तस्यापि गम्यत्ववचनात्। तथा च न जाग्रदादिप्रवृत्तिकारणत्वं गम्यत्वे प्रयोजकमितिभावः॥ २३॥

इत्यथर्ववेदीय माण्डूक्योपनिषत्प्रकाशिकाटीकायां तृतीयः खण्डः॥ ३॥

नान्तःप्रज्ञमित्यनोक्तं तुरीयमात्मनःपादं तस्य गुणानुवादपुरस्सरं नादप्रतिपाद्यत्वं दर्शयति।

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद॥ १॥

टीका—अव्यवहार्यादिकं प्राग् व्याख्यातम्। तथा च योऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत अमात्रश्चतुर्थस्तृतीयः स ओंकारस्तदवयवभूत नादपदप्रतिपाद्यः। नादप्रतिपाद्यत्वेन तुरीयोपासकस्य फलमाह। आत्मेति य एवमात्मत्वाव्यवहार्यत्वादिना तुरीयं नादप्रतिपाद्यं वेद स आत्मैव भूत्वा देहाभिमानं त्यक्त्वा आत्मना प्रसन्नेन परमात्मना तुरीयप्रसादादिति यावत्। आत्मानं तुरीयं सम्विशति। प्रविश्य स्वेच्छया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वयोग्यभोगान् भुञ्जानः सुखमास्त इति भावः ॥ १ ॥

स्वोक्तार्थे ब्रह्मदृष्टान् मन्त्रान् प्रमाणयति । अत्रेति । तानेवोदाहरति ।

अत्रैते श्लोका भवन्ति

ओङ्कारं पादशो विद्यात् पादा मात्रा न संशयः ।
ओङ्कारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ॥२४॥

टीका—पादशः पादैः । कः पादशब्दार्थ इत्यत आह पादा इति । मात्राः अंशाः । तथा चोंकारं भगवन्तमकारादिभिः पादैः अंशैः प्रतिपाद्यं विद्यात् । तत्रोंकारं तुरीयं पादशः नादरूपांशप्रतिपाद्यत्वेन ज्ञात्वा । किञ्चित्सांसारिकं विषयजातं न चिन्तयेत् न चिन्तयति । तमेव प्रविश्यानन्दाविर्भावमेतीति भावः ॥ २४ ॥

संसारं तितीर्षुणावश्यमोंकारप्रतिपाद्यश्चतूरूपो भगवान् ध्यातव्य इत्यत्र मन्त्रं पठति ।

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥ २५ ॥

टीका—प्रणवे जाग्रदादिप्रणयनात्प्रणवशव्दवाच्ये चतूरूपे परब्रह्मणि वासुदेवे चेतो युञ्जीत । प्रणवस्वरूपमेवाह प्रणव इति । ब्रह्मेति गुणैर्बृहत्वात्पूर्णत्वाद् ब्रह्म । ततः किं फलमित्यत आह प्रणव इति । प्रणवस्य निर्भयत्वादेव तत्र नित्यं मनोयोगयुक्तस्यापि भयं नास्तीत्यर्थः ॥ २५ ॥

विश्वादिरूपाणां परस्परं भगवता च सह न गुणतारतम्यमित्याह ।

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः ।
अपूर्वोऽनन्तरो बाह्यो न परः प्रणवोऽव्ययः ॥ २६ ॥

अपरमपरः पूर्वतनो मूलरूपपूर्वावतारात्मा प्रणवो हरिर्ब्रह्म पूर्णं हि प्रसिद्धमेतत् । परः पश्चात् नो विश्वाद्यवताररूपः प्रणवो हरिश्च ब्रह्म पूर्णः । पूर्वावतारे पश्चिमावतारे पूर्णतैव न क्वचिदपि न्यूनतेति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णत्वसम्भावनाय तत्स्वरूपं निरूपयति। अपूर्व इत्यादिना प्रणवस्तत्प्रतिपाद्यो विश्वादिचतूरूपो भगवान्। अपूर्वः न विद्यते पूर्वं कारणं यस्यासौ तथोक्तः अनादिरित्यर्थः। अनन्तरः न विद्यतेऽन्तरो नाशो यस्यासौ तथोक्तः। न विद्यतेऽन्यो जगतोऽन्तरः अन्तःस्थितः यस्मादसौ तथोक्त इत्यप्यर्थो द्रष्टव्यः। सर्वस्य हृदये स्थितमिति वक्ष्यमाणत्वात्। अबाह्यः। न विद्यतेऽन्यो जगद्बाह्यो यस्मादसौ तथोक्तः सर्व गतत्वात् तथा। अनपरः न विद्यतेऽपरः स्थितिकर्ता यस्येति तथोक्तः. पराधीनस्थित्यभावात्तथा। न विद्यते व्ययो यस्य स शश्वदेकप्रकारः॥२६॥

प्रणवप्रतिपाद्यस्य विश्वादिचतूरूपस्य परब्रह्मणः पूर्व इत्यादिना सृष्ट्यादिकर्ताऽन्यो नास्तीत्युक्तं न केवलमेतावत् किन्तु स्वयमेव सर्वस्य कर्त्तेति वदंस्तदुपासकस्य फलं दर्शयति।

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥ २७॥

टीका—सर्वस्य जगतः। आदिकारणं मध्यं स्थितिकर्ता अन्तं संहारकः। एवेति निश्चये। ज्ञानिनः फलमाह एवमिति। जगदुत्पत्तिस्थितिलयकर्तृत्व ब्रह्मत्वेन सर्वस्माद्भिन्नं ब्रह्मात्मकत्व तन्नियम्यत्वतद्व्याप्यत्व तत्तन्त्रत्वादिनाभिन्नञ्च प्रणववाच्यं हरिं ज्ञात्वा तदनन्तरं प्रारब्धभोगानन्तरं तद् ब्रह्म व्यश्नुते विशेषेण प्राप्नोति सदासत्वेऽपि स्थान विशेषाभिप्रायेणे त्युक्तिः॥ २७॥

प्रणवपदवाच्यस्य परब्रह्मणो महिमान्तरमाह।

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम्।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति॥ २८॥

टीका—ईश्वरं सर्वनियन्तारम्। प्रणवं हरिं सर्वस्यहृदिस्थितं। विद्यादुपासीत। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। तमेव शरणं गच्छ सर्वभावेन भारत, इति श्रीमुखवचनम्। एवं सर्वव्यापिनमोंकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोमित्यादिक्रियमाणत्वादोङ्कारस्तं मत्वोपास्य धीरः ज्ञानी न शोचति ॥ २८ ॥

एवं प्रणवप्रतिपाद्यविश्वादिचतूरूपभगवज्ज्ञानिनः स्तुवन्नुपनिषदं समापयति ।

अमात्रोऽनन्तमात्र श्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥
स मुनिर्नेतरोजनः ॥ २९ ॥

इत्यथर्ववेदीयमाण्डूक्योपनिषदितृतीयः खण्डः ॥ ४ ॥

टीका—अमात्रः भिन्नांशरहितः । यद्वा अंशरहितः मूलरूपेण स्थित इति यावत् । अनन्तमात्रः पुनरनन्तांशः द्वैतस्योपशमः स्वोपासकानां सर्वानिष्टनिवर्तकः शिवः निदुःखसुखस्वरूपः ।

ओमित्याक्रियमाणत्वादोङ्कारो विश्वादिचतूरूपो हरिः । येनाधिकारिणा विदितः सम्यक् श्रवणादिना ज्ञातः । स एव मुनिरपरोक्षज्ञानी भवति । इतरो जनस्तु न मुनिरित्यर्थः । उपनिषदर्थस्य सर्वस्यावधारणार्थमन्ते द्विरुक्तिः ।

निम्बभानुपदद्वन्द्वं सर्वाघनुत्तये नुमः ।
अशेषफलदातारं भक्तजनहृदिस्थितम् ॥ १ ॥

अशेषरसिकचक्रचूडामणिश्रीस्वामिहरिपदाश्रिताश्रितानुगेनामोलकराम विदुषा पूर्वाचार्योक्तिद्वारा संगृहीतायामथर्ववेदीयमाण्डूक्योपनिषत्प्रकाशिकायां तृतीयःखण्डः ॥४॥

समाप्तेयं माण्डूक्योपनिषत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीनिकुञ्जविहारिणेनमः ।

तत्त्वप्रकाशिका टीकासम्वलिता

तैत्तिरीयोपनिषत्

अथ शिक्षावल्ली

श्रीकृष्णाय नमस्तस्मै राधिकानन्ददायिने ।
परमानन्दसन्दोह सान्द्रानन्द वपुष्मते ॥ १ ॥
निम्बादित्यस्य पादाब्जं लोचनानन्ददायकम् ।
सकलार्थप्रदं नृणां प्रणमामि पुनः पुनः ॥ २ ॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम् ।
बादरायणसूत्राणां भाष्यकारं गुणार्णवम् ॥ ३ ॥
सकलान् देशिकान् नत्वा पूर्वाचार्योक्तितः खलु ।
तैत्तिरीयस्य च व्याख्यां व्याकरिष्ये यथामति ॥ ४ ॥

अनेकजन्मादिदुःसहसन्तापोपतप्यमानस्य पुंसः यदि दैववशात् महतां सङ्गः स्यात्तदा संसाराद्विरज्यते ततो विरक्तस्य शमदमादिसाधनसम्पन्नस्य गुरुभक्त्येकनिष्ठस्य भगवदिदृक्षालम्पटस्योपासकस्यात्यन्तिकानिष्टनिवृत्तिपूर्वकं परमानन्दप्राप्तिहेतुभूतानन्ताचिन्त्यापरमितस्वरूपगुणशक्तिवैभवपरब्रह्मभूत श्रीवासुदेवस्वरूपविषयकज्ञानाय प्रवृत्तापीयं तैत्तिरीयोपनिषदन्यस्यव्याख्यानावरुद्धत्वेन न तज्ज्ञापनसमर्था । अतस्तद्व्याख्या पूर्वाचार्योक्तितः प्रतन्यते ॥

तत्रादौ आदित्यसंस्थितो भगवान् वासुदेवः ब्रह्माणं प्रति ब्रह्मविद्यामनुतिष्ठन् भृगुर्विघ्नपरिहारार्थ मेतद्विद्याप्रवर्त्तकत्वादिन्द्रियादिप्रेरकत्वाद्वा मित्रादिदेवान् प्रार्थयते शंनो मित्र इत्यादिना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्यर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं३म् शान्तिः शान्तिः शान्तिः ॥१॥

॥ इति प्रथमोऽनुवाकः ॥

टीका—मित्रो देवता नोऽस्मभ्यं शं सुखमुद्दिश्य भवतु । सुखप्रदो भवत्वित्यर्थः । एवं वरुणाद्याः देवाः नः शमुद्दिश्य भवन्त्वित्यर्थः । उरुक्रम इति विष्णोर्विशेषणम् । उरुरुत्कृष्टः क्रमः पराक्रमो वा पादविक्षेपो वा यस्यासावुरुक्रमः । ब्रह्मणे चतुर्मुखाय नमः । हे वायो ते तुभ्यं नमः । पुनस्तं वायुमपरोक्षतः प्रार्थयते । त्वमेवेति । त्वं प्रत्यक्षम् । अक्षमक्षं प्रति प्रेरकतया स्थितत्वात्प्रत्यक्षशब्दवाच्योऽसि । ब्रह्मासि ब्रह्मात्मकोऽसि । यस्माद्ब्रह्मात्मकोऽसि तस्मात्त्वामेव प्रत्यक्षं ब्रह्मात्मकं वदिष्यामि शिष्येषु उपदिशामि । ऋतं सत्यमित्यत्रापि त्वामित्यनुवर्त्तते । ऋतं यथार्थज्ञानवन्तं सत्यं यथार्थज्ञानपूर्वकं वक्तारं कर्तारमित्यर्थः । तत् ब्रह्मात्मकं वायुरूपं श्रोतारं मामवतु तत् वक्तारं विद्योपदेष्टारञ्चावतु । पुनरवतु मामवतु वक्तारमित्युक्तिरादरार्था । उत्तरत्र प्रवर्तनीयायां विद्यायां प्रसक्तविघ्नानां शान्तिरस्त्वित्याह । शान्तिरिति । अध्यात्मिकाधिदैविकाधिभौतिकविघ्नपरिहाराभिप्रायेण त्रिवारं शान्त्युक्तिः ॥ १ ॥

॥ इति प्रथमोऽनुवाकः ॥

ओं शीक्षां व्याख्यास्यामः । वर्णस्स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥ २ ॥

॥ इति द्वितीयोऽनुवाकः ॥

टीका—ब्रह्मविद्याभ्यसनेच्छोरधिकारिणः पूर्वशीक्षणीयमर्थं प्रतिजानीते । शिक्षामिति । शिक्ष्यत इति शिक्षा शिक्षणीयमर्थमित्यर्थः । व्याख्यास्यामो विशेषेण वक्ष्यामः । तामेव शिक्षामाहुः वर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादिना वर्णः ज्ञातव्य इतिशेषः । वर्णः अकारादिवर्णानामुच्चारणस्थानं कण्ठादि ज्ञातव्यम् । स्वरः । उदात्तानुदात्तादिस्वरितादिरूपो ज्ञातव्यः । मात्रा । अकारादिरूपा एकैको वर्णो ज्ञातव्यः । बलं वर्णोच्चारणहेतुभूतः स्पृष्टेषत्स्पृष्टविवृतादिस्वरूपः प्रयत्नो ज्ञातव्यः । साम वर्णानां सन्धिः ज्ञातव्यः । सन्तानो वर्णानां परम्परा पदवाक्यादिरूपो वर्णसमुदाय इति यावत् ज्ञातव्यः । उपसंहरति । इत्युक्तमिति । शीक्षाध्यायः शिक्षणीयानामर्थानामध्यायोऽध्ययनमुपदेशः इत्येवमस्माभिः कृत इत्यर्थः ।। २ ।।

।। इति द्वितीयोऽनुवाकः ।।

शन्नो मित्र इत्यादिना आदौ देवताप्रार्थने कृतेऽपि प्रतिविद्यमभीष्टफलार्थं देवताप्रार्थनं कर्त्तव्यमित्याशयेन । अथातः संहिताया इति वक्ष्यमाणविद्याप्रवृत्यर्थं पुनर्मित्रादिदेवान् प्रति अभीष्टफलं प्रार्थयते ।

सह नौ यशः । सह नौ ब्रह्मवर्चसं । अथातस्सँ्हिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । तामिह सँ्हिता इत्याचक्षते ।। ३ ।।

टीका—सः मित्रादिवाय्वन्तो देवसमुदायो नौ गुरुशिष्ययोर्निर्विघ्नविद्यासमाप्तिसम्पादनेन । यशो यशस्करोऽस्तु । सह नौ ब्रह्मवर्चसं वेदाध्ययनजनितवर्चोविशेषकरश्च भवतु । हेति मित्रादीनां यशआदिदातृत्वं प्रसिद्धमिति दर्शयति । संहितावर्णानां सन्निकर्षस्तद्विषयमुपासनं वक्तुं प्रतिजानते ऋषयः । अथात इति । अथवर्णशिक्षाव्याख्यानन्तरम् । संहितायाः वर्णसम्बन्धिनीमुपनिषदं पञ्चस्वधिकरणेषु प्रकरणेषु व्याख्यास्यामः सम्यक् कथयामः । अधिकरणनामान्याह । अधिलोकमित्यादिना लोकमधिकृत्य वर्तमानमधिलोकं तन्नामकं प्रथमप्रकरणम् । ज्योतिषां समूहो ज्यौतिषं तदधिकृत्यवर्त्तमानमधिज्यौतिषं तन्नामकं द्वितीयप्रकरणम् । विद्यामधिकृत्य वर्त्तमानमधिविद्यं तन्नामकं तृतीयं

फा० नं० २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकरणम्। प्रजा अधिकृत्य वर्त्तमानमधिप्रजं तन्नामकं चतुर्थप्रकरणम्। आत्मानमधिकृत्य वर्त्तमानमध्यात्मं तन्नामकं पञ्चमप्रकरणम्। ता एताः संहिताः भगवदधिष्ठानत्वेन महासंहिता इत्याचक्षते विद्वांसः ॥ ३ ॥

अथाधिलोकम्। पृथिवीपूर्वरूपं द्यौरुत्तररूपम्। अकाशःसन्धिः। वायुःसन्धानम्। इत्यधिलोकम् ॥ ४ ॥

टीका अथैवं प्रतिज्ञानन्तरमधिलोकं निरूप्यते। तदेव विवृणोति-पृथिवीत्यादिना। पृथिवी पूर्वरूपं पूर्वो वर्णः पूर्वरूपम्। संहिताया पूर्वे वर्णे पृथिवीसंस्थत्वेन भगवद्रूपमुपासीतेत्यर्थः। द्यौः प्रकाशस्वरूपं उत्तर-रूपं संहिताया उत्तरवर्णे प्रकाशस्वरूपत्वेन भगवद्रूपमुपासीत। आकाशो-ऽन्तरिक्षलोकः सन्धिर्मध्यं पूर्वोत्तररूपयोः,सन्धीयेते अस्मिन् पूर्वोत्तररूपे। वायुः सन्धानम्। सन्धिकार्यभूता सन्ध्यक्षरव्यवहरणरूपा सन्धानक्रिया सन्धानशब्देनोच्यते। उपसंहरति। इत्यधिलोकमिति ॥ ४ ॥

अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्। आपः सन्धिः। वैद्युतः सन्धानम्। इत्यधिज्यौतिषम् ॥ ५ ॥

अथाधिविद्यम्। आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनँ् सन्धानम्। इत्यधिविद्यम् ॥ ६ ॥

अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननँ् सन्धानम्। इत्यधिप्रजम् ॥ ७ ॥

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तर-रूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्।

इतीमा महासँ्हिताः। यएवमेता महासँ्हिता व्याख्याता वेद सन्धीयते प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ८ ॥

॥ इति तृतीयोऽनुवाकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—अथाधिलोकनिरूपणानन्तरमधिज्यौतिषं निरूप्यते । सूर्यः अग्निः पूर्वरूपं संहितायाः पूर्ववर्णरूपम् । आदित्यः भौमः । संहिताया उत्तरवर्णरूपम् । एवमग्रेपि योजनीयम् । आपो नीराणि विद्युत एव वैद्युतोऽचिरप्रभवः । आचार्यो गुरुः । अन्तेवासी शिष्यः । विद्याऽऽचार्येणोच्यमाना प्रवचनम् । गुरुशिष्ययोः प्रकर्षेणोच्चारणं विद्यायाः । माता जननी पिता जनकः । प्रजा पुत्रादिः । प्रजननमुत्पत्तिः प्रजायाः । अधरा हनुरधरोष्ठमारभ्य चिबुकफलकाक्रान्ता । उत्तरा हनुरुत्तरमोष्ठमारभ्याऽऽनासामूलम् । वाग् वर्णोच्चारणशक्तं ताल्वादिस्थमिन्द्रियम् । जिह्वा प्रसिद्धा । इतीमाः । इत्येवमिमाः महासंहिताः व्याख्याता इत्यर्थः । महासंहितावेत्तुः फलमाह । य एवमिति । योऽधिकारी एवं पूर्वोक्तप्रकारेणैता व्याख्याताः महासंहिताः वेद जानात्युपासीत । सन्धीयते सम्बध्यते । प्रजया पुत्रादिलक्षणया पशुभिर्गवादिभिः । ब्रह्मवर्चसेन वेदाध्ययनजनित तेजसा अन्नाद्येन अन्नञ्च तदाद्यञ्चान्नाद्यं तेन व्रीहियवादिनेत्यर्थः । सुवर्ग्येण स्वर्गेण लोकेन । प्रजादिभिः सम्पन्नो भवतीत्यर्थः ॥ ५–८ ॥

॥ इति तृतीयोऽनुवाकः ॥

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधयापिहितः श्रुतं मे गोपाय ॥ ६ ॥

टीका—वेदविद्याभ्यासिनःप्रतिभाप्रज्ञापरपर्यायमेधादिना भाव्यम् । अतस्तत्प्राप्त्यर्थं विद्या निरूप्यते । यश्छन्दसामृषभ इत्यादिना । तत्रादौ मेधां प्रार्थयते । यश्छन्दसामिति । यः छन्दसां वेदानां ऋषभोऽधिपतिर्विश्वरूपः पूर्णरूपः यश्चामृतात् । एकवचनं बहुवचनार्थे । अमृतेभ्योऽपौरुषेयत्वेन नित्येभ्यो जरामरणादिविध्वंसनहेतुतयामृतसमानेभ्यो वाच्छन्दोभ्यो वयः सुपर्ण इत्यादिवाक्येभ्योऽधि सम्बभूव सुव्यक्ततयाप्रतिपाद्यस्तदुक्तप्रकारेणोपास्त्या प्रकटो बभूवेति वा स इन्द्रो भक्ताभिलपित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाता वेदव्यासरूपो हरिर्मयोपासितः सन् मा मां मेधया मोक्षार्थकवेदविद्याभ्यासहेतुभूतया प्रज्ञया स्पृणोतु वलयतु प्रज्ञावलयुक्तं करोतु। हे देव वेदव्यास एवं मेधासम्पत्त्यनन्तरम्। अहं त्वत्प्रसादादमृतस्य। वेदस्य धारणो धारको भूयासम्। मोक्षार्थं वेदविद्याश्रवणजनिततत्त्वज्ञानवान् भूयासमिति यावदित्यर्थः। पुनः प्रार्थनीयान्तरमाह 'शरीरमिति' हे देव मे शरीरं विचर्षणं विचक्षणं योग्यम् भवतु। सर्वेन्द्रियाणां भगवत्परत्वं प्रार्थयते जिह्वा मे इत्यादिना हे देव मे मम जिह्वा मधुमत्तमा। मदधिर्मध्विति प्रोक्तो मदः सुखमिहोच्यते मदाधीयतेऽस्मिन्निति मधु ब्रह्म। अतिशयेन तद्वती। तत्प्रतिपादिका भवतु। कर्णाभ्यां भूरि पूर्णं ब्रह्म विश्रुवं विशेषेण श्रृणवानि। इदमुपलक्षणम्। चक्षुषा त्वद्रूपाणि पश्यामीत्यादि द्रष्टव्यम्। हे देव त्वं ब्रह्मणः वेदस्य कोश आवासो निधिरसि मेधया पिहितः। आच्छादितोऽसि पूर्णोऽसीति यावत्। पुनः प्रार्थनीयान्तरमाह। हे देव मे मया श्रुतं दिव्यवेदार्थं गोपाय गोपय। अयोग्यं प्रत्युपदेशविषये बुद्धिमदत्वारक्षस्वेत्यर्थः। गुपूरक्षण इतिधातोः यद्वा मदीयं श्रुतमर्थं गोपाय। अविस्मृतं कुरु। श्रुतं मे मा प्रहासीरिति शाखान्तरोक्तेरयमर्थः॥ ६॥

आवहन्ती वितन्वाना कुर्वाणाचीरमात्मनः।
वासाँसि मम गावश्च। अन्नपाने च सर्वदा।
ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा॥१०॥

टीका—मेधादिसम्पन्नस्याद्यान्नवस्त्राद्यभावे सति मनःक्षोभेण विद्या, न सम्यक्प्रतिष्ठिता भवत्यतस्तदर्थं काञ्चनविद्यामाह। आवहन्तीति। हे स्वाहा स्वीयं स्वीकुरुत। स्वीयमेव हविरादिकं भ्रान्त्या जीवानां स्ववत्प्रतीतं स्वीकुरुत इति स्वाहा स चासावश्चेति स्वाहेति सम्बुद्धिः गोविन्देति शेषः। आत्मनो जीवसमूहानन्नादिसर्वभोगान् आवहन्ती प्रापयन्ती। अजां ग्राममनयदितिवत् द्विकर्मता च। इदानीमितिशेषः। मम पशुभिः अश्वादिभिः सह वासांसि गावो गाः। अन्नपाने च कुर्वाणा वर्त्तते यतः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः तां लोमशां सुशिखण्डोपशोभितां श्रियं लक्ष्मीं मे मयि सर्वदा आवह स्थापय उत्तरत्रापि निश्चलां कुर्वित्यर्थः ॥ १० ॥

आमायन्तु ब्रह्मचारिणः स्वाहा । विमायन्तु ब्रह्मचारिणः स्वाहा । प्रमायन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा । यशो जनेऽसानि स्वाहा । श्रेयान्वस्यसोऽसानि स्वाहा । तं त्वां भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन् सहस्रशाखे निभगाहं त्वयि मृजे स्वाहा ॥ ११ ॥

टीका—अभ्यस्ता विद्या शिष्येभ्यो व्याख्यातैव ज्ञानाधिक्येन सम्पादकतया सम्पूर्णा भवति नान्यथा । आचार्यात्पादमादत्ते पादं शिष्यस्य बुद्धितः । पादं सब्रह्मचारिभ्यः पादं व्याख्यानकौशलादितिवचनात् । अतस्तदर्थं शिष्यसम्पत्तिं प्रार्थयते । आमायान्त्विवति । हे स्वाहा मा मां प्रति ब्रह्मचारिणः शिष्याः । आयन्तु आयान्तु विविधा विविधगोत्रोत्पन्ना प्र प्रकृष्टाः ज्ञानप्रकर्षवन्तः दमाः इन्द्रियनिग्रहवन्तः शमाः भगवन्निष्ठबुद्धयः । व्याख्यातृयशः श्रुत्वैव हि दिग्भ्यः शिष्याः समायान्ति नान्यथा । अतस्तदर्थं यशः प्रार्थयते । यशइति । जने व्याख्यातृजनमध्ये शिष्यागमनार्थं यशो यशस्वी असानि भवानि । हे भग षड्गुणपूर्ण स्वाहा तं त्वा त्वां मनसा प्रविशानि सदा त्वामुपासीनो भवानि । हे भग स्वाहा स त्वं मा मां प्रविश मदुपास्तिविषयो भव किन्तत इत्यत आह । तस्मिन्निति । हे भग स्वाहा सहस्रशाखे बहुरूपे तस्मिंस्त्वयि मनसा प्रविष्टोऽहं त्वामुपासीन इति यावत् । अपरोक्षज्ञानद्वारा पापमप्रारब्धं निमृजे प्रक्षालये ॥ ११ ॥

यथापः प्रवतायन्ति यथा मास अहर्जरम् । एवं मां ब्रह्मचारिणः धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्रमा भाहि प्रमा पद्यस्व ॥ १२ ॥

॥ इति चतुर्थोऽनुवाकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—शिष्याश्चायत्नेनैवायान्त्विति स दृष्टान्तं प्रार्थयते। यथाप इति। यथा आपः, उन्नतप्रदेशे प्रविष्टा अनायासेन प्रवताः निम्नभूमीः। प्रवता स्यान्निम्नभूमिरिति वचनात्। निम्नप्रदेशानिति यावत्। उद्दिश्य-यन्ति गच्छन्ति आयान्तीति यावत्। यथा चाहर्जरम्। अहानि जीर्णानि गतानीति यावत् यत्र भवन्ति सोहर्जरः सम्वत्सरः तं प्रति-मासाः यथा प्रयन्ति तदन्तर्गता भवन्तीति यावत्। एवमेव हे धातः सर्वजगधारकत्वादेव मां प्रति ब्रह्मचारिणः सर्वतो दिग्भ्य आयन्तु आयान्तु। आगत्य च मदाज्ञायां यन्तु तिष्ठन्तु। मदज्ञानुवर्त्तिनो भवन्त्विति यावत्। मोक्षं प्रार्थयते। प्रतिवेशोसीति। हे धातस्त्वमादौ मा मां प्रपद्यस्व पद्लृगतौ णिजन्तं प्रकर्षेण गमय त्वत्समीपं प्रापय। पश्चात्त्वं प्रतिवेशो मुक्तौ मया प्रवेष्टुं योग्योऽसि। अनन्तरं मा मां प्रकर्षेण भाहि भा दीप्तौ। णिच् दीपय प्रकाशय। आनन्दादिसर्वभोगदानेन मत्स्वरूपाविष्करणं कुर्विति यावत्। प्रपद्यस्व प्राप्नुहि च। तस्यैष आत्मा विवृणुते तनूं स्वामिति श्रुतेरिति भावः॥ १२॥

॥ इति चतुर्थोऽनुवाकः॥

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामुह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति। तद्ब्रह्म स आत्मा। अङ्गान्यन्या देवताः॥ १३॥

टीका—पूर्वं वेदविद्याभ्यासिनो मेधादिप्राप्त्यर्थं विद्यानिरूपिताः। सम्प्रति व्याहृतिनिष्ठां विद्यामाह। भूर्भुवःसुवरित्यादिना भूर्भुवःसुव-रित्येताः वै प्रसिद्धाः तिस्रो व्याहृतयः। अनिरुद्धादिमूर्तयो वै प्रसिद्धाः माहाचमस्यः। अतिचमत्कृतित्वान्माहाचमस्यनामाविष्णुस्तं याति जाना-तीति माहाचमस्यो ब्रह्मा। समस्त व्याहृतीनां प्रवेताऽपि मह इति एतां व्याहृतिं पूर्णतत्वप्रतिपाद्यां वासुदेवाख्यां तासां तिसृणां व्याहृतीनां तत्प्रतिपाद्यानां चतुर्व्यूहमूर्तीनां चतुर्थीं चतुर्थीत्वेन प्रवेदयते जानाति इत्येतन् ह स्म प्रसिद्धमित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् व्याहृतिचतुष्टयप्रतिपाद्यं ब्रह्म बृहत्वात्। स अनिरुद्धादिचतुरात्मा भगवान् श्रीकृष्ण आत्मा ब्रह्मादिसर्वदेवानामन्तर्यामी स्वामी वा अन्या देवताः ब्रह्माया अङ्गानि तेनैव जातत्वादागन्तुकानि। अप्रधानानि परिवारतया सेविका इतियावत्॥ १३॥

भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षं। सुवरित्यसौ लोकः। मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। महइति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योती ँषि महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजू ँषि। मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते॥ १४॥

टीका—भूरादिव्याहृतिवाच्यानर्थान् दर्शयति। भूरिति वेति। भूः प्रथमा व्याहृतिः इतिरनुकरणार्थः। वै स्मरणार्थम्। अयं प्रत्यक्षो लोको भूर्लोकः। अन्तरिक्षं द्यावाभूम्योरन्तरालस्थो लोकः। असौ परोक्षो लोकः स्वर्गलोकः। अथवा भूरादिव्याहृतिवाच्यानां तन्नामकानिरुद्धप्रद्युम्नसंकर्षणमूर्त्तीनामुपास्त्यर्थं नामान्तराणि निर्दिष्टानीति। मह इति व्याहृतिवाच्यो वासुदेवः आदित्या आदित्यस्थः। वामनरूपेणादितेः सुतत्वादादित्यशब्दवाच्यश्च। महशब्दोयम् अकारान्तो न तु सकारान्तः। तथात्वे महरित्यादिप्रयोगापत्तेरिति ज्ञातव्यम्। आदित्यस्य महत्वमुपपादयति। आदित्येन वावेति। प्रसिद्धादित्येन सर्वे लोकाः भूम्यन्तरिक्षादयो लोकाः महीयन्ते प्रकाशदानेन पूज्यन्ते प्रकाश्यन्त इति यावत्। इत्येतत् वाव प्रसिद्धम् आदित्यस्थेन वासुदेवेन सर्वे लोकाः भूरादिशब्दवाच्या अनिरुद्धप्रद्युम्नसंकर्षणा महीयन्ते पूज्यन्ते स्वेच्छयेत्यर्थः। महो वासुदेवः चन्द्रमास्तत्रस्थितः। आह्लादकत्वात् चन्द्रमाशब्दवाच्यश्च। तस्य महत्वमुपपादयति। चन्द्रमसेति। सर्वाणि ज्योतींषि। अग्निवाय्वादित्याख्यानि चन्द्रमसा महीयन्ते पूज्यन्ते अलङ्क्रियन्त इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावत्। चन्द्रस्थेन वासुदेवेन सर्वाणि ज्योतींषि, अग्निवाय्वादित्यसंज्ञकानि अनिरुद्धादीनि महीयन्त इत्यर्थः। एवमुत्तरत्रापि योजना द्रष्टव्या अर्थानुसारेण पादबद्धाक्षरा ऋचः। सामानि ऋच एव गीतिमत्यो। यजूंष्यविविक्तितच्छन्दोरूपाणि गद्यानि। मह इति ब्रह्मोंकारः। अखिलवेदप्रतिपादितत्वात् बृहत्वाच्च सर्वेवेदा ऋगाद्याः महीयन्ते शोभन्ते तथा ब्रह्मणा वेद प्रतिपाद्येन बृहत्वात्तच्छब्दवाच्येन वासुदेवेन सर्वे वेदा ऋगादिशब्दवाच्या अनिरुद्धाद्याः ॥ १४ ॥

भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति ॥ १५ ॥

॥ इति पञ्चमोऽनुवाकः ॥

टीका—प्राण उच्छ्वासकर्मा। अपानो निःश्वासकर्मा। व्यानः प्राणापानसन्धिस्थो वीर्यवत्कर्महेतुः। अन्नमदनीयम्। मह इत्यन्नम्। अन्नेन प्रसिद्धेन सर्वे प्राणाद्याः महीयन्ते पूज्यन्ते आप्यायिताः भवन्ति। तथान्नस्थेन तच्छब्दवाच्येन वासुदेवेन सर्वे प्राणाः प्राणादिशब्दवाच्या अनिरुद्धाद्याः महीयन्त इत्यर्थः। उपसंहरति। ता वा एता इति। अत्रैव प्रत्येकश इति पदद्वयमध्याहार्यं तथा च ता वा एतश्चतस्रोऽनिरुद्धादिमूर्तयः। एवं भूरिति वा अयं लोक इत्यादि प्रकारेण प्रत्येकशश्चतुर्धा एवं सति षोडशमूर्त्तयः सम्पन्ना इत्यर्थः। एवं षोडशमूर्त्तिवेत्तुः फलमाह। चतस्रश्चतस्र इति या इति शेषः याश्चतस्रः व्याहृतयो भूरादि व्याहृतिचतुष्टय प्रतिपाद्या अनिरुद्धादिमूर्त्तयः याश्च प्रत्येकशश्चतस्रश्चतस्रः भूरिति वा अयं लोक इत्यादि प्रकारेण षोडशमूर्त्तय इति यावत्। ताः यो माहाचमस्य नामा चतुर्मुखो वेद सः सावधारणमेतत् स एव ब्रह्म वेद सम्यक् परब्रह्मज्ञानी तस्यैव सम्यक् षोडशात्मस्वरूपवित्वादिति भावः। अस्मै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्यक् षोडशात्मविदे सर्वे देवा बलिं पूजां च। आ अतितरां वहन्ति प्रापयन्ति कुर्वन्तीति यावदित्यर्थः।

॥ इति पञ्चमोऽनुवाकः॥

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्त्तते। व्यपोह्य शीर्ष-कपाले॥ १५॥

टीका—एवं भूरादिनामिनोऽनिरुद्धादेर्लोकादावुपास्तिमभिधाय देहे चोपास्तिमधिष्ठानकथनपूर्वमाह। 'स एष इत्यादिना। य एषः प्रसिद्धः हृदयान्तराकाशो वर्त्तते तस्मिन् दहराकाशे सोऽयं मनोमयः मनः प्रधानो। पुरुषोऽनिरुद्धोऽस्ति। स कीदृश इत्यत आह। अमृत इत्यादि। अमृतो देहनाशेऽपि नाशशून्यः। हिरण्मयः। हिरण्यं वाह्यसुखविलक्षणं सुखं। मयट् चाधिक्यार्थे तथाचेतरविलक्षण पूर्णानन्दस्वरूप इत्यर्थः। प्रद्युम्नस्य स्थानमाह। अन्तरेणेति।

तालुके तालुकस्य अन्तरेण मध्ये य एषः प्रसिद्धः स्तन इव अजा गलस्तन इवावलम्बते सा इन्द्रस्य तन्नामकस्य प्रद्युम्नस्य योनिराधार-स्थानम्। योनिशब्दापेक्षया सेति स्त्रीलिङ्गम्। सङ्कर्षणस्थानमाह। यत्र-सात्रिति। यत्र यः विः सुपर्णरूपत्वात् विनामकः सङ्कर्षणः। असौ यत्र देहे केशान्तः प्रथमा सप्तम्यर्थे केशान्ते केशमूले वर्त्तते। वासुदेवस्थानमाह। व्यपोहीति। जगति व्यपगते सति प्रलयकाले स्थातृत्वेन व्यपः व्यपशब्द-वाच्यः हि तथात्वेन स्मृत्यादि प्रसिद्धः वासुदेवः। अशीर्षकपाले नञ् पर्य्यु-दासार्थः। तथा च शीर्षसम्बन्धिनीये कपाले उभयपार्श्वभागाविति यावत्। ताभ्यां भिन्ने स्थाने कपालादुपरिगतस्थान इति यावत् तिष्ठतीत्यर्थः॥१५॥

भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ। सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनस्पतिम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति ॥ १६ ॥

— पुनरपि भूरादिनामिनोऽनिरुद्धादेरधिदैवमग्न्यादावाधिष्ठाने उपास्ति प्रकारमाह । भूरित्यग्न्यावित्यादिना । भूरिति नामाऽनिरुद्धोऽग्नौ प्रतिष्ठति संव्यवस्थितः । भुव इति कीर्तितः प्रद्युम्नो वायौ तिष्ठति सुवरिति नामा संकर्षण आदित्ये सूर्ये तिष्ठति । मह इति नामा वासुदेवो ब्रह्मणि चतुर्मुखे तिष्ठति । वासुदेवस्य परिच्छिन्ने चतुर्मुखाख्याधिष्ठाने स्थितत्वोक्त्या प्राप्त परिच्छिन्नत्वशङ्कां परिहरति । आप्नोतीति । स्वाराज्यम् । स्वस्याधीनतया आसमन्ताद्विद्यमानं यद्राज्यमव्याकृताकाशादिकं जगत् तत् आप्नोति । मनस्पतिम् । मनःशब्दोपलक्षितस्य ज्ञानक्रियाशक्तेरन्तःकरणपतिं फलयितारं । वाक्पतिः वागिति कर्मेन्द्रियमात्रस्योपलक्षणम् वाचः पतिर्वाक्पतिः । चक्षुष्पतिः श्रोत्रपतिः स्पष्टम् । चक्षुः श्रोत्रयोर्ग्रहणं त्वग्घ्राणरसनानामुपलक्षणार्थम् । विज्ञानपतिः विज्ञानं बुद्धिस्तस्यपतिः । एतत् एतेषु वागादीन्द्रियेषु ततो नित्यं स्थित इत्यर्थः । मनोऽनधिष्ठितेन्द्रियाणां स्वस्य कार्यजननाक्षमत्वान्मनोधिष्ठितत्वं तावदिन्द्रियाणामपेक्षितं मनसि चानिरुद्धस्य सत्त्वेन तेषां तद्व्याप्तत्वप्राप्तौ मनोनामकानिरुद्धे वासुदेवस्य व्याप्ततयावस्थितत्वेन वागादीन्द्रियेषु वासुदेवस्तिष्ठतीति व्याप्त्या भवति वासुदेवो वागादिपतिरितिभावः ॥ १६ ॥

आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्व ॥ १७ ॥

॥ इति षष्ठोऽनुवाकः ॥

टीका—प्रकृतस्यैव वासुदेवस्य महिमानमाह आकाशेति । वासुदेवाख्यं ब्रह्म आकाशशरीरं आकाशवत् व्याप्तशरीरं सत्यात्मनिर्दोषगुणस्वरूपं प्राणारामम् । प्राणं बलरूपञ्च तत् आराममानन्दरूपञ्चेति प्राणारामम् । मन आनन्दम् । मन अवबोधन इति धातोः मनोज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपञ्च तत् आनन्दरूपञ्चेति तथोक्तम् । शान्ति शस्य सुखस्य तदुन्नतिपरम्पराया इति यावत् । अन्ति अन्ते स्थितम् । निरवधिकसुखोन्नतियुक्तमित्यर्थः । समृद्धम् । सं सम्यक् स्वतः, अन्यप्रसादमन्तरेण ऋद्धं पूर्णम् । अमृतं नित्यमुक्तम् हे प्राचीनयोग्य अधिकारवर्गेषु प्राधान्यात् प्राथमिक योग्य इति पूर्वोक्तप्रकारेण । अनिरुद्धादिरूपिणं मामुपास्व ममोपास्तिं कुर्विति चतुर्मुखंप्रति विष्णोर्वचनम् ॥ १७ ॥

॥ इति षष्ठोऽनुवाकः ॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् चर्म मांसँ स्नावास्थिमज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदँ सर्वम् । पाङ्क्तेनैव पाङ्क्तँ स्पृणोतीति ॥ १८ ॥

॥ इति सप्तमोऽनुवाकः ॥

टीका—दिशः प्राच्याद्याः । अवान्तरदिशः आग्नेयाद्याः कोणाः । ओषधयः फलपाकान्ताः व्रीह्यादयः । वनस्पतयः । अश्वत्थाद्याः आत्मा अहंकारतत्त्वम् । इत्यधिभूतम् । भूतसम्बन्धपाङ्क्तम् । इति निरूपितमित्यर्थः । अथाध्यात्मम् । आत्मानं देहमधिकृत्यविद्यमानम् । तत्सम्बन्धीति यावत् पाङ्क्तं निरूप्यत इत्यर्थः स्नावेन सहितं अस्थिस्नावास्थि । एतत् पृथिव्यादिपाङ्क्तषट्कम् । अधिविधायाधिकृत्य ऋषिमुख्यत्तो वेदद्रष्टा वासुदेवोऽवोचत् । किमवोचदित्यतस्तदेव दर्शयति । पाङ्क्तं वा इदमिति । इदं सर्वं पृथिव्यादिवाय्वादिकं पाङ्क्तं पञ्चत्वसङ्ख्ययोपेतं तथा चेदं पाङ्क्तं पृथिव्याद्यं पाङ्क्तषट्कं स्वयं हरिः पाङ्क्तेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चत्वसङ्ख्योपेतेन नारायणादिरूपेण प्रविष्टः सन्निति शेषः स्पृणोति वलयति स्वस्वकार्यक्षमं करोतीत्यर्थः ॥ १८ ॥

॥ इति सप्तमोऽनुवाकः ॥

ओमिति ब्रह्म । ओमितीदँ सर्वम् । ओमित्येतदनुकृतिह स्म वा अप्योश्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओमिति शस्त्राणि शँसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमितिब्रह्मा प्रस्तौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १९ ॥

॥ इत्यष्टमोऽनुवाकः ॥

टीका—वेदविद्याभ्यासिनः पूर्वभाविनीं प्रणवविद्यामाह ! ओमिति ब्रह्मेत्यादिना । ओङ्कारवाच्यो ब्रह्मभगवान्वासुदेवः यद्यद्भगवतो रूपं तदिदं सर्वमोमितिशब्देनोच्यते । समस्तरूपसहितस्य भगवत ओंकारवाच्यत्वं कुतः सिद्धमिति चेत् । भगवन्तमुद्दिश्य कर्मकर्तृभिः अध्वर्य्यादिभिर्नियमेन तदादावुच्चार्यमाणत्वादित्यभिप्रेत्याह । अप्यइति । अपि तस्मादोङ्कारस्य भगवद्वाचकत्वादेव भगवदुद्देशेन कर्मकर्त्तारोऽध्वर्यवः ओंश्रावयेत्याश्रावयन्ति । ओमित्युच्चार्य्य आश्रवयेत्याश्राव मन्त्रं पठन्ति । अन्यथा तन्न स्यादित्यर्थः । ननु कर्मकर्तृभिरध्वर्युभिः भगवदुद्देशेनोमित्युचार्याश्रावमन्त्रपाठेनोमित्यस्यैव भगवद्वाचकत्वं प्राप्तं नत्वोंकारस्येत्यत उक्तम् । ओमित्येतदनुकृतीति । ओं इत्येतत् ओमित्येतदनुकृति ओमित्येतदक्षररूपम् । ओंकारोकारयोरेकार्थत्वमेवेत्यर्थः । ह स्म वा इति निपातत्रयेणेदं सुप्रसिद्धमिति द्योतयति । तथा भगवदुद्देशेन कर्मकर्त्तारः । उद्गातार ओमित्युचार्य्य सामानि गायन्ति उद्गान् मन्त्रान् पठन्तिं । तथा भगवदुद्देशेन कर्मकर्त्तारो होतारः । ओमित्युच्चार्य्य ओं शों शावेति शस्त्राणि शंसन्ति मन्त्रविशेषान् पठन्ति । तथा भगवदुद्देशेन कर्मकर्त्ताऽध्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युरोमित्युच्चार्य्य ओधामोदैवतेति प्रतिगरं प्रतिगृणाति। प्रतिगिर संज्ञ मन्त्रं विशेषं पठति। कर्मकर्त्ता ब्रह्माख्य ऋत्विक् ओमित्युचार्य्य प्रसौति। सोमस्य प्रकर्षेण प्रसवनकण्डनं करोति। यजमानः ओमित्युच्चार्य्याग्निहोत्रमनुजानाति। अनुतिष्ठतीति यावत्। तथाहं ब्रह्मपरं ब्रह्मोपाप्नुवानि प्राप्नुयामित्यभिप्रेत्य प्रवक्ष्यन् अञ्जसा स्वाध्यायकृत् ब्राह्मणः। ओमित्याह। ओमित्युच्चार्य्य स्वाध्यायं करोतीत्यर्थः। तस्य फलमाह। ब्रह्मैवेति। एवं जानन्त एते अध्वर्य्वाद्याः। ओङ्कारवाच्यं परब्रह्मैवाप्नोति। एकवचनंबहुवचनार्थे आप्नुवन्ति। प्राप्नुवन्तीत्यर्थः॥ १६॥

॥ इत्यष्टमोऽनुवाकः॥

ऋतञ्च स्वाध्यायप्रवचने च। सत्यञ्च स्वाध्यायप्रवचने च। तपश्च स्वध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचनेच। अग्निहोत्रञ्च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषञ्च स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च॥२०॥

टीका—ऋतं यथार्थज्ञानं स्वाध्यायोऽध्ययनम्। प्रवचनमध्यापनम्। एतानि कर्त्तव्यानीतिशेषः। एवमुत्तरत्रापि कर्तव्यपदानुवृत्तिर्द्रष्टव्या। ऋतस्य कर्त्तव्यत्वं नाम सम्पाद्यत्वम्। सत्यं यथार्थज्ञानपूर्वकं यथार्थवचनम् तत्पूर्वकं सत्कर्मकरणञ्च। तपः एकादश्यादिष्वुपवासः भगवद् ध्यानञ्च। दमः इन्द्रियनिग्रहः। शमो बुद्धेः भगवन्निष्ठता। अग्नयः अग्नीनां पूजा, अग्नीनामाधानं वा, अग्निहोत्रं तन्नामकं कर्म। अतिथयः अतिथीनां पूजा। मानुषं स्वस्वज्ञानाधिक्येऽपि मानुषधर्मप्रवर्त्तनमेव कार्यं न तु ज्ञानाद्यैश्वर्यप्रकटनमयोग्येषु कार्यमित्यर्थः। प्रजा शिष्यपुत्रादिरूपा। प्रजारक्षणमन्नज्ञानादिदानेन प्राप्तमयादिनिवारणेन च कर्तव्यमित्यर्थः। प्रजनः पुनः प्रजननं पुत्ररूपेण सन्तति कृतिः। प्रजातिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्पन्नेतनये उपनयनादिकर्मभिः ब्राह्मण्यरूपप्रकृष्टजातिकरणम्। अत्र सर्वत्र सत्यादिभिः सह पुनः स्वाध्यायप्रवचनयोः कर्तव्यत्वोक्तिः सत्याद्यपेक्षया-ऽत्यावश्यकत्वज्ञापनार्थेति द्रष्टव्यम् ॥ २० ॥

सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः तद्धि तपस्तद्धि तपः ॥२॥ २१ ॥

टीका—अत्र कर्त्तव्यत्वोक्तानां ऋतस्वाध्यायप्रवचनसत्यादीनां किं परस्परं साम्यमुत तत्रैकस्याधिक्यमिति शङ्कायां तत्र ऋषिमतान्याह। सत्यमित्यादिना। सत्यवचाः सत्यवचन एव निरतो रथीतरस्यापत्यं राथीतरः तन्नामा ऋषिः सत्यमिति निरुक्तं सत्यमेव श्रेयः साधनमिति तदेव सम्पाद्यम्। तत्रैव तप आदेः सर्वस्यान्तर्भावादित्याह। तपोनित्यः तपोनिष्ठः पुरुशिष्टेर-पत्यं पुमान् पौरुशिष्टिस्तन्नामा कश्चिदृषिः। तप इति ध्यानादिरूपं तप एव श्रेयः साधनमिति तदेव कर्त्तव्यम्। तत्रैव ऋतसत्यत्वादीनामन्तर्भावा-दित्याह। मुद्गलस्यापत्यं तद्गोत्रापत्यं वा मौद्गल्यो नाको नामतः स्वाध्यायप्रवचन एव कर्त्तव्ये इत्याह कुत इत्यत ऋतसत्यतपआदीनां सर्वेषामपि स्वाध्यायप्रवचनयोरेव विशेषतोऽन्तर्भावेण तयोरेवमोक्ष-साधनेषु प्रधानादित्यभिप्रेत्याह। तद्धीति। तत् स्वाध्यायप्रवचनकरण-मेव तपः। इदमुपलक्षणं तद्धि सत्यमपि द्रष्टव्यम्। हि शब्देन प्राणाया-मादयस्तुष्टिपर्यन्ता द्विगुणाधिकाः स्वाध्यायोऽतः कोटिगुणः। तपआद्याः क्रमात्सर्वे उत्तरोत्तरतोऽधिकाः। अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा। ध्यानं निश्चिततत्वस्य तस्माच्छास्त्रावमर्शनम्। वरं दशगुणं तस्मात् व्याख्यैकस्य शतोत्तरेति प्रमाणप्रसिद्धिं दर्शयति। अत इदमेव मतं पूर्वम-तस्यापेक्षयाऽधिकमितिभावः। द्विरुक्तिस्तात्पर्य्यद्योतनार्थो ॥ २१ ॥

॥ इति नवमोऽनुवाकः ॥

अहं वृक्षस्य रेरिवा। कीर्त्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि। द्रविण्ँ सवर्चसम्। सुमेधा अमृतो-क्षितः ॥ २२ ॥

॥ इति दशमोऽनुवाकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—पूर्वं ऋतादेः सर्वस्मात् स्वाध्यायप्रवचनयोराधिक्यमुक्तम्। इदानीं तत्फलमाख्यायिकया निरूपयति। अहं वृक्षस्येत्यादिना। संसरत्यनेनेति संसारः लिङ्गदेहः। तस्य रेरिवा, छेत्ता रीङ्क्षय इति धातोः। कीर्त्तिः। सत्कीर्त्तिः। पृष्ठं गिरेरिव, पर्वतपृष्ठोपमाविस्तारेणेतिशेषः। यथा पर्वताऽधोभाग ऊर्ध्वभागापेक्षया विस्तृतो भवत्येवं सत्कीर्तिरपि सर्वत्र विस्तृतेत्यर्थः। ऊर्ध्वं पवित्रो उन्नतोऽयूर्ध्व उच्यत इति वचनादूर्ध्वशब्दस्योन्नतवाचित्वम्। उन्नतत्वञ्चात्युत्कृष्टत्वमत्युत्कृष्टश्च हरिरेव स्वाध्यायप्रवचनादिसम्पत्त्याऽपरोक्षज्ञानानन्तरमहमादौ तावदूर्ध्वे नात्युत्कृष्टेन विष्णुना पवित्रः पावितोऽप्रारब्ध समस्तपापरहितोऽस्मि। तद्यथैषीकतूलमिति श्रुतेः। तदनन्तरं प्रारब्धकर्मणां भोगेन क्षये चरमदेहपातानन्तरमर्चिरादिद्वारेण सूर्यलोकं प्राप्य तत्र वाजिरूपश्च नेता च वाजिनीः सूर्यस्तत्र वसतीति वाजिनीवसुस्तेन वाजिनीवसुना विष्णुना। अमृतं प्रारब्धकर्मशेष निर्मुक्तश्चास्मि विरजां प्राप्य तत्र लिङ्गशरीराख्यवृक्षस्य रेरिव छेत्ताऽस्मि। अनन्तरमभिव्यक्तबहुतरानन्दमनुभवन्नैव सवर्चसं द्रविणं सुवर्णमिवाहं जातम्। वर्चस शब्दोऽकारान्तोप्यस्ति। ब्रह्महस्तिभ्यां वर्चस इत्यत्र योगविभागात्समासान्तो वा।

न केवल सर्ववर्चसं द्रविणमस्मि किं नाम सुमेधाः। सुष्ठु अभिव्यक्तं मेधा ज्ञानं यस्यासौ सुमेधाश्चास्मि। अमृतेन मरणरहितेन भगवता उक्षितः सिक्तो व्याप्तः। तत्सन्निधानविशेषयुक्तश्चास्मीत्येवं मे कीर्तिः स्वाध्यायप्रवचनजन्य यशोलक्षणा गिरेः पृष्ठमिव पर्वताधोभागवत् विस्तृता। दिगन्तविश्रान्ता जातेत्यर्थः। कस्येदं वचनमित्यप्रतीतेः श्रुतिः स्वयमाह। इतीति। इत्येवं वैवस्वतमनुवंशोत्पन्नस्य हरिश्चन्द्रपितुः त्रिशङ्कोस्तन्नाम्नो राज्ञो वेदानुवचनम्। वेदप्रवचनजन्यं फलं निरूपितमित्यर्थः ॥ २२ ॥

॥ इति दशमोऽनुवाकः ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ २१ ॥

टीका—ब्रह्मविद्याव्याख्यानानन्तरमाचार्येणान्तेवासिनं प्रति शिक्षणीयान्नियमानाह वेदमनूच्येत्यादिना । आचार्यो वेदमनूच्य व्याख्याय अन्ते समीप एव वसतीत्यन्तेवासी शिष्यस्तमनुशास्ति शिक्षयति शिक्षाप्रकारमाह सत्यंवदेति । सत्यवचननिष्ठो भव धर्मं चर । स्ववर्णाश्रम-विहितं कर्म चर । आचर । स्वाध्यायात् अधीत वेदादिशास्त्रात् । मा प्रमदः प्रमादयुक्तो मा भूः । तद्विस्मृतिमान् मा भूरिति यावत् । यद्वा । अनध्यायातिरिक्तदिवसेषु व्याख्यानविषये प्रमादयुक्तो मा भूरित्यर्थः । आचार्य्यकुले वेदाध्ययनानन्तरं प्रियं तदभिलषितं यद्धनं तत् । आचार्य्याय आहृत्य दक्षिणात्वेन दत्वा प्रजातन्तुं प्रजासन्ततिं मा व्यवच्छेत्सीः माच्छे-दय गृहस्थाश्रमस्वीकारं कुर्विंतियावत् । सत्योक्तौ धर्माचरणे च तात्पर्यद्योत-नाय तदुभयविषये प्रमादो मास्त्वित्याह । सत्यादित्यादिनाकुशलात् क्षेमकरा-त्कर्मणोऽदृष्टार्थान्न प्रमदितव्यम् । भूत्यै, ज्ञानमोक्षाख्यैश्वर्यविषये न प्रम-दितव्यम् । यद्वा भूत्यै भूत्या । दैवान्महैश्वर्यप्राप्त्या तत्प्राप्तावपीति-यावत् । उक्त सत्यादिविषये न प्रमदितव्यमित्यर्थः ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकँ्सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । ये केचास्मच्छ्रेयाँ्सो ब्राह्मणास्तेषां त्वयाऽऽसने न प्रश्वसितव्यम् ॥२२॥

टीका—देवतोद्देशेन क्रियमाणं कर्त्तव्यं देवकार्यं समाराधनादि । पितॄनुद्दिश्य क्रियमाणं कर्त्तव्यं पितृकार्यं श्राद्धादि ताभ्यां न प्रमदितव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्यक् षोडशात्मविदे सर्वे देवा बलिं पूजां च । आ अतितरां वहन्ति प्रापयन्ति कुर्वन्तीति यावदित्यर्थः ।

॥ इति पञ्चमोऽनुवाकः ॥

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्त्तते । व्यपोह्य शीर्ष-कपाले ॥ १५ ॥

टीका—एवं भूरादिनामिनोऽनिरुद्धादेर्लोकादावुपास्तिमभिधाय देहे चोपास्तिमधिष्ठानकथनपूर्वमाह । स एष इत्यादिना । य एषः प्रसिद्धः हृदयान्तराकाशो वर्त्तते तस्मिन् दहराकाशे सोऽयं मनोमयः मनः प्रधानो । पुरुषोऽनिरुद्धोऽस्ति । स कीदृश इत्यत आह । अमृत इत्यादि । अमृतो देहनाशेऽपि नाशशून्यः । हिरण्मयः । हिरण्यं वाह्यसुखविलक्षणं सुखं । मयट् चाधिक्यार्थे तथाचेतरविलक्षण पूर्णानन्दस्वरूप इत्यर्थः । प्रद्युम्नस्य स्थानमाह । अन्तरेणेति ।

तालुके तालुकस्य अन्तरेण मध्ये य एषः प्रसिद्धः स्तन इव अजा गलस्तन इवावलम्बते सा इन्द्रस्य तन्नामकस्य प्रद्युम्नस्य योनिराधार-स्थानम् । योनिशब्दापेक्षया सेति स्त्रीलिङ्गम् । सङ्कर्षणस्थानमाह । यत्र-साविति । यत्र यः विः सुपर्णरूपत्वात् विनामकः सङ्कर्षणः । असौ यत्र देहे केशान्तः प्रथमा सप्तम्यर्थे केशान्ते केशमूले वर्त्तते । वासुदेवस्थानमाह । व्यपोहीति । जगति व्यपगते सति प्रलयकाले स्थातृत्वेन व्यपः व्यपशब्द-वाच्यः हि तथात्वेन स्मृत्यादि प्रसिद्धः वासुदेवः । अशीर्षकपाले नञ् पर्य्यु-दासार्थः । तथा च शीर्षसम्बन्धिनीये कपाले उभयपार्श्वभागाविति यावत् । ताभ्यां भिन्ने स्थाने कपालादुपरिगतस्थान इति यावत् तिष्ठतीत्यर्थः ॥१५॥

भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनस्पतिम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति ॥ १६ ॥

पुनरपि भूरादिनामिनोऽनिरुद्धादेरधिदैवमग्न्यादावाधिष्ठाने उपास्ति प्रकारमाह । भूरित्यग्न्यावित्यादिना । भूरिति नामाऽनिरुद्धोऽग्नौ प्रतिष्ठति संव्यवस्थितः । भुव इति कीर्तितः प्रद्युम्नो वायौ तिष्ठति सुवरिति नामा संकर्षण आदित्ये सूर्ये तिष्ठति । मह इति नामा वासुदेवो ब्रह्मणि चतुर्मुखे तिष्ठति । वासुदेवस्य परिच्छिन्ने चतुर्मुखाख्याधिष्ठाने स्थितत्वोक्त्या प्राप्त परिच्छिन्नत्वशङ्कां परिहरति । आप्नोतीति । स्वाराज्यम् । स्वस्याधीनतया आसमन्ताद्धियमानं यद्राज्यमव्याकृताकाशादिकं जगत् तत् आप्नोति । मनस्पतिम् । मनःशब्दोपलक्षितस्य ज्ञानक्रियाशक्ते रन्तःकरणपतिं फलयितारं । वाक्पतिः वागिति कर्मेन्द्रियमात्रस्योपलक्षणम् वाचः पतिर्वाक्पतिः । चक्षुष्पतिः श्रोत्रपतिः स्पष्टम् । चक्षुः श्रोत्रयोर्ग्रहणं त्वग्घ्राणरसनानामुपलक्षणार्थम् । विज्ञानपतिः विज्ञानं बुद्धिस्तस्यपतिः । एतत् एतेषु वागादीन्द्रियेषु ततो नित्यं स्थित इत्यर्थः । मनोऽनधिष्ठितेन्द्रियाणां स्वस्य कार्यजननाक्षमत्वान्मनोधिष्ठितत्वं तावदिन्द्रियाणामपेक्षितं मनसि चानिरुद्धस्य सत्त्वेन तेषां तद्व्याप्तत्वप्राप्तौ मनोनामकानिरुद्धे वासुदेवस्य व्याप्ततयावस्थितत्वेन वागादीन्द्रियेषु वासुदेवस्तिष्ठतीति व्याप्त्या भवति वासुदेवो वागादिपतिरितिभावः ॥ १६ ॥

आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्व ॥ १७ ॥

॥ इति षष्ठोऽनुवाकः ॥

टीका—प्रकृतस्यैव वासुदेवस्य महिमानमाह आकाशेति । वासुदेवाख्यं ब्रह्म आकाशशरीर आकाशवत् व्याप्तशरीरं सत्यात्मनिर्दोषगुणस्वरूपं प्राणारामम् । प्राणं बलरूपञ्च तत् आराममानन्दरूपञ्चेति प्राणारामम् । मन आनन्दम् । मन अवबोधन इति धातोः मनोज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपञ्च तत् आनन्दरूपञ्चेति तथोक्तम् । शान्ति शस्य सुखस्य तदुन्नतिपरम्पराया इति यावत् । अन्ति अन्ते स्थितम् । निरवधिकसुखोन्नतियुक्तमित्यर्थः । समृद्धम् । सं सम्यक् स्वतः, अन्यप्रसादमन्तरेण ऋद्धं पूर्णम् । अमृतं नित्यमुक्तम् हे प्राचीनयोग्य अधिकारवर्गेषु प्राधान्यात् प्राथमिक योग्य इति पूर्वोक्तप्रकारेण । अनिरुद्धादिरूपिणं मामुपास्व ममोपास्तिं कुर्विति चतुर्मुखंप्रति विष्णोर्वचनम् ॥ १७ ॥

॥ इति षष्ठोऽनुवाकः ॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाशआत्मा । इत्यधिभूतम् । अथाध्यात्मम् प्राणो व्यानोऽपानउदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् चर्म मांसँ् स्नावास्थिमज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदँ् सर्वम् । पाङ्क्तेनैव पाङ्क्तँ् स्पृणोतीति ॥ १८ ॥

॥ इति सप्तमोऽनुवाकः ॥

टीका—दिशः प्राच्याद्याः । अवान्तरदिशः आग्नेयाद्याः कोणाः । ओषधयः फलपाकान्ताः व्रीह्यादयः । वनस्पतयः । अश्वत्थाद्याः आत्मा अहंकारतत्त्वम् । इत्यधिभूतम् । भूतसम्बन्धपाङ्क्तम् । इति निरूपितमित्यर्थः । अथाध्यात्मम् । आत्मानं देहमधिकृत्यविद्यमानम् । तत्सम्बन्धीति यावत् पाङ्क्तं निरूप्यत इत्यर्थः स्नावेन सहितं अस्थिस्नावास्थि । एतत् पृथिव्यादिपाङ्क्तषट्कम् । अधिविधायाधिकृत्य ऋषिर्मुख्यतो वेदद्रष्टा वासुदेवोऽवोचत् । किमवोचदित्यतस्तदेव दर्शयति । पाङ्क्तं वा इदमिति । इदं सर्वं पृथिव्यादिवाय्वादिकं पाङ्क्तं पञ्चत्वसङ्ख्ययोपेतं तथा चेदं पाङ्क्तं पृथिव्याद्यं पाङ्क्तषट्कं स्वयं हरिः पाङ्क्तेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चत्वसङ्ख्योपेतेन नारायणादिरूपेण प्रविष्टः सन्निति शेषः स्पृणोति वलयति स्वस्वकार्यक्षमं करोतीत्यर्थः ॥ १८ ॥

॥ इति सप्तमोऽनुवाकः ॥

ओमिति ब्रह्म । ओमितीदँ सर्वम् । ओमित्येतदनुकृतिहस्म वा अप्योश्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओमिति शस्त्राणि शँसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमितिब्रह्मा प्रस्तौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १९ ॥

॥ इत्यष्टमोऽनुवाकः ॥

टीका—वेदविद्याभ्यासिनः पूर्वभाविनीं प्रणवविद्यामाह ! ओमिति ब्रह्मेत्यादिना । ओङ्कारवाच्यो ब्रह्मभगवान्वासुदेवः यद्यद्भगवतो रूपं तदिदं सर्वमोमितिशब्देनोच्यते । समस्तरूपसहितस्य भगवत ओंकारवाच्यत्वं कुतः सिद्धमिति चेत् । भगवन्तमुद्दिश्य कर्मकर्तृभिः अध्वर्य्यादिभिर्नियमेन तदादावुच्चार्यमाणत्वादित्यभिप्रेत्याह । अप्यइति । अपि तस्मादोङ्कारस्य भगवद्वाचकत्वादेव भगवदुद्देशेन कर्मकर्त्तारोऽध्वर्यवः ओंश्रावयेत्याश्रावयन्ति । ओमित्युच्चार्य्य आश्रवयेत्याश्राव मन्त्रं पठन्ति । अन्यथा तन्न स्यादित्यर्थः । ननु कर्मकर्तृभिरध्वर्युभिः भगवदुद्देशेनोमित्युचार्याश्रावमन्त्रपाठेनोमित्यस्यैव भगवद्वाचकत्वं प्राप्तं नत्वोंकारस्येत्यत उक्तम् । ओमित्येतदनुकृतीति । ओं इत्येतत् ओमित्येतदनुकृति ओमित्येतदक्षररूपम् । ओंकारोकारयोरेकार्थत्वमेवेत्यर्थः । ह स्म वा इति निपातत्रयेणेदं सुप्रसिद्धमिति द्योतयति । तथा भगवदुद्देशेन कर्मकर्त्तारः । उद्गातार ओमित्युचार्य्य सामानि गायन्ति उद्गान् मन्त्रान् पठन्ति । तथा भगवदुद्देशेन कर्मकर्त्तारो होतारः । ओमित्युच्चार्य्य ओं शों शावेति शस्त्राणि शंसन्ति मन्त्रविशेषान् पठन्ति । तथा भगवदुद्देशेन कर्मकर्त्ताऽध्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्युरोमित्युच्चार्य्य ओधामोदैवतेति प्रतिगरं प्रतिगृणाति। प्रतिगिर संज्ञ मन्त्रं विशेषं पठति। कर्मकर्त्ता ब्रह्माख्य ऋत्विक् ओमित्युचार्य्य प्रसौति। सोमस्य प्रकर्षेण प्रसवनकण्डनं करोति। यजमानः ओमित्यु-च्चार्य्याग्निहोत्रमनुजानाति। अनुतिष्ठतीति यावत्। तथाहं ब्रह्मपरं ब्रह्मो-पाप्नुवानि प्राप्नुयामित्यभिप्रेत्य प्रवक्ष्यन् अञ्जसा स्वाध्यायकृत् ब्राह्मणः। ओमित्याह। ओमित्युच्चार्य्य स्वाध्यायं करोतीत्यर्थः। तस्य फलमाह। ब्रह्मैवेति। एवं जानन्त एते अध्वर्य्वाद्याः। ओङ्कारवाच्यं परब्रह्मै-वाप्नोति। एकवचनंबहुवचनार्थे आप्नुवन्ति। प्राप्नुवन्तीत्यर्थः॥ १६॥

॥ इत्यष्टमोऽनुवाकः॥

ऋतश्च स्वाध्यायप्रवचने च। सत्यश्च स्वाध्यायप्रवचने च। तपश्च स्वध्यायप्रवचने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचनेच। अग्निहोत्रश्च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषश्च स्वाध्यायप्रवचने च। प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च ॥२०॥

टीका—ऋतं यथार्थज्ञानं स्वाध्यायोऽध्ययनम्। प्रवचनमध्यापनम्। एतानि कर्त्तव्यानीतिशेषः। एवमुत्तरत्रापि कर्तव्यपदानुवृत्तिर्द्रष्टव्या। ऋतस्य कर्त्तव्यत्वं नाम सम्पाद्यत्वम्। सत्यं यथार्थज्ञानपूर्वकं यथार्थ-वचनम् तत्पूर्वकं सत्कर्मकरणञ्च। तपः एकादश्यादिष्वुपवासः भगवद्ध्यानञ्च। दमः इन्द्रियनिग्रहः। शमो बुद्धेः भगवन्निष्ठता। अग्नयः अग्नीनां पूजा, अग्नीनामाधानं वा, अग्निहोत्रं तन्नामकं कर्म। अतिथयः अतिथीनां पूजा। मानुषं स्वस्वज्ञानाधिक्येऽपि मानुषधर्मप्रवर्त्तनमेव कार्यं न तु ज्ञानाद्यैश्वर्यप्रकटनमयोग्येषु कार्यमित्यर्थः। प्रजा शिष्य-पुत्रादिरूपा। प्रजारक्षणमन्नज्ञानादिदानेन प्राप्तभयादिनिवारणेन च कर्तव्यमित्यर्थः। प्रजनः पुनः प्रजननं पुत्ररूपेण सन्तति कृतिः। प्रजातिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्पन्नेतनये उपनयनादिकर्मभिः ब्राह्मण्यरूपप्रकृष्टजातिकरणम्। अत्र सर्वत्र सत्यादिभिः सह पुनः स्वाध्यायप्रवचनयोः कर्तव्यत्वोक्तिः सत्याद्यपेक्षया-ऽत्यावश्यकत्वज्ञापनार्थेति द्रष्टव्यम् ।। २० ।।

सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः तद्धि तपस्तद्धि तपः ।।२।।

टीका—अत्र कर्त्तव्यत्वोक्तानां ऋतस्वाध्यायप्रवचनसत्यादीनां किं परस्परं साम्यमुत तत्रैकस्याधिक्यमिति शङ्कायां तत्र ऋषिमतान्याह । सत्यमित्यादिना। सत्यवचाः सत्यवचन एव निरतो रथीतरस्यापत्यं राथीतरः तन्नामा ऋषिः सत्यमिति निरुक्तं सत्यमेव श्रेयः साधनमिति तदेव सम्पाद्यम्। तत्रैव तप आदेः सर्वस्यान्तर्भावादित्याह । तपोनित्यः तपोनिष्ठः पुरुशिष्टेर-पत्यं पुमान् पौरुशिष्टिस्तन्नामा कश्चिदृषिः । तप इति ध्यानादिरूपं तप एव श्रेयः साधनमिति तदेव कर्त्तव्यम्। तत्रैव ऋतसत्यत्वादीनामन्तर्भावा-दित्याह । मुद्गलस्यापत्यं तद्गोत्रापत्यं वा मौद्गल्यो नाको नामतः स्वाध्यायप्रवचन एव कर्त्तव्ये इत्याह कुत इत्यत ऋतसत्यतपआदीनां सर्वेषामपि स्वाध्यायप्रवचनयोरेव विशेषतोऽन्तर्भावेण तयोरेवमोक्ष-साधनेषु प्रधानादित्यभिप्रेत्याह । तद्धीति । तत् स्वाध्यायप्रवचनकरण-मेव तपः । इदमुपलक्षणं तद्धि सत्यमपि द्रष्टव्यम् । हि शब्देन प्राणाया-मादयस्तुष्टिपर्यन्ता द्विगुणाधिकाः स्वाध्यायोऽतः कोटिगुणः । तपआद्याः क्रमात्सर्वे उत्तरोत्तरतोऽधिकाः । अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा । ध्यानं निश्चिततत्वस्य तस्माच्छास्त्रावमर्शनम् । वरं दशगुणं तस्मात् व्याख्यैकस्य शतोत्तरेति प्रमाणप्रसिद्धिं दर्शयति । अत इदमेव मतं पूर्वम-तस्यापेक्षयाऽधिकमितिभावः । द्विरुक्तिस्तात्पर्य्यद्योतनार्था ।। २१ ।।

।। इति नवमोऽनुवाकः ।।

अहं वृक्षस्य रेरिवा । कीर्त्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि । द्रविण ँ सवर्चसम् । सुमेधा अमृतो-क्षितः ।। २२ ।।

।। इति दशमोऽनुवाकः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—पूर्वं ऋतादेः सर्वस्मात् स्वाध्यायप्रवचनयोराधिक्यमुक्तम्। इदानीं तत्फलमाख्यायिकया निरूपयति। अहं वृक्षस्येत्यादिना। संसरत्यनेनेति संसारः लिङ्गदेहः। तस्य रेरिवा, छेत्ता रीङ्क्षय इति धातोः। कीर्त्तिः। मत्कीर्त्तिः। पृष्ठं गिरेरिव, पर्वतपृष्ठोपमाविस्तारेणेतिशेषः। यथा पर्वताऽधोभाग ऊर्ध्वभागापेक्षया विस्तृतो भवत्येवं मत्कीर्तिरपि सर्वत्र विस्तृतेत्यर्थः। ऊर्ध्वं पवित्रो उन्नतोह्यूर्ध्व उच्यत इति वचनादूर्ध्वशब्दस्योन्नतवाचित्वम्। उन्नतत्वञ्चात्युत्कृष्टत्वमत्युत्कृष्टश्च हरिरेव स्वाध्यायप्रवचनादिसम्पत्त्याऽपरोक्षज्ञानानन्तरमहमादौ तावदूर्ध्वे नात्युत्कृष्टेन विष्णुना पवित्रः पाविताऽप्रारब्ध समस्तपापरहितोऽस्मि। तद्यथैषीकतूलमिति श्रुतेः। तदनन्तरं प्रारब्धकर्मणां भोगेन क्षये चरमदेहपातानन्तरमर्चिरादिद्वारेण सूर्यलोकं प्राप्य तत्र वाजिरूपश्च नेता च वाजिनीः सूर्यस्तत्र वसतीति वाजिनीवसुस्तेन वाजिनीवसुना विष्णुना। अमृतं प्रारब्धकर्मशेष निर्मुक्तश्चास्मि विरजां प्राप्य तत्र लिङ्गशरीराख्यवृक्षस्य रेरिव छेत्ताऽस्मि। अनन्तरमभिव्यक्तबहुतरानन्दमनुभवन्नैव सवर्चसं द्रविणं सुवर्णमिवाहं जातम्। वर्चस शब्दोऽकारान्तोप्यस्ति। ब्रह्महस्तिभ्यां वर्चस इत्यत्र योगविभागात्समासान्तो वा।

न केवल सर्ववर्चसं द्रविणमस्मि किं नाम सुमेधाः। सुष्ठु अभिव्यक्तं मेधा ज्ञानं यस्यासौ सुमेधाश्चास्मि। अमृतेन मरणरहितेन भगवता उक्षितः सिक्तो व्याप्तः। तत्सन्निधानविशेषयुक्तश्चास्मीत्येवं मे कीर्तिः स्वाध्यायप्रवचनजन्य यशोलक्षणा गिरेः पृष्ठमिव पर्वताधोभागवत् विस्तृता। दिगन्तविश्रान्ता जातेत्यर्थः। कस्येदं वचनमित्यप्रतीतेः श्रुतिः स्वयमाह। इतीति। इत्येवं वैवस्वतमनुवंशोत्पन्नस्य हरिश्चन्द्रपितु. त्रिशङ्कोस्तन्नाम्नो राज्ञो वेदानुवचनम्। वेदप्रवचनजन्यं फलं निरूपितमित्यर्थः ॥ २२ ॥

॥ इति दशमोऽनुवाकः ॥

वेदमनूच्याचार्य्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्॥ २१॥

टीका—ब्रह्मविद्याव्याख्यानानन्तरमाचार्येणान्तेवासिनं प्रति शिक्षणीयान्नियमानाह वेदमनूच्येत्यादिना। आचार्यो वेदमनूच्य व्याख्याय अन्ते समीप एव वसतीत्यन्तेवासी शिष्यस्तमनुशास्ति शिक्षयति शिक्षाप्रकारमाह सत्यंवदेति। सत्यवचननिष्ठो भव धर्मं चर। स्ववर्णाश्रम-विहितं कर्म चर। आचर। स्वाध्यायात् अधीत वेदादिशास्त्रात्। मा प्रमदः प्रमादयुक्तो मा भूः। तद्विस्मृतिमान् मा भूरिति यावत्। यद्वा। अनध्यायातिरिक्तदिवसेषु व्याख्यानविषये प्रमादयुक्तो मा भूरित्यर्थः। आचार्य्यकुले वेदाध्ययनानन्तरं प्रियं तदभिलषितं यद्धनं तत्। आचार्य्याय आहृत्य दक्षिणात्वेन दत्वा प्रजातन्तुं प्रजासन्ततिं मा व्यवच्छेत्सीः माच्छे-दय गृहस्थाश्रमस्वीकारं कुर्वितियावत्। सत्योक्तौ धर्माचरणे च तात्पर्यद्योत-नाय तदुभयविषये प्रमादो मास्त्वित्याह। सत्यादित्यादिनाकुशलात् क्षेमकरा-त्कर्मणोऽदृष्टार्थान्न प्रमदितव्यम्। भूत्यै, ज्ञानमोक्षाख्यैश्वर्यविषये न प्रम-दितव्यम्। यद्वा भूत्यै भूत्या। दैवान्महैश्वर्यप्राप्त्या तत्प्राप्तावपीति-यावत्। उक्त सत्यादिविषये न प्रमदितव्यमित्यर्थः॥

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यन-वद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकँ सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये केचा-स्मच्छ्रेयाँसो ब्राह्मणास्तेषां त्वयाऽऽसने न प्रश्वसितव्यम्॥२२॥

टीका—देवतोद्देशेन क्रियमाणं कर्त्तव्यं देवकार्यं समाराधनादि। पितॄनुद्दिश्य क्रियमाणं कर्त्तव्यं पितृकार्यं श्राद्धादि ताभ्यां न प्रमदितव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्लोकं प्रमाणयति तदपीति ॥ ६ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीयोऽनुवाकः ।

प्राणं देवा अनुप्राणन्ति मनुष्याः पशवश्च ये ।
प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते ॥
सर्वमेव त आयुर्यन्ति ये प्राणं ब्रह्मोपासते ।
तस्यैष एव शारीर आत्मा यः पूर्वस्य ॥

टीका—देवाः प्राणमनुप्राणन्ति चेष्टन्ते। मनुष्या मनुजाः । पशवश्च गवादयः । चकारः सर्वशरीरसंग्रहार्थः । एते प्राणाधीनजीवना इत्यर्थः । प्राणः हि यस्मात् भूतानामण्डजादीनाम् । आयुर्जीवनं कारणम् तस्मात् यस्मादायुस्ततः सर्वायुषम् । सर्वभूतायुर्हेतुत्वात् सर्वेषामायुरित्युच्यत इत्यर्थः । प्राणोपासकस्य फलं निर्दिशति । सर्वमेवेति । येऽधिकारिणः प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति प्रकारेण प्राणे ब्रह्मदृष्टिं कुर्वन्ति ते सर्वे सर्वमायुः प्राप्नुवन्तीत्यर्थः । एवं प्राणमय आकाशाद्यन्नमयान्तस्यात्मत्वबुद्धिमवतार्य बुद्धिं निवर्तयति । तस्यैष इति । पूर्वस्यान्नमयस्यात्मैष एव तस्य प्राणमयस्यात्मेत्यर्थः । शारीरः शरीरसम्बन्ध्यात्मा । अनेनात्मशब्दस्य स्वरूपार्थभ्रान्तिर्निरस्ता भवति । ततश्चान्नमयप्राणमयावेकात्मकौ नत्वन्नमयस्य प्राण आत्मेत्यर्थः ।

तर्ह्यन्नमयप्राणमययोः क आत्मेति जिज्ञासायामाह—

तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

टीका—तस्मादिति पूर्ववद् व्याख्येयम्। अन्योन्तर आत्मा मनोमयः। अत्र प्राचुर्यार्थे मयट्। मनोबुद्ध्यहंकारचित्ताख्यान्तःकरणवृत्तिषु मनोवृत्तेः प्राचुर्यात्। तेन मनोमयेन एषः प्राणमयः पूर्णः। स वा एष मनोमयः पुरुषविध एव पुरुषाकृतिरेव। तस्य प्राणमयस्य। पुरुषविधतामनुकृत्य। मनोमयोऽपि पुरुषविध इत्यर्थः। मनोमयस्य शिरआदिकमाह। तस्येत्यादिना। तस्य मनोमयस्य यजुर्वेदविषयज्ञानजनकमनोव्यापारः शिर इत्यर्थः। मुख्यार्थस्य यजुर्वेदस्य मनःसम्बन्धभावेन मनसः शिरोरूपत्वासम्भवत्। एवमुत्तरत्रापि। ऋग् दक्षिणः पक्षः। दक्षिणबाहुः। साम उत्तरः पक्षो वामबाहुः। आदेश आत्मा। इदं कुर्विदं माकार्षीरिति विधिनिषेधरूपं रहस्यानुशासनमादेश इत्यर्थः। अत्र तज्जन्यज्ञानहेतुभूतान्तःकरणवृत्तिरादेशशब्देन कथ्यते। अथर्वाङ्गिरसः। अथर्वाङ्गिरसा दृष्टा मन्त्राः प्रतिष्ठाहेतुभूतं पुच्छमित्यर्थः। अत्रापि अथर्वाङ्गिरःशब्दस्तज्जन्यज्ञानहेतुभूतमनोव्यापारपरः। तदेष इति पूर्ववत्।

इति कृष्णयजुर्वेदीय तैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां तृतीयोऽनुवाकः ॥ ३ ॥

अथ चतुर्थोऽनुवाकः

तस्माद्वा एतस्मान्मनोमयात् अन्योन्तर आत्मा विज्ञानमयः।

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्राह्मणो विद्वान् न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य तेनैष। पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कृष्णयजुर्वेदीय तैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

टीका--यस्माद् ब्रह्मानन्दाद्वाचः मनसा सहाप्राप्य साकल्येना प्रतिपाद्य निवर्त्तन्ते तादृशं ब्रह्मानन्दं दृश्यते त्वग्रया बुद्ध्या मनसा तु विशुद्धेन मनसा ज्ञात्वा कदापि न बिभेतीत्यर्थः। अत्र ब्रह्मानन्दस्या शुद्धमनसाग्राह्यत्वेऽपि शुद्धमनोग्राह्यत्वेन मनोविषयत्वमस्तीति द्रष्टव्यम्। तस्यैव इति पूर्वस्य प्राणमयस्य य आत्मा स एव मनोमयस्यात्मा। एवञ्चान्नमयप्राणमयमनोमयानामेक आत्मेत्युक्तं भवति। स क इत्यपेक्षायामाह। तस्माद्वेति। अत्र विज्ञानमयो जीवो न बुद्धिमात्रम्। मयट्प्रत्ययेन व्यतिरेकप्रतीतेः। तेन विज्ञानमयेन। एषः मनोमयः पूर्णः। स वा एष विज्ञानमयः पुरुषविध एव पुरुषाकृतिरेव। तस्य विज्ञानमयस्य शिरोबाह्वादिकमाह। तस्येत्यादिना। तस्य शिरः श्रद्धैव श्रद्धाऽऽस्तिक्यसम्पन्नबुद्धिवृत्तिः। ऋतं शास्त्रार्थविषये मानसव्यापारविषया वृत्तिः। सत्यं तस्मिन्नेव वाक्कायाभ्यासमनुष्ठीयमाने तद्विषया वृत्तिः। आहरणे त्वामहसे, ओमित्यात्मानं युञ्जीतेति विहितज्ञानविशेषो योगशब्देनोच्यते। महः पुच्छं प्रतिष्ठा योगविरोधिनिरसनसामर्थ्यलक्षणं महः पुच्छमित्यर्थः।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्व प्रकाशिकायां व्याख्यायां चतुर्थोऽनुवाकः ॥ ४॥

॥ अथ पञ्चमोऽनुवाकः ॥

विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च विज्ञानं देवाः सर्वे।
ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति।
शरीरे पाप्मनो हित्वा सर्वान् कामान्समश्नुत इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—विज्ञानं प्रत्यगात्मा । कृत्यल्युटो बहुलमिति सूत्रात् नन्द्यादित्वाद्वा जानातीत्यर्थे ल्युडाश्रीयते । न चात्र विज्ञानपदस्य बुद्धिपरत्वं युज्यते तस्याः यज्ञं तनुते कर्माणि तनुतेऽपि चेति प्रतिपादित लौकिकवैदिककर्मकर्तृत्वासम्भवात् । अन्तर्यामिब्राह्मणे य आत्मनि तिष्ठन्निति माध्यंदिनपाठगतात्मशब्दस्थाने यो विज्ञाने तिष्ठन्निति काण्वपाठदर्शनाद्विज्ञानशब्दो जीवात्मपर इति भावः ॥

सर्वे देवा विज्ञानं प्रत्यगात्मस्वरूपमेव प्रधानशब्दितादधिचेतनाद् ब्रह्मणोऽपि ज्येष्ठं प्रजापतिविद्योक्तरीत्योपासते। एवं वेत्तुः फलमाह। विज्ञानं ब्रह्मचेदिति। चेद्यदि कश्चिद्विज्ञानरूपं ब्रह्म वेद। तस्माच्च जीवात् न प्रमाद्यति कदापि प्रमादयुक्तो न भवति। शरीरे पाप्मनो हित्वा क्षपयित्वा देहे वर्तमान एव विनष्टाश्लिष्टपूर्वोत्तराघः सर्वान् कामान् सम्यगश्नुत इत्यर्थः ॥

तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयस्तेनैष पूर्णः स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

टीका—पूर्वस्य तस्य मनोमयस्य य एष विज्ञानमयः शारीर आत्मा । एतस्माद्विज्ञानमयाज्जीवादन्यो अन्तर आत्माऽऽनन्दमयः नारायणो वासुदेवः। तेनानन्दमयेन एषः विज्ञानमयः पूर्णः। स वा एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनन्दमयः । तस्यानन्दमयस्य । अयं विज्ञानमयः । आनन्दमयस्य परब्रह्मणो वासुदेवस्य शिरोबाह्वादिकमाह । तस्येत्यादिना । तस्य शिरः प्रियम् । इष्टवस्तुदर्शनजन्यं सुखम् । दक्षिणः पक्षो दक्षिण बाहुः मोदः तल्लाभजन्यं सुखम् । उत्तरः पक्षः सव्यबाहुः प्रमोदः । लब्धस्योपभोगजन्यं सुखम् । आत्मा मध्यकायः । आनन्दः सुखातिशयः ।

न चैकस्य ब्रह्मणः पुच्छत्वेन मध्यकायत्वेन च रूपणं कथमिति वाच्यम् । एकस्यैव परब्रह्मणो वासुदेवस्य ब्रह्मरूपत्वेन पुच्छत्वम् । आनन्दत्वेन रूपेण मध्यकायत्वमित्युपपत्तेः । तदप्येषः श्लोक इति पूर्ववत् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां पञ्चमोऽनुवाकः ॥ ५ ॥

अथ षष्ठोऽनुवाकः

असन्नेव स भवति असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा यः पूर्वस्य ।

टीका—आनन्दमयम् ब्रह्म असत्वेन ये विदुः ये च सत्वेन विदुस्तदुभयोः फलं वक्तुमाह । असन्नेवेति । ब्रह्मशब्देनानन्दमय एवोच्यते प्रागुपदिष्टानां श्लोकानां पुच्छवदानन्दविषयकत्वदर्शनादस्यापि श्लोकस्य तथात्वं वाच्यं न तु ब्रह्मपुच्छमिति निर्दिष्टतदेकदेशविषयत्वं तथा च ब्रह्म आनन्दमयरूपमसदिति चेत् यदि वेद । अत्र सर्वत्रापि एकवचनं बहुवचनार्थे । विदुः । ते वेत्तारः असन्नेव भवति । असन्तो दुःखिनो भवन्ति । तमआलयाः भवन्तीति यावत् । ब्रह्मानन्दमयरूपमस्तीति चेद्यदि वेद विदुः तर्हि एतान् । वेतॄन् ततः सम्यग्वेत्तृत्वादेव सन्तं सतः सुखिनः मोक्षयोग्यानिति यावत् इति ज्ञानिनो विदुरित्यर्थः । इति श्लोको भवतीति सम्बन्धः । आनन्दमयस्य ब्रह्मण आकाशादिविज्ञानमयान्तःपदार्थान्तर्यामितया निर्दिष्टस्यात्मान्तरं नास्ति किमिति शङ्कां व्युदस्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यैष इति। विज्ञानमयान्तः पदार्थस्यात्मभूत एवानन्दमय आत्मा तस्याऽऽनन्दमयस्यात्मेत्यर्थः। ततश्चानन्त्यात्मकत्वमुक्तं भवति। न च पूर्वपर्य्यायेषु तस्यैष एव शारीर आत्मेत्यस्यानन्त्यात्मकत्वप्रतिपादकत्वादर्शनादस्मिन्नपि पर्याये तदाश्रयणेऽर्थवैरूप्यं स्यादिति शङ्क्यम्। पूर्वेषु पर्यायेष्वनुक्तस्य ब्रह्मावयवत्वस्येह निरूपणात्तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर आत्मेति निर्देशाभावाच्चैतत्पर्यायस्य तस्यैष एव शारीर आत्मेत्यस्यानन्त्यात्मत्वमेवार्थः।

आनन्दब्रह्मप्रतिपादनानन्तरं ब्रह्मविदाप्नोति परमित्युपक्रमाभिहितप्राप्तिविशदीकरणार्थमनुप्रश्नानाह।

अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छति। आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुते। सोऽकामयत बहु स्यां प्रजायेयेति। स तपोऽतप्यत स तपस्तप्त्वा इदँ सर्वमसृजत यदिदं किञ्च तत्सृष्ट्वा तदेवानुप्राविशत् ॥

टीका—अथशब्दः प्रकरणान्तरारम्भद्योतनार्थः। आनन्दमय ब्रह्मनिरूपणानन्तरं प्रकरणान्तरमारभ्यते। अतः ब्रह्मविदाप्नोति परमिति वाक्येन ब्रह्मविदः परब्रह्मप्राप्तेरुक्तत्वात् तच्छ्रुतवता वरुणेन चतुर्मुखं प्रति अनुप्रश्नास्तत्वनिर्णयानुकूलाः प्रश्नाः कथ्यन्ते। तानेव विशदयति। उतेति। ब्रह्मविदिति निरवधारणोक्तेः कश्चनाविद्वानुत। एकवचनं बहुवचनार्थे। अज्ञानिनोऽपि प्रेत्यमृत्वा अमुं लोकं परलोकं वैकुण्ठादिस्थं परब्रह्मेति यावत् गच्छति गच्छन्ति प्राप्नुवन्ति। आहोस्वित् विद्वान् ज्ञानिन एवामुं लोकं प्रेत्य गच्छन्त्येवं द्विकोटिक एकः प्रश्नः। ज्ञानिन एव ब्रह्म प्राप्नुवन्तीति पक्षेऽपि सर्वेऽपि ज्ञानिनो ब्रह्म प्राप्नुवन्ति अथ केचनैवेति द्विकोटिको द्वितीयः प्रश्नोऽध्याहार्यः।

सर्वेपि ज्ञानिनो ब्रह्म प्राप्नुवन्तीति पक्षेऽपि किं सर्वेपि ज्ञानिनो ब्रह्म सम्यक् प्राप्नुवन्ति मुक्तौ भोग्यभूतं ब्रह्मानुभवंतीति यावत् उत ब्रह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपेणैकीभवन्तीत्यर्थसिद्धः प्रश्नः। एतत्सर्वं बादरायणाचार्यैरुपासा- त्रैविध्यादिति सूत्रे स्पष्टमुक्तम् ।

एतान् प्रतिवक्तुं जगत्स्रष्टृत्वतत्प्रवेष्टृत्वसर्वदेवादिभयप्रदत्व- मुक्तिप्रदत्वादिना रूपेण ब्रह्मणः प्राप्यत्वज्ञापनायाह । सोऽकामयत इति । स आनन्दमयः परमात्माऽकामयत । कामनाप्रकारमेवाह बहुस्यामिति। अहमादौ प्रजायेय देवमनुष्यादिरूपेण प्रादुर्भवानि नियम्यं जगच्च स्यात् तदनन्तरं त्यदादिशब्दवाच्यश्रीब्रह्मादिजगन्नियाम- कतया अहं बहुरूपः स्यामित्यकामयत एवं कामनानन्तरं स प्रलयकालगो वासुदेवस्तपोऽतप्यत स्रष्टव्यालोचनरूपं तपः कृतवान्। स तपस्तप्त्वा स्वोदरस्थं जगदालोच्य । अनन्तरं यदिदं किञ्चित् जगत् सत्त्यदादिशब्द- वाच्यं तदिदं सर्वमसृजत तत्सृष्ट्वा तन्नियामकतया स्वयमपि बहुरूपो भूत्वा सृष्टं तदेव जगदनुप्राविशत्। सर्वव्याप्तस्य ब्रह्मणः प्रत्येकं सर्व- वस्तुषु पुष्कलप्रतीत्यर्हस्थितिविशेष एवानुप्रवेशः ।

तदनुप्रविश्य सच्च त्यच्चाभवत्। निरुक्तञ्चानिरुक्तंच। निलयनञ्चा- निलयनञ्च । विज्ञानञ्चाविज्ञानञ्च । सत्यञ्चानृतञ्च सत्यमभवत् । यदिदं किञ्च तत्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

टीका—तत् ब्रह्म जगदनुप्रविश्य सच्च चेतनं त्यच्च विकारास्पदम- चेतनम् अभवत्। ब्रह्मैव चेतनाचेतननामरूपभाग्भवतीत्यर्थः। यदि प्रपञ्चं प्रति ब्रह्मण उपादानकारणत्वं स्यात्तदा विकारित्वं स्यादित्या- शङ्क्याह। निरुक्तञ्चेति। जातिगुणाभिधायि शब्दवाच्यसचेतनं निरुक्तम्। तच्छून्यं चेतनजातमनिरुक्तम्। एता भूतमात्राः प्रज्ञामात्रास्वर्पिता इत्युक्तरीत्याऽचेतनवर्गाधारभूतं चेतनजातं निलयनम्। आश्रितमचेतन- जातन्त्वनिलयनम्। विज्ञानं चेतनमविज्ञानं तद्रहितमचेतनम्। निर्विका- रतया सत्यत्वं चेतनस्याचेतनस्य न तथात्वम्"। निरुक्तत्वनिलयत्वविज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नत्वयुक्तसत्यानृतशब्दितचेतनाचेतनं नामरूपभाग्भवदपि ब्रह्म सत्यमेवाभवत्। अजहन्निर्विकारत्वलक्षणस्वभावमेवाभवदित्यर्थः। यदिदमिति। यस्माच्चेतनाचेतनात्मकवर्गानुप्रविष्टतया सत्यशब्दवाच्यस्य ब्रह्मण आत्मत्वमत एव सर्वमपि चेतनाचेतनात्मकं जगच्छास्त्रदृष्टिमन्तः पुरुषाः पराशरादयः 'हरेर्न किञ्चिद्व्यतिरिक्तमस्ति ज्योतींषि विष्णुर्भुवनानि विष्णुः' इत्याचक्षत इत्यर्थः।

उक्तार्थे सम्मतितया श्लोकमुदाहरति। तदपीति। तत्रापि देवमनुष्यादिरूपेण भवने एषः वक्ष्यमाणः श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां षष्ठोऽनुवाकः ॥

अथ सप्तमोऽनुवाकः

असद्वा इदमग्र आसीत् ततो वै सदजायत। तदात्मानँ स्वयमकुरुत तस्मात्सुकृतमुच्यत इति। तद्वै तत्सुकृतम्। रसो वै सः। रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति।

टीका—इदं स्थूलं चेतनाचेतनशरीरकं ब्रह्मानभिव्यक्तनामरूपं सृष्टेः प्रागासीत्। तस्मादिदं जगदभिव्यक्तनामरूपमभवदित्यर्थः। नन्वसच्छब्दितस्य ब्रह्मण उपादानत्वे कर्त्रन्तरमपेक्षितं निमित्तोपादानयोर्भेदावश्यंभावादित्याशङ्क्याह। तदात्मानमिति। अन्तरात्मानमेवोपादानत्वेन स्वीकृत्य स्वयमेवाकुरुत यस्मात्तस्मादेव हेतोः ब्रह्म सुकृतमुच्यते सुसम्यक् विश्वात्मना स्वरूपं कृतमित्यर्थः। इति श्लोको भवतीति सम्बन्धः।

भवतु तावत् सुकृतत्वं ब्रह्मणस्तस्योपास्यत्वप्राप्यत्वयोः किमायातमित्यत्राह। तद्वै तत्सुकृतिमिति। सुकृतत्वेन निर्दिष्टं ब्रह्म रसः पूर्णानन्द इत्यर्थः। ननु भगवतः पूर्णानन्दत्वे किं मानमित्याशङ्क्य मुक्तानां सुखकारणत्वादयं पूर्णानन्द इत्याह रसमिति। हि यस्माद्रसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णानन्दमेनं वासुदेवं लब्ध्वैव प्राप्यैव अयं मुक्त आनन्दी भवति स्वयोग्यानन्दपूर्णो भवति । अन्यथा तन्न स्यात् । नहि दुःखिनं प्राप्तस्यानन्दो दृश्यते । तथा चायं वासुदेवः पूर्णानन्दो न स्यात् यदि, तर्हि तं प्राप्तो मुक्तोऽपि पूर्णानन्दो न स्यात् लोके दुःखिनं प्राप्तस्यानन्दादर्शनात् । भवति च मुक्तः पूर्णानन्दः । "ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोहिणः । भजन्ते तु सुखान्येव न दुःखादीन् कदाचनेति" वचनात् । अतस्तत्प्राप्यो वासुदेवोऽपि पूर्णानन्द इति सिद्ध्यतीति भावः । तथा च वासुदेवस्य प्राप्यत्वोपास्यत्वे युक्ते ।

लोकचेष्टकत्वान्यथानुपपत्तिरूपयुक्त्यापि भगवान् वासुदेवः पूर्णानन्द इत्याह ।

कोह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति ।

टीका—एष आकाशः परमात्मा वासुदेवो यदि पूर्णानन्दो न स्यात् न भवेत् को ह्येव लोकेऽन्यात् चेष्टां कुर्यादित्यर्थः । कः प्राण्यात् प्राणनं कुर्यान्न कोऽपि वैदिकीं लौकिकीं वा प्रवृत्तिं कुर्यात् । प्राणिति चानितिच सर्वलोकोऽतस्तत्प्रवर्त्तको भवन् एष भगवान् केवलमुन्मत्तवदानन्दोद्रेकादेवेति वक्तव्यं कार्यानुगुणत्वाच्च कारणस्य महाप्रवृत्त्या महानन्द एव सिद्ध्यतीत्यर्थः । तथा चैष भगवान् पूर्णानन्दो भवितुमर्हति प्रवृत्तिकारणत्रयरहितत्वे सति प्रवृत्तिमत्वात् । उन्मत्तवदित्यनुमानं द्रष्टव्यम् । अमुक्तानां ब्रह्माद्यखिललोकानामानन्दकारणत्वाच्चायं भगवान् पूर्णानन्द इत्याह । एष ह्येवेति । अखिलमितिशेषः । हि यस्मादेष एव भगवानखिलं ब्रह्माद्यमुक्तजातमानन्दयाति आनन्दयति । छान्दसत्वाद्दीर्घः । अतोऽयं भगवान् वासुदेवः पूर्णानन्द इत्यर्थः । स्वस्यैव तदभावे परस्मै तद्दानानुपपत्तेरिति भावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं भवति ।

टीका—यदेवैषोऽधिकारी । अदृश्ये अज्ञदृष्टयगोचरे प्राकृतचक्षुरादिग्रहणानर्हे । अनात्म्ये । आत्मन इदम् आत्म्यं जीवसम्बन्ध्यल्पज्ञानाल्पसुखादि तद्रहिते । अनिरुक्ते अनन्तगुणवत्वेन साकल्येन वेदाप्रतिपाद्ये । अनिलयने न विद्यते अन्यत् निलयनमाश्रयो यस्य सोऽनिलयनस्तस्मिन् अनिलयने निजाश्रयादपराश्रयरहिते एतस्मिन् हरौ तद्विषय इति यावत् । अभयमिति क्रियाविशेषणम् । अभयं यथा भवति तथा अभयत्वेनेति यावत् । प्रतिष्ठां निरन्तरस्मृतिलक्षणां निष्ठां विदन्ते लभते अथ तदासौऽधिकारी अभयं हरिं गतः प्राप्तो भवति मुक्तो भवतीत्यर्थः ।

उक्तायाः प्रतिष्ठाया विच्छेदेऽनर्थः सम्पद्यत इत्याह ।

यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्य तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७॥

टीका—यदा यदि एषोऽधिकारी । एतस्मिन् परमात्मनि ध्यानस्यान्तरं विच्छेदमरमल्पमपि कुरुते तस्य भयमुद्भवति ।

पूर्वमन्त्रे प्रतिष्ठाशब्दस्यानवरतस्मृतिसन्तानपरत्वमुपपादितं अत्राप्यन्तरशब्देन तद्विरोधिनो ध्यानविच्छेदस्य ग्रहणमुचितं भाति । किं भयं तत्राह । तत्त्वेवेति । विदुषो ब्रह्मोपासकस्य । अमन्वानस्य तदतिरिक्तस्पृहया निरन्तरं मननमकुर्वतस्तदेवामननं भयं न हि तदपेक्षयाऽन्यद्भयमस्ति । उक्तञ्च महर्षिभिः—

यन्मुहूर्त्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते ।
सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः ।
न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥ इति तदप्येष इति पूर्ववत् ।

इति कृष्णयजुर्वेदीय तैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकाटीकायां सप्तमोऽनुवाकः ॥ ७ ॥

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति ॥ १६ ॥

टीका—भीट्शब्दस्य तृतीयैकवचनं भीषेति । अस्मादिति पञ्चमी षष्ठ्यर्थे । अस्य भगवतो भीषा भयेन वातः पवते तृणपर्णादि सम्मार्जनेन भू शुद्धिं करोतीत्यर्थः । भीषोदेति सूर्यः । अस्मादित्यनुवर्त्तते । उदितो भूत्वा ध्वान्तं विनाश्य पदार्थान् प्रकाशयतीति भावः । अग्निश्चेन्द्रश्चेत्युभौ पचनवर्षणरूपं स्वव्यापारं कुरुत इति शेषः । अस्य भीषा पञ्चमः पञ्चत्वसङ्ख्यापूरको मृत्युर्यमः प्रजासंयमनादिरूपे स्वव्यापारे धावति । अतीव जागरूकस्तिष्ठतीत्यर्थः । इदमुपलक्षणम् । एवं सर्वे देवाः अस्य भीषैव स्वस्वव्यापारान् कुर्वन्तीति ग्राह्यम् । इति श्लोको भवतीति सम्बन्धः ॥ १६ ॥

सैषानन्दस्य मीमांसा भवति । युवास्यात्साधु युवाऽध्यापकः । आशिष्टो द्रढिष्टो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः ॥१॥ स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितॄणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य ।

टीका—एषा वक्ष्यमाणा आनन्दस्य मीमांसा । आनन्द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैचित्र्यविषयको विचारः क्रियमाणो भवति। क्रियत इति यावत्। युवा षोडशवर्षमारभ्याऽऽपलितदर्शनमुपघातमन्तरेण मध्यमं वयो यौवनं तद्वान्तीणेन्द्रियशक्तिः। यौवनेऽपि स्वभावतः शरीरस्येन्द्रियाणां वा वैरूप्यं सम्भावितं रोगादिनिमित्तं वा तन्निवारणार्थमाह। साधु युवा। साधुश्चासौ युवाचेति यूनो विशेषणम्। कन्दर्पसमानरूपः सन् यौवनसम्पन्न इत्यर्थः। तादृशोऽपि मूर्खो मा भूदित्याह। अध्यापकोऽधीतसाङ्गोपाङ्गवेदः। तादृशोऽपि केवलं स्वोदरंभरिरतिमन्दो वा माभूत् तद्द्वयं तन्त्रेण वारयति। अशिष्टाऽतिशयेनाऽऽशास्ताऽतिशयेनाऽऽशुकारी च। द्रढिष्ठो दृढतरो नत्वव्यवस्थितस्वभावः। तादृशोऽपि बलहीनः स्यादित्यत आह बलिष्ठोऽतिशयेन बलसम्पन्नः। एवम्भूतोऽपि वित्तहीनः स्यादित्यतश्चाह तस्येति। उक्तविशेषणविशिष्टस्य। इयं सप्तद्वीपाब्धिवलया लोकमेखला। पृथिवी भूमिः। सर्वा निखिला वित्तस्य वित्तेन। दृष्टादृष्टसुखकरणेन गोहिरण्यादिना पूर्णा परिपूर्णा स्याद्भवेत्। सर्वलक्षणसम्पन्नस्य चक्रवर्तिन इत्यर्थः। स सर्वलक्षणसम्पन्नस्य चक्रवर्त्तिनो जायमान आनन्दः। एकः एकत्वसङ्ख्याक्रान्तः। मानुषो मनुष्येषु भवः। आनन्दो भावरूपः सुखात्मा। नातः परं मनुष्याणां सुखमित्यर्थः। ते परा ताः। ये प्रसिद्धाः शतं शतसङ्ख्याका मानुषा आनन्दाः स परोक्षः प्रसिद्धः एक एकत्वसङ्ख्याक्रान्तः। मनुष्यगन्धर्वाणां मनुष्याः सन्तो जन्मान्तरे गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः। अन्तरिक्षलोकनिवासिनोऽन्तर्धानादिशक्तिमन्तस्तेषाम्। आनन्दः अस्माकं चक्रवर्तिनां यथोक्तगुणविशिष्टानां शतगुणसुखं मनुष्यगन्धर्वाणां परमं सुखमित्यर्थः। अकामहतश्रोत्रियस्य मुक्तस्यापि स आनन्दोऽस्ति मुक्तस्य सर्वानन्दानुभवशालितया तत्र मानुषानन्दस्यान्तर्गतत्वादिति भावः।

देवगन्धर्वाणां देवाश्च ते गन्धर्वाश्च देवगन्धर्वास्तेषामानन्दाः स एकः आनन्दः पितॄणाम्। पितृविशेषणं चिरलोकलोकानामिति। चिरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीर्घस्थायिनो लोकाः कर्मविशेषास्ते येषां लोकास्तत्स्थानानि च चिरलोकास्तेषामनेककालस्थायिनामित्यर्थः। आजानानाम्। कल्पादावुत्पन्नानामाजाने देवलोके जाता आजानजास्तेषाम् विशेषणमिदम्। विशेष्यमाह। देवानामिति द्योतनात्मकानामित्यर्थः।

ते ये शतमाजानानां देवानामानन्दाः स एकः कर्मदेवानां देवानामानन्दः ये कर्मणा देवानपियन्ति श्रोत्रियस्य चाकामहतस्य ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः स एको बृहस्पतेरानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य।

टीका—देवानाम्। इदं श्रुतिरेव व्याकरिष्यति। पूर्ववद्विशेषणमुक्त्वा विशेष्यमाह। देवानामाजानेभ्य उत्कृष्टानां द्योतनात्मकानाम्। कर्मदेवानामित्येतद्व्याकरोति। ये प्रसिद्धा याज्ञिकाः कर्मणाऽग्निहोत्राद्यश्वमेधान्तेन। देवान् द्योतनात्मकानपियन्ति प्राप्नुवन्ति। देवत्वमुपगता इत्यर्थः। देवानाम्। त्रयस्त्रिंशत्सङ्ख्यकानां हविर्भुजामग्न्यादीनाम्। इन्द्रस्य त्रिलोकीपतेः। तं शक्रस्य। बृहस्पतेर्देवगुरोः। प्रजापतिश्चतुर्मुखः। न तु दक्षादयः। एकवचनश्रवणात्।

अत्र ब्रह्मशब्दो ब्रह्मविदाप्नोति परमिति प्रकृतब्रह्मपरः। नच ब्रह्मानन्दस्य ते ये शतमिति परिच्छिन्नत्वं कथमिति शङ्क्यम्। क्षणार्धेन बहूनि योजनानि गच्छति रवाविषुवद् गच्छति सांवतेषुसाम्यप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादकवचनस्य हि मान्द्यनिवृत्तिपरत्ववत्ते ये शतमितिवाक्यस्यापि चतुर्मुखानन्दाधिक्यमात्रपरत्वेन शतगुणितचतुर्मुखानन्दान्न्यूना-धिकपरत्वाभावात्।

एवम्भूतानन्दमयो यो वेद निहितं गुहायामिति हृदयगुहानिहितत्वे-नोपास्यमानः कीदृश विग्रहविशेषविशिष्टः को वा देवताविशेष इति जिज्ञासायामाह।

यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंवित्। अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामति। एतं प्राणमयमात्मानमुपसंक्रामति। एतन्मनोमयमात्मान-मुपसंक्रामति। एतं विज्ञानमयमात्मानमुपसंक्रामति। एत-मानन्दमयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायेऽष्ट-मोऽनुवाकः ॥ ८ ॥

टीका—च शब्दौ परस्परसमुच्चयार्थौ। स प्रसिद्धो योऽयं पुरुषे तदुपलक्षितापकृष्टजीवेषु नियामकतया तिष्ठति यश्चासावादित्ये तदुप-लक्षितोत्कृष्टजीवेषु देवेषु नियामकतया तिष्ठति स ब्रह्मादीनां स्वरूपा-नन्दाविर्भावप्रदाता कमनीयविग्रहयुक्तो पुण्डरीकाक्षो भगवान्वासुदेव एक एव न तयोः परस्परं भेदो मन्तव्यः। ततश्च तादृशविग्रहवत्वेन हृदय-गुहावर्तिनो भगवतो वासुदेवस्य ध्यानं कर्त्तव्यम्। एवं प्राप्यस्य प्राप्यत्वोप-युक्तमुताविद्वानमुं लोकमित्यादिनोपक्षिप्तानां प्रश्नानामुत्तरमाह। स एवं विदित्यादिना। य एवमुक्तप्रकारेण भगवन्माहात्म्यवेत्ता उपासकः स भोगेन प्रारब्धं क्षपयित्वाऽनन्तरमस्माल्लोकात् चरमत्वेन प्रसिद्धाल्लोकाच्छरीरात्प्रेत्य हृदयाग्रप्रज्वलनप्रकाशितनाडीद्वारा देहान्निष्क्रम्य अर्चिरादिद्वारा आनन्दमयमात्मानमुपसंक्रामति गच्छति। एतमन्नमयमन्नमयशरीरकमात्मानं परमात्मानमुपतत्समीपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्रामति। एत प्राणमयं प्राणमयशरीरकपरमात्मानमुपसंक्रामति। एवमुत्तरत्रापि योज्यम्।

अत्र श्रीबादरायणाचार्यैः सर्वोऽपि विद्वानस्माल्लोकात्प्रेत्यान्नमयादिसमष्टिव्यष्टिविभूतिकं निरतिशयानन्दं परमात्मानं भोग्यभूतं भोक्तासन्ननुभवतीति प्रश्नस्योत्तरमुक्तं भवति। एवमानन्दमयं भगवन्तं प्राप्य संसारभयरहितः सन् इति शेषः। अत्राथ संमतितया श्लोकमुदाहरति। तदपीति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां अष्टमोऽनुवाकः ॥ ८ ॥

तमेव श्लोकं पठति।

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति। एतँ ह वाव न तपति। किमहं साधु नाकरवम्। किमहं पापमकरवमिति। स य एवं विद्वानेते आत्मानं स्पृणुते। उभे ह्येवैष एते आत्मानं स्पृणुते। य एवं वेद इत्युपनिषत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

टीका—वाङ्मनसे आनन्दस्येयत्तालक्षणं पारं गन्तुं प्रवृत्ते यतो यस्मात् मनसा सह वाचः अप्राप्य निवर्त्तन्ते। आनन्त्यादिति शेषः। एतादृशं ब्रह्मण आनन्दरूपिणमानन्दमयवासुदेवाख्यं परब्रह्म। विद्वान् तद्विषयकापरोक्षज्ञानद्वारा तं प्राप्त इति यावत्। कुतश्चन कुतोऽपि न बिभेति संसारभयवान्न भवतीत्यर्थः। इति श्लोको भवतीति सम्बन्धः। श्लोकोक्तं भयाभयं विवृणोति। एतँ ह वावेति। अहं किं किमर्थं साधुकर्म नाकार्षं किमर्थं पापमकरवं येनैतादृशं पापफलं भुंजे इत्येवं रूपं पश्चात्तापजनितं भयं एतं मुक्तं न तपति न सन्तापयति इत्येतत् ह वाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिप्रसिद्धमित्यर्थः। संसारे प्रसिद्धमेतादृशभयं मुक्तस्य नास्तीति भावः।

एतादृशं ब्रह्मविद्याप्रयुक्तमाहात्म्यमपिध्येयमित्याह स य एवमिति। एते एताभ्यां पुण्यपापाभ्यामात्मानं स्पृणुते रक्षतीत्यर्थः। पुण्यपापफलानुभवो नास्तीत्युक्तं भवति। पुनर्वचनं पुण्यपापविधूननध्यान सातत्यतात्पर्यद्योतनाय। एवं वरुणं प्रत्युपदिश्योपसंहरति ब्रह्मा। इत्युपनिषदिति रहस्यभूता ब्रह्मविद्या त्वां प्रति मयोपदिष्टेति शेषः।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्यायस्य तत्त्वप्रकाशिकायां टीकायां नवमोऽनुवाकः ॥ ९ ॥

॥ इति ब्रह्मानन्दवल्ली समाप्ता ॥

अथ भृगुवल्ली

आनन्दमयस्य ब्रह्मण उपास्तिं ब्रह्मवल्ल्यध्याये उक्त्वा तत्रैव समाख्यातत्वेन भृगुवरुणसम्वादरूपामाख्यायिकामाह।

भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति तस्मात् एतत्प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति तँ होवाच ॥

टीका—वरुणस्यापत्यं पुमान् वारुणिर्भृगुः। वै शब्देन भृगोर्वरुणपुत्रत्वं प्रसिद्धमित्याचष्टे। पितरं वरुणमुपससार समीपं गतवान्। किं वदन् उपससारेत्यत आह। अधीहीति। हे भगवः! मतो वसोरुः सम्बुद्धौ छन्दसि। हे भगवन् पूज्य ब्रह्म परंब्रह्म अधीहि। अध्यापयेति। णिजर्थस्यान्तर्णीतत्वात्। एवं पृष्टो वरुणस्तस्मै भृगवे एतत् ब्रह्म प्रोवाच उपदिष्टवान्। तदेव दर्शयति। अन्नमित्यादिना। अत्तृत्वादन्नं प्राणं प्रकृष्टचेष्टाकत्वात्। चष्ट इति चक्षुः श्रवणात् श्रोत्रं मन्तृत्वान्मनः। वक्तृत्वाद्वाक् विवेचनात्। विज्ञानं ब्रह्मेत्यादिकं तन्मनः शोधनायोपदिश्य किं सर्वाणि उतैकं तत्रापि वस्तुसिद्धेर्लक्षणाधीनत्वात् व्याकुलचेतसं पुत्रं प्रति ब्रह्मलक्षणमुवाच।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद् ब्रह्मेति ॥

टीका—जीवन्ति चेष्टन्ते । यत् प्रयन्ति प्रलये । अभि स्वेच्छया संविशन्ति मुक्तौ । तद्ब्रह्मेति ज्ञात्वा तद्ब्रह्म विजिज्ञासस्व जिज्ञासां कुर्वित्यर्थः । इति पितुर्वचनसमाप्तौ ।

स तपोऽतप्यत । स तपस्तप्त्वा ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये प्रथमोऽनुवाकः ॥ १ ॥

टीका—स श्रुतपितृवाक्यो भृगुः तपः पर्य्यालोचनमन्नादिपूक्तेषु ब्रह्मलक्षणाक्रान्तं कतमदित्येवं रूपम् । अतप्यत कृतवान् । अथवा तपः इन्द्रियनिग्रहलक्षणम् । अस्मिन् पक्षे तपसा शुद्धान्तःकरणस्य मनस इन्द्रियाणां चैकाग्र्यं जायत इति व्याख्येयम् ।

स तापसो भृगुः तप उक्तरूपम् तप्त्वा सम्पाद्य ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्व-प्रकाशिकायां टीकायां प्रथमोऽनुवाकः ॥ १ ॥

अथ द्वितीयोऽनुवाकः

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभि-संविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति ।

टीका—ब्रह्मलक्षणाक्रान्तमन्नं ब्रह्मशब्दाभिधेयमित्यनेन प्रकारेण व्यजानात् विशेषेणावगतवान् । तद्विज्ञानप्रकारं श्रुतिराह । अन्नादुक्तात् हि यस्मात् । एवान्नादेव नत्वन्यस्मात् । खलु निश्चितम् । इमानि भूतानि जायन्ते । अन्नेन जातानीत्यादिकं पूर्ववत् । इत्यनेन प्रकारेण तदन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मरूपं विज्ञायावगत्य प्रत्यक्षेणोपपत्यान्नस्य नाशमवलोक्यान्नस्य ब्रह्मत्वं कथमिति सन्दिहानो भृगुः पुनर्भूय एव वरुणं पितरमुपससार। अधीहीत्यादिकं पूर्ववत्।

तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयोपनिषदि भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ॥ २ ॥

टीका—वरुणस्तं भृगुं प्रति उवाच। तपसा इन्द्रियनिग्रहलक्षणेन ब्रह्मविद्योपायभूतेन ब्रह्म विजिज्ञासस्वेत्युक्तवान्। स तपोऽतप्यत स तपस्तप्त्वा। इति पूर्ववत्।

इतिकृष्णयजुर्वेदीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां टीकायां द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीयोऽनुवाकः

प्राणो ब्रह्मेति व्यजानात् प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳहोवाच तपसा ब्रह्मविजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति तृतीयोऽनुवाकः ॥ ३ ॥

अथ चतुर्थोऽनुवाकः

मनो ब्रह्मेतिव्यजानात् मनसो ह्येव खल्विमानि भूतानिजायन्ते मनसा जातानि जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहिभगवो ब्रह्मेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्ꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि चतुर्थोऽनुवाकः।

टीका—स्पष्टम्। इति टीकायां चतुर्थोऽनुवाकः ॥ ४ ॥

अथ पञ्चमोऽनुवाकः

विज्ञानं ब्रह्मेतिव्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति त्ꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति। स तपोऽतप्यत स तपस्तप्त्वा।

इति कृष्णयजुर्वेदीय तैत्तिरीयोपनिषदि पञ्चमोऽनुवाकः ॥५॥

अथ षष्ठोऽनुवाकः

आनन्दो ब्रह्मेति व्यजानात् आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति ॥

टीका—यथाऽन्नस्य विनाशित्वं दोषो ब्रह्मत्वे तथाऽचेतनत्वं प्राणस्य। अनिश्चयात्मकत्वं मनसः। सुखदुःखभोक्तृत्वं विज्ञानस्य प्रत्यगात्मनो दोषः। आनन्दमयस्य ब्रह्मशब्दाभिधेयत्वं ततोऽस्य दर्शनानन्तरं पितरं प्रतिगमनाभावः। प्राणमनोमयविज्ञानानन्दपर्य्याया-श्चत्वारोऽपि समानपाठा अन्नपर्य्यायवद्व्याख्येयाः। इदानीमाख्यायिका-सिद्धमर्थं श्रुतिराह विद्यास्तुतये।

सैषा भार्गवी वारुणी विद्या। परमेव्योमन् प्रतिष्ठिता।

टीका—एषा इदानीमुक्ता। भार्गवी भृगुणावगता भार्गवी। वारुणी वरुणेन प्रोक्ता। विद्या ब्रह्मविद्या। परमे उत्कृष्टे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्योमन् व्योमनि। परमात्मनि प्रतिष्ठिता अवस्थानं प्राप्ता आनन्दमये ब्रह्मणि पर्यवसिता।

य एवं वेद प्रतिष्ठति। अन्नवानन्नादो भवति महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये षष्ठोऽनुवाकः॥ ६॥

टीका—योऽधिकारी एवमन्नप्राणमनोविज्ञानेभ्योऽन्य आनन्दमयः परमात्मेति वेद जानाति। स मुक्तो भूत्वा तस्मिन् ब्रह्मण्येव प्रतिष्ठति। अन्नवान् अन्नसम्पन्नः। अन्नादोऽन्नभक्तको नीरोगो महानधिकः प्रजया पुत्रादिसन्तत्या। पशुभिर्गवादिभिः। ब्रह्मवर्चसेन वेदाध्ययनजाततेजसा न केवलमेवं किन्तु महानधिकः। कथं कीर्त्या यशसा प्रथमो। महच्छब्दस्तस्मिन्विद्याधिक्यमाह। द्वितीयस्तु प्रजादीनां कीर्त्यन्तानाम्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये तत्त्वप्रकाशिकायां टीकायां षष्ठोऽनुवाकः॥ ६॥

अथ सप्तमोऽनुवाकः

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम् प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतिष्ठति अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः॥ ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—एतद्विद्याङ्गव्रतमाह। अन्नमित्यादिना। अन्नस्यादनीयस्य निन्दां नकुर्यात्। तदन्नानिन्दनं व्रतं व्रतधारणम्। प्राणोऽन्नम्। प्राणेऽन्नत्वदृष्टिः कार्या। शरीरेऽन्नादत्वदृष्टिर्विधेया। प्राणे पञ्चवृत्तौ शरीरं प्रतिष्ठितं तदधीनस्थितित्वेन प्रतिष्ठां प्राप्तम्। इदानीं वैपरीत्यमाह। शरीरे प्राण इति। एवं वेत्तुः फलमाह। स यइति। तस्य व्याख्यानं पूर्ववत्। इति कृष्ण यजुर्वेदीय तैत्तिरीयोपनिषदि तत्त्वप्रकाशिका टीकायां सप्तमोऽनुवाकः॥ ७॥

अथ अष्टमोऽनुवाकः

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम् ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितंज्योतिष्यापः प्रतिष्ठिताः तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या।

इति कृष्णयजुर्वेदीयतैत्तिरियोपनिषदि अष्टमोऽनुवाकः॥८॥

टीका—अन्नं न परिचक्षीत दीयमानमन्नं न निराकुर्यात्। पात्रस्थं वा न परित्यजेत्। तदन्नापरित्यागलक्षणं व्रतं व्रतधारणम्। अन्नशब्देन भौतिकं भूतप्रसङ्गं प्रस्तावयति। आपो वा अन्नमिति आपोद्रवात्मिकाश्चतुर्गुणाः। ज्योतिः प्रकाशात्मकं त्रिगुणम्। शेषं प्राणशरीरपर्यायवत्समानपाठं व्याख्येयम्।

इति कृष्ण यजुर्वेदीय तैत्तिरीयोपनिषदि तत्त्वप्रकाशिका टीकायां अष्टमोऽनुवाकः॥ ८॥

अथ नवमोऽनुवाकः

अन्नं बहुकुर्वीत तद्व्रतम्। पृथिवी अन्नम् आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्नेप्रतिष्ठितं सयएतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

टीका—अन्नमुक्तं बह्वधिकं शास्त्रोक्तैरुपायैरर्जनादिभिः कुर्वीत शेषं पूर्ववत् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तत्त्वप्रकाशिकाटीकायां नवमोऽनुवाकः ॥९॥

अथ दशमोऽनुवाकः

न कञ्चन वसतौ प्रत्याचक्षीत । तद्व्रतम् तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षीत । एतद्वै मुखतोऽन्नꣳराद्धम् । मुखतोऽस्मा अन्नꣳराध्यते । एतद्वै मध्यतोऽन्नꣳराद्धम् । मध्यतोऽन्नꣳराध्यते । एतद्वा अन्ततोऽन्नꣳ राद्धम् । अन्ततोऽस्मा अन्नꣳ राध्यते । य एवं वेद क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरितिपादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः ॥

टीका—कमपि मनुष्यमात्रं वसतावद्य,रात्रौत्वद्गृहेवासं करिष्यामीति वसतिनिमित्तं समागतं न प्रत्याचक्षीत न निराकुर्वीत । तद्वसतिनिमित्तं समागतानिवारणं व्रतं व्रतधारणम् । अन्नसम्पादनार्थंगृहस्थाश्रमवासिना मुमुक्षुणाऽपि महान् यत्नः करणीय इत्याह तस्मादिति । यस्मादन्नमन्तरेण न पुरुषार्थसिद्धिर्गृहस्थस्य ततो यया कया च येन केनापि विधया उपायप्रकारेण याजनाद्यन्यतमेनेत्यर्थः । बह्वधिकमन्नं व्रीह्यादिकं प्राप्नुयात् सम्पादयेत् । अराधि संसिद्धम् । अस्मै गृहं समागतायातिथयेऽन्नमदनीयम् । इत्यनेन प्रकारेण स्वभार्यादीन् प्रति आचक्षते कथयन्ति । विद्वांसो गृहस्थाः । अनेन गृहस्थप्रसिद्धिः प्रमाणमन्नदाने कथिता । इदानीं दीयमानेऽन्ने देशकालपात्रश्रद्धासत्कारादिसम्पत्तिरङ्गमित्येतदर्थे यथा दत्तं तथैव फलं भवतीत्याह एतद्वैति । एतद्वै प्रसिद्धम् । मुखतो मुखे मुख्यदेशे काले पात्रे च मुख्यया श्रद्धाप्रणिपातसत्कारादिरूपया वृत्या मुख्यमन्नमदनीयम् । राद्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संसिद्धं दत्तम् यदि तदा मुखतो मुख्ये देशे काले मुख्यया वृत्तया मुख्यं मुख्याय। अस्मै। अन्नस्य दात्रे। अन्नमदनीयम्। राध्यते संसिद्धं भवति। एतद्वै मध्यतो। मध्यम देशे काले पात्रे च मध्यमया वृत्या मध्यमम्। अन्ततोऽन्ते जघन्यदेशे काले पात्रे च जघन्यया वृत्या तिरस्कारादिरूपया जघन्यम्। एवं वेत्तुः फलमाह। य एवमिति। योऽन्नदानस्य फलाभिज्ञः। एवमुक्तप्रकारेण वेद। अन्नदानफलमुत्तममुपास्ते सोऽपिमुख्यतोऽन्नं लभत इतिशेषः। तस्मान्मुखतोऽन्नं देयमिति सन्दर्भार्थः। क्षेमं प्राप्तस्य रक्षणम्। क्षेमसाधनत्वाद्वाचः क्षेमत्वबुद्धिस्तत्र कार्येत्यर्थः। योगक्षेमः। अप्राप्तस्य प्राप्तिर्हि योगः। प्राप्तस्य परिरक्षणं क्षेमः। तद्बुद्धिः प्राणापानयोः कार्या। एवमुत्तरत्रापि। विमुक्तिर्विसर्गः मलविमोचन-व्यापार इति यावत्। इत्यध्यात्मोपासनासमाप्त्यर्थः। मानुषीर्मनुष्य-सम्बन्धिनीः। समाज्ञाः सम्यगाज्ञा उपासनाः। जानीयादितिशेषः॥

अथ दैवीः। तृप्तिरितिवृष्टौ। बलमितिविद्युति। यश इति-पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजापतिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति। तन्मह इत्युपासीत। महान्भवति तन्मनइत्युपासीत नम्यन्तेऽस्मै कामाः तद्ब्रह्मेत्युपासीत। ब्रह्मवान् भवति।

टीका—अथ मानुष्युपासनाकथनसमनन्तरम्। दैवीर्देवसम्बन्धिनीः समाज्ञा इत्यनुषङ्गः। तृप्तिः अशनपानजा तुष्टिः तद्बुद्धिर्वृष्टौ कार्या। एवमुत्तरत्रापि। बलम् भूयसामसभ्यभवकारणं सत्वम्। विद्युति अचिरप्रभायाम्। यशः कीर्तिरूपम्। पशुषु गवादिषु। ज्योतिः प्रकाशरूपम्। प्रजापतिः। पुत्रदातृत्वात् तद्बुद्धिः कार्या। अमृतं सन्ततिः तथा च पौत्रादिरूपसन्तानपरम्परादातृत्वादमृतमिति भावः। आनन्दं क्षुद्रसुखरूपम्। उपस्थे गुह्येन्द्रिये। आकाशे भूताकाशे। प्रतिष्ठा प्रतितिष्ठत्यस्मिन्कार्यकारणजातमिति प्रतिष्ठा सर्वाधार-इत्यर्थः। इत्यनेन प्रकारेणोपासीतोपासनं कुर्यात्। तत्र फलमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिष्ठावान् भवतीति । महान् सर्वस्मादधिकः । अस्मै उपासकाय । कामाः नम्यन्ते नम्रा भवन्ति प्राप्ता भवन्ति । पूर्णगुणत्वाद्ब्रह्मेत्युपासीत ब्रह्मवान् ब्रह्मत्ववान् भवतीत्यर्थः ।

तद्ब्रह्मणः परिमर इत्युपासीत पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परियेऽप्रिया भ्रातृव्या स यश्चायं पुरुषे यश्चासावादित्ये । स एकः स य एवंवित् । अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य ॥

टीका—परितो म्रियन्तेऽस्मिन्निति परिमरः । सार्वत्रिकमरणस्याप्यवकाशतयाऽश्रयः । अथवा सर्वविनाशकः कालः परमेश्वरः ब्रह्मणासम्बद्धश्च स इत्याकाशः । इति अनेन प्रकारेण उपासीतोपासनं कुर्यात् । पर्येणम् । एनमुपासकं परि तद्द्विषन्तो म्रियन्ते विनश्यन्ति । सपत्नाः कामादयो वाह्या वा वैरिणः । परिसर्वतो ये प्रसिद्धाः । अप्रियाः । कर्णनेत्रमनोदाहकाः स्वस्य भ्रातृव्या वैरिणो द्विषन्तोऽपि अयमस्माकं वैरी अस्यानिष्टमस्माभिः करणीयमित्युपासते सङ्कल्पयन्ते उपासको वैते-ममवैरिण इति संकल्पं करोति येषु वैरमकुर्वाणेष्वपि ते सर्वे विनश्यन्तीत्यर्थः ।

स यश्चायमित्यादिकं प्रागुपदर्शितरीत्या व्याख्येयम् ।

एतं मनोमयमात्मानमुपसंक्रम्य एतं विज्ञानमयमात्मानमुपसंक्रम्य एतं मनोमयमात्मानमुपसंक्रम्य इमांल्लोकान् कामान्नीकामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते । हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादो३ अहमन्नादो३ अहमन्नादः । अहंश्लोककृदहंश्लोककृत् । अहमस्मि प्रथमजा ऋता३स्य पूर्वं देवेभ्यो अमृतस्य ना३भायि । यो मा ददाति स इदेव मा३ वाः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहमन्नमहमन्नमदन्तमा३ द्मि। अहं विश्वं भुवनमभ्यभवा३म्। सुवर्णज्योतिः। य एवं वेद। इत्युपनिषत्।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि भृगुवल्ल्यध्याये दशमोऽनुवाकः ॥ १० ॥

टीका—इमान् भूरादींल्लोकान् कर्मफलभूतान्। कामान्नीकामं यथाभिलाषमन्नमदनीयमस्यास्तीति कामान्नीकामरूपी कामं यथाभिलाषं रूपमस्यास्तीति कामरूपी। अनुसञ्चरन्। आत्मसाक्षात्कारमनु इमांल्लोकान् पर्यटन् मानुषेण शरीरेणाऽधिकारिकेण वा एतद्वक्ष्यमाणं लोकानुग्रहार्थं साम सामत्वप्रतिपादकं वचनं संसारशूलार्पितान् प्राणिनो निरीक्ष्य करुणाक्रान्तमना गायन्नत्युन्नतान्शब्दान् कुर्वन्। आस्ते तिष्ठते। हा३वु हा३वु हा३वु। स्तोमाक्षराण्येतानि।

लोकत्रयीस्थान् सम्बोधयति। वचनत्रयेण अहो अहो अहो इति प्लुतिः पदत्रयेऽप्याश्चर्यार्था।

अहमन्नमदनीयमुपभोग्यमित्यर्थः। अन्नादः अन्नमत्तीत्यन्नादो भोक्ता परमात्मा। श्लोक्यत इति श्लोकः श्लाघनीयो जगद्रक्षणादिकृदित्यर्थः।

ऋतस्य कर्मणः प्रथमजाः सर्गाद्यसमये तत्परिपाककृदित्यर्थः। देवेभ्यः पूर्वः पूर्वज इत्यर्थः। पूर्वभाव्यपेक्षयेदमिति ज्ञातव्यम्। अमृतस्य मोक्षस्य नाभिराश्रयः। नाभा इति गानकृतो विकारः। यो मां योग्याय शिष्याय ददात्युपदिशात स इदेव माऽवा अवा प्राप्तो भवति। वा गतिगन्धनयोरिति धातुः। अहमन्नमिति अन्नमचेतनं तद्भोक्तारं चेतनं चाद्मि व्याप्नोमि। अहं विश्वमिति प्रलयकाले विश्वमभिभूतवानस्मि। सुवर्नः सुवर्णः तत्समानवर्णो देदीप्यमानविग्रहः ज्योतिः प्रकाशः। एवं वेत्तुः फलमाह। योऽधिकारी एवमुक्तप्रकारमानन्दमयं परमात्मानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासुदेवं वेद जानाति साक्षात्करोति । सोऽपि सर्वांल्लोकानित्यादिनोक्त फलं प्राप्नोति । उपनिषत् । अस्य व्याख्यानं पूर्ववत् ।

अशेषरसिकचक्रचूडामणिश्रीस्वामिहरिदासपदाश्रिताश्रितानुगेनामोलकरामविदुषा पूर्वाचार्य्योक्तितः संगृहीतायां श्रीकृष्णयजुर्वेदीयतैत्तिरीयोपनिषत्तत्त्वप्रकाशिकायां टीकायां तृतीयो भृगुवल्ल्यध्यायः समाप्तः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री निकुञ्जविहारिणेनमः

ऐतरेयोपनिषद्

तत्वप्रकाशिकाटीकासंवलिता

श्रीकृष्णाय नमस्तस्मै राधाप्रेष्ठाय शर्मदे ।
परमानन्दसन्दोहसान्द्रानन्दवपुष्मते ॥ १ ॥
निम्बादित्यस्य पादाब्जं लोचनानन्ददायकम् ।
सकलार्थप्रदं नृणां प्रणमामि पुनः पुनः ॥ २ ॥
श्रीनिवासं गुरुं वन्दे करुणावरुणालयम् ।
बादरायणसूत्राणां भाष्यकारं गुणार्णवम् ॥ ३ ॥
सकलान् देशिकान् नत्वा पूर्वाचार्योक्तितः खलु ।
ऐतरेयस्य च व्याख्या व्याकरिष्ये यथामति ॥ ४ ॥

ओ३म् । आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति ॥ १ ॥

स इमांल्लोकानसृजत । अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः । पृथिवी मरो या अधस्तात्ता आपः ॥ २ ॥

टीका—इदमनभिव्यक्तनामरूपात्मकं जगत् । तद्भिन्नाभिन्न एक एव सहायान्तरशून्यस्वतन्त्रसत्ताश्रयः सर्वज्ञोऽचिन्त्यानन्तशक्तिरात्मा परमात्मा श्रीवासुदेवोऽग्रे जगतः सृष्टेः प्रागासीत् एवकारस्तदधिकोत्कृष्टत्वव्यवच्छेदपरः । प्रकृतादात्मनोऽन्यत विलक्षणं किञ्चन किञ्चिदपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तु न मिषत्। धातूनामनेकार्थत्वान्नासीदित्यर्थः। स परमात्मा पृथिव्यादींल्लोकान् स्रक्ष्यामीत्येवमीक्षत ईक्षणं पर्यालोचनं कृतवान्। नु शब्दो वितर्के। इत्थं विचार्य स सर्वेश्वर इमांल्लोकानसृजत।

यद्यपि लोकानुसृजा इत्येतावन्मात्रविचारेण कुलालवन्निमित्तकारणत्वं ब्रह्मणः प्रतिभाति तथापि 'सोऽकामयत बहुस्यां प्रजायेय' इति शाखान्तरगतस्य स्वकीयबहुभावविचारवाक्यस्य गुणोपसंहारन्यायेनात्रोपसंहारादुपादानत्वमपि सिद्ध्यति। एतच्च भगवता श्रीबादरायणेन सूत्रितम् "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात् ।" ब्र० सू० ४।२३ ब्रह्मैव जगतः प्रकृतिरुपादानञ्च निमित्तञ्च कुतः ? उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय यथा सोम्य एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादिति दृष्टान्तस्यानुसरणादिति सूत्रार्थः। यावन्तः लोका भगवता सृष्टास्तान् स्व-स्व-नाम्ना निर्दिशति। अम्भ इत्यादिना। आकाशादिक्रमेणाणुमुत्पाद्याम्भःशब्दवाच्यद्युलोकप्रभृतींल्लोकानसृजत एतेषामम्भःप्रभृतिशब्दानां लोकवाचित्वं न प्रसिद्धतरमित्याशङ्क्य तेषां शब्दानामर्थं स्वयमेव श्रुतिः व्याचष्टे अदोऽम्भ इति दिवं परेण द्युलोकस्योपरि महर्लोकजनोलोकप्रभृतयः या च द्यौः प्रतिष्ठा सर्वेषां देवानामाश्रयभूतो द्युलोकोऽदोऽम्भ एतत्सर्वमम्भःशब्दवाच्यम्।

मरीचिशब्देनान्तरिक्षलोक उच्यते सूर्यमरीचीनामाधारत्वात्। भूर्लोकवर्तिनां प्राणिनां मरणाश्रयत्वात् मरशब्दवाच्या पृथिवी। पृथिव्या अधस्तात् पातालविशेषाः आपशब्देनोच्यन्ते। लोकसृष्टिरुक्ता पालकमन्तरा तस्याः सृष्टेः विनाशः स्यादित्याशङ्क्य लोकपालसृष्टिं दर्शयति।

स ईक्षतेमे लोका लोकपालान्नु सृजा इति। सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्। तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टीका—स परमात्मा ईक्षत पर्य्यालोचत इमे त्वम्भःप्रभृतयः मया रचितास्तेषां रक्षणार्थं लोकपालानां नु सृजे। अहं सृजे। स विचारयुक्तः परमेश्वरः अद्भ्य एव जलोपलक्षितपञ्चभूतेभ्यः पुरुषं पुरुषाकारं विराजं विराट्पिण्डं समुद्धृत्य। अमूर्च्छयत् कठिनमकरोत। यथा कुलाल आर्द्रां मृदमानीय शोषयित्वा कठिनं पिण्डं करोति तद्वदित्यर्थः। विराडुत्पत्तिमभिधाय तदवयवेभ्यः लोकपालोत्पत्तिमाह। तमभ्यतपदिति। तं पिण्डं पुरुषविधमुद्दिश्याभ्यतपत् पर्यालोचितवान्। पर्यालोचनमेव तप इति प्रागभिहितम्। अभितः पर्यालोचितस्य विराट्पिण्डस्य मुखच्छिद्रं निरभिद्यत मुखच्छिद्रं विदारितमभूत्। यथा पक्षिसर्पादीनां पक्वपिण्डं भिन्नं भवति।

मुखाद्वाग् वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षिभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत। त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत। हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥ ४ ॥

इत्यैतरेयोपनिषद्यात्मषट्के प्रथमः खण्डः ॥ १ ॥

टीका—तद्वदस्मान्मुखच्छिद्राद्वागिन्द्रियं निष्पन्नम्। तस्माच्चेन्द्रियादग्निदेवता निष्पन्ना। एवमुत्तरपर्यायेष्वपि छिद्रेन्द्रियदेवता व्याख्येयाः। घ्राणो घ्राणेन्द्रियम्। लोमशब्देन तदाधारभूतत्वङ्निष्ठं स्पर्शेन्द्रियमुच्यते हृदयमष्टदलकमलम्। अपानोऽधःसञ्चारो वायुः। रेतः गुह्येन्द्रियम्॥

इति ऐतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां प्रथमः खण्डः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतन्। तमशनापिपासाभ्यामन्वार्जत्। ता एनमब्रुवन्नायतनं नः प्रजानीहि। यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥ १ ॥

ताभ्यो गा मानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥२॥

ताभ्योऽश्वमामानयत्ता अब्रुन्नवैनोऽयमलमिति । ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं वतेति पुरुषो वाव सुकृतं ता अब्रवीद्यथायतनं प्रविशतेति ॥३॥

टीका—या इन्द्रियतदभिमानिदेवता एताः सृष्टा रचिताः। अस्मिन् महत्यर्णवे समुद्रवदत्यन्तविस्तृते विराट्देहे प्रापतन् प्रकर्षेण पतिता अभूवन् तं सर्वेन्द्रियतद्देवताधिष्ठानभूतं विराट्देहं क्षुत्पिपासाभ्यामन्वावर्जत्तदनुगमितवान् संयोजितवान्। ता इन्द्रियाभिमानिन्यो देवताः। एनं स्रष्टारं परमात्मानं प्रत्यब्रुवन्। आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानीहि विधत्स्व। यस्मिन्शरीरे प्रतिष्ठिताः सत्यः वयं तद्देहपर्याप्तमन्नमदाम। अन्नमत्तुं समर्था भवामः। ततः परमात्मा ताभ्यो देवताभ्यो भोगाय गां गोदेहमानयत् तांश्च देवता अब्रुवन्। नोऽस्माकमयं देहो नैवालमिति अत्तुं न योग्यः। गोशरीरस्योपरिदन्ताभावेन दूर्वादिमूलस्योत्खातुमशक्यत्वादित्यर्थः। इतोऽन्यमप्युभयतोदन्तं देहं सृजेत्येवमब्रुवन्। परमात्मनाऽश्वशरीरं दत्तम्। विवेकज्ञानाभावादयमश्वदेहोऽपि न पर्य्याप्त इत्युक्तवत्यः। ततः परमात्मा विवेकसम्पन्नं पुरुषशरीरमानयत् ताश्च देवताः परितुष्टाः सुकृतं सुष्ठुकृतं परमात्मनेत्यब्रुवन् वतेत्याश्चर्ये तस्मान्मनुष्यशरीरं विवेकसम्पन्नं सुकृतं सर्वपुण्यकर्महेतुत्वात्। ता देवताऽब्रवीदिष्टमासादितमिदमधिष्ठानमिति मत्वा स्वयोनिषु सर्वे हि रमन्ते ईश्वरसृष्टेषु भोगक्षमशरीरेषु देवतानां प्रवेशायेश्वरप्रेरणं दर्शयति ता अब्रवीदिति। यस्मिन्नायतने छिद्रे यदिन्द्रियमुत्पन्नं या चाभिमानिदेवतोत्पन्ना तदायतनमनतिक्रम्य हे देवताः प्रविशत।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥ ४ ॥

टीका—इत्थमनुज्ञातानां देवतानां प्रवेशं दर्शयति । योऽयमग्निर्वागिन्द्रियाभिमानी देवः सोऽयंवाग्भूत्वा वाच्यन्तर्भूय मुखच्छिद्रं प्राविशत् । एवमुत्तरत्रापि योज्यम् । चक्षुरादीनीन्द्रियाणि स्वस्वविषये स्वातन्त्र्येण प्रवर्त्तन्ते स्वस्वाधिष्ठातृदेवताप्रेरितानि वा तादृक्शक्तिमत्वात् स्वयमेव प्रवर्त्तन्ते इत्याशङ्क्य भगवता बादरायणेन सिद्धान्तितम् "ज्योतिराद्यधिष्ठानन्तु तदामननात् । "ब्र० सू० अ० २ पा० ४० । १४ । ज्योतिरादिभिरग्न्यादिभिर्देवताभिरधिष्ठानमधिष्ठितं वागादिकरणजातं देवताप्रवर्तितं सत् स्वकार्यार्थं प्रवर्त्तते न स्वातन्त्र्येण । कुतः ? तदामननात् । अग्निर्वाग्भूत्वेत्यादिना प्रेर्यप्रेरकभावं विनाऽग्न्यादिप्रवेशस्य वैयर्थ्यं प्रसज्येत इति सूत्रार्थः । एवमन्येऽपीन्द्रियविषयकविमर्शाः द्वितीयाध्यायस्य चतुर्थ खण्डे द्रष्टव्याः ।

तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति । ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति । तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥ ५ ॥

इत्यैतरेयोपनिषद्यात्मषट्के द्वितीयः खण्डः ॥ २ ॥

टीका—व्यष्टिशरीरेऽपि अशनापिपासयोरपि करणाधिष्ठातृदेवतासम्बन्धं वक्तुं तयोः प्रश्नं दर्शयति तं परमात्मानं प्रति अशनापिपासे क्षुत्पिपासे स्वार्थं स्थानविशेषमनुग्रहेणेत्यब्रूताम् आवाभ्यामधिष्ठा-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनभिप्रजानीहि चिन्तय विधत्स्व एवमुक्तः । परमात्मा ते क्षुत्पिपासे अब्रवीत् उभे अप्येतास्वेवाग्न्यादिदेवतासु आभजामि ततस्तास्वेव भगिन्यौ विषयभागयुक्ते करोमीत्यब्रवीत् भगवान् यस्मादेवं भगवतोक्तं तस्माल्लोके यस्यै कस्यै अग्न्यादिदेवतायै हविर्गृह्यते भोग्यं वस्तु समर्प्यते अस्यामग्न्यादिदेवतायामेते क्षुत्पिपासे भागयुक्त एव भवतः अग्निवाय्वादिदेवतानां शरीरेष्वाहारस्वीकारे क्षुत्पिपासयोरेव तृप्तिर्भवति तथा मनुष्यशरीरेऽपि चक्षुरादिदेवतायै हविःस्वीकारे क्षुत्पिपासे तृप्यत इति भावः ।

इत्येतरेयोपनिषत्तत्त्वप्रकाशिकाटीकायां प्रथमाध्याये द्वितीयः खण्डः ॥२॥

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥ १ ॥

सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो मूर्त्तिरजायत या वै सा मूर्तिरजायतन्नं वै तत् ॥ २ ॥

तदेत्सृष्टम् पराङ्त्यजिघांसत्तद्वाचाऽजिघृक्षत्तन्ना शक्नोद्वाचा ग्रहीतुम् स यद्धैनद्वाचाऽग्रहैष्यदभि व्याहृत्य हैवान्नमत्रप्स्यत् ॥ ३ ॥

तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत् प्राणेन गृहीतुम् स यद्धैनत्प्राणेनाग्रहैष्यदमभिप्राण्यहैवान्नमत्रप्स्यत् ॥ ४ ॥

टीका—सः परमात्मा पुनरप्येवं पर्य्यालोचितवान् । ये पृथिव्यादिलोकाः ये च लोकपालाः सर्वेन्द्रियशरीरदेवतारूपास्ते सर्वेऽपीमे सृष्टाः । क्षुत्पिपासाभ्याञ्च संयोजिता अत एभ्योलोकपालेभ्योऽन्नं सृजै सृजे । अन्नमन्तरा तेषां जीवनासम्भवादितिभावः । अन्नं स्रक्ष्यामीति विचार्यान्न निष्पादनार्थं तत्कारणजलप्रधानानि पञ्चभूतान्यभ्यतपत् । सर्वतः पर्यालोचनमकरोत । ईदृशाज्जलसहितात् चेत्राद् व्रीह्यादयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जायन्तां स ईदृशानि मूषकादिशरीराणि मार्जारादीनामन्नभूतानि जायन्तामित्येवं सङ्कल्पं कृतवान् ताभ्योऽद्भ्यो जलोपलक्षितभूतेभ्यो व्रीहियवादिरूपा मूषकादिरूपा च मूर्त्तिरजायत। तत्र व्रीहियवादिमूर्त्ति-र्मनुष्यादीनामन्नं तैरद्यमानत्वात् ॥ २ ॥

अन्नसृष्टिमुक्त्वाऽन्वयव्यतिरेकाभ्यां तत्स्वीकारसाधनं निश्चिनोति तदेतत्सृष्टमिति। यत्सृष्टमन्नं व्रीहियवादिकं तत्र व्रीह्याद्यन्नस्य स्वकीय-वधविषये विवेकज्ञानाभावाद्गन्तुमसमर्थत्वाच्च नास्ति जनात् पलायनम्। यत्तु मूषकादिरूपं तदन्नं तदेनन्मार्जारादीनां भोक्तॄणां वधहेतुत्वं निश्चित्य तेभ्यः पराङ्मुखं सदत्यजिघांसदतिशयेन हन्तुं गन्तुमैच्छत्प-लायितुं प्रारभतेत्यर्थः। पलायितुमुद्युक्तम् तन्मूषकादिरूपमन्नं दृष्ट्वा भोक्तृवर्गो मार्जारादिर्वागिन्द्रियेण ग्रहीतुमैच्छत। ततः सर्वप्रयत्नेन वागिन्द्रियं प्रयुञ्जानोऽपि तेन तदन्नं ग्रहीतुं नाशक्नोत्। इदानींन्तनो-दाहरणेन सृष्टिकालीना तदशक्तिः स्पष्टीक्रियते। स भोक्तृवर्ग आदि-सृष्टिकाले यद्येतन्मूषकादिरूपमन्नं वाचा गृह्णीयात्तदेदानीमपि भोक्ता तदन्नवाचकैः शब्दैरीदृशमित्युक्तिमात्रेण तृप्तो भवेत्। नापि वागिन्द्रियस्या-भिधानव्यतिरेकेणाकर्षणसामर्थ्यं किञ्चिदस्ति। नचैवमन्नवाचक-शब्दोच्चारणमात्रेण तृप्तिर्दृश्यते। तस्मात्सृष्टिकालेऽपिवाचोऽन्नस्वीकारे सामर्थ्यं नास्तीत्यनुमेयम् ॥ ३ ॥

तत्प्राणेनेति। प्राणेनघ्राणेन स्वव्यापारेणान्नमजिघृक्षत् ग्रहीतुमैच्छत् तदन्नं नाशक्नोन्न समर्थोऽभवत्प्राणेन ग्रहीतुमुपादातुम्। स पूर्वजः शरीरी यद्यदि हैनत्प्रणेनाग्रहैष्यत् गृहीतवान्स्यात्सर्वोपिजनः अभि-प्राण्याघ्राय हैवान्नमतृप्स्यत्तृप्तोऽभविष्यत् ॥ ४ ॥

तच्चक्षुषाऽजिघृक्षत् तन्नाशक्नोच्चक्षुषा ग्रहीतुम्।
सयद्धैनच्चक्षुषाऽग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्छ्रोत्रेणाजिघृक्षत् तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् ।
सयद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् ॥ ६ ॥
तत्त्वचाऽजिघृक्षत् तन्नाशक्नोत्त्वचा ग्रहीतुम् ।
सयद्धैनत्त्वचाऽग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत् ॥ ७ ॥
तन्मनसाऽजिघृक्षत् तन्नाक्नोन्मनसा ग्रहीतुम् ।
सयद्धैनन्मनसाऽग्रहैष्यद्ध्यात्वा हैवान्नमतृप्स्यत् ॥ ८ ॥
तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेन ग्रहीतुम् ।
सयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् ॥ ९ ॥
तदपानेनाजिघृक्षत्तदावयत् सैषोऽन्नस्य ग्रहो यद्वायुरन्नमायुर्वा एष यद्वायुः ॥ १० ॥

तच्चक्षुषा तच्छ्रोत्रेण तत्त्वचा तन्मनसा तच्छिश्नेन तेन तेन करणव्यापारेणान्नं ग्रहीतुमशक्नुवन्पश्चादपानेन वायुना मुखच्छिद्रेण तदन्नमजिघृक्षत् स ग्रहीतुमैक्षत्तदन्नमावयज्जः ाहाशितवान् । अत्रापान शब्देनान्नस्य मुखविलादन्तःप्रवेशनरूपं निगरणं कुर्वन्नन्तर्मुखो योवायुःसोऽभिधीयते ।

अन्वयव्यतिरेकाभ्यां वायोरेवात्रग्रहणे साधनत्वं निश्चित्य दार्ढ्यार्थं वायुं प्रशंसति—

सैषोऽन्नस्य ग्रह इति । मुखविलादन्तःसञ्चारी वायुरिति यदस्ति स एषोऽन्नस्य ग्राहकः । अयमर्थोऽनुभवसिद्धः । किञ्चायं वायुर्वा अन्नद्वारेणायुष्यहेतुरेव । अन्नरसेन हि प्राणो देहे वध्यत इत्यर्थः ॥५।६।७।८।९।१०॥

स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्रपद्या इति । स ईक्षत यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टम् यदि श्रोत्रेण श्रुतं यदि त्वचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पृष्टम् यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्ने न विसृष्टमथ कोऽहमिति ॥ ११ ॥

भोगाधिष्ठानभोगसाधनभोग्यभोगानां सृष्टिमभिधाय भोगस्वामिनं दर्शयितुं सर्वेश्वरस्य सङ्कल्पमाह—स ईक्षत इति। यदिदं देहेन्द्रियतदभिमानिदेवतातदीयान्नस्वीकाररूपमस्ति तदिदं सर्वं मदृते मदात्मकं भोगस्वामिनं प्रत्यगात्मानं विना कथं नु नाम स्यान्न कथञ्चिदुपपद्यते। नहि नगरस्वामिनं राजानं विहाय पुरस्य पौरजनानां वा रचना शोभते तस्माज्जीवात्मना सह मया देहे प्रवेष्टव्यमित्यर्थः।

प्रवेशद्वारविचारं दर्शयति–स ईक्षतइति। द्वावत्र प्रवेशमार्गौ पादाग्रं मूर्ध्नि ब्रह्मरन्ध्रञ्च। तयोर्मध्ये कतरेण केन मार्गेण प्रपद्ये प्रविशानि सर्वनियन्तारमनपेक्ष्य वागादयोऽभिवदनव्यापारेषु स्वतन्त्राः कर्तारः स्युस्तदानीमहं को नाम स्यां न कोऽपि भवेयम्। अस्ति कश्चिद्देहेन्द्रियादिभ्यो विलक्षणः सत्यज्ञानानन्दस्वरूपः परमात्मा इत्येवं कश्चिदपि न जानीयात्। यदा त्वहमेव सर्वेषां करणानां नियन्ता वागादयस्तु मया प्रेरिताः सन्तोऽभिवदनादिक्रियाः कुर्युस्तदानीं तत्प्रेरकः कश्चिदस्तीति मम सद्भावोऽनुमातुम् शक्यते सोऽयमनुमानेन परमात्मसद्भावउपस्तत्राह्मणे समाम्नायते "यः प्राणेन प्राणिति स त आत्मा सर्वान्तर" इति ॥ ११ ॥

अथ प्रवेशं दर्शयति।

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत। सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनम् तस्य त्रय आवसथास्त्रयः स्वप्ना-अयमावसथोऽयमावसथोऽयमावसथ इति ॥ १२ ॥

स सर्वेश्वरः एतमेव मूर्धमध्यभागमेव कपालसन्धिरूपां सीमानं स्थानविशेषं विदार्य छिद्रं कृत्वा तच्छिद्ररूपद्वारा ज्ञानादिसकलशक्तिसहितः सन् देहमध्ये प्राविशत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूर्द्धगतं प्रवेशद्वारं प्रशंसति—सैषेति । सेयं हि प्रसिद्धा द्वाः सैषा विद्दतिः विदारितत्वाद्विद्दतिर्नाम प्रसिद्धा तदेतन्नान्दनं नन्दनमेवनान्दनं नन्दयत्यनेन द्वारेण गत्वा परस्मिन् ब्रह्मणि शरीरे प्रविष्टस्य सञ्चार-स्थानानि तेष्ववस्थाविशेषांश्च दर्शयति तस्येति । यथा महाराजस्य क्रीडार्थमुपर्यधोभागेन वर्त्तमानाः प्रासादस्य भूमयो निर्मीयन्ते । एवं तस्यात्मनः शरीरे क्रीडनार्थं त्रयः अवस्थास्त्रीणि स्थानानि निर्मितानि त्रयः स्वप्नाः जाग्रत्स्वप्नसुषुप्त्याख्याः नेत्रकण्ठहृदया-ख्यानि स्थानानि हस्ताग्रेण अयमावसथ इत्यादिना प्रदर्श्यन्ते तेषु हि जागरणाद्यवस्थानिष्पत्तिः । तदुक्तम्–नेत्रे जागरितं विद्यात् कण्ठे स्वप्नं समादिशेत् । सुषुप्तं हृदयस्थन्तु तुरीयं मूर्ध्नि संस्थितम् इति ।

स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति । स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमिति । १३ । तस्मादिन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ॥ इति तृतीयखण्डः ॥ इत्यैतरेये द्वितीयारण्यके चतुर्थोऽध्यायः । उपनिषत्सु प्रथमोऽध्यायः ॥

टीका—स प्रत्यगात्मा शरीरे वर्त्तमानः सन् कदाचिदीश्वरानु-ग्रहाद् गुरूपदेशद्वारा भूतान्याकाशादीनि प्राणिनश्चाभिव्यैख्यत् सर्वतो विवेकेन ज्ञातवान् आकाशादीनि भूतानि प्राणिदेहाश्च कुत उत्पद्यन्ते केन वा रक्ष्यन्ते कस्मिन् वा प्रलीयन्ते इत्येवं शास्त्रं विविच्य सर्वस्य संसारस्य ब्रह्मात्मकत्वं ज्ञातवान् । इह जगति अन्यं ब्रह्मव्यतिरिक्तम् वावदिषत् किमिति काक्वा नोक्तवानित्यर्थः । सर्वं चिदचिदात्मकं वस्तु ब्रह्मभिन्नाभिन्नं ज्ञातवानितिभावः । स प्रत्यगात्मा एतमेव जीवान्तर्यामितया प्रविष्टं परमात्मानं ब्रह्मापश्यत् ब्रह्मत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निश्चितवान् । कीदृशं ब्रह्म ततमम् एकतकारो लुप्तः अतिशयेन ततं विस्तृतम् ॥

तस्मादिन्द्रो नाम परमात्मा इन्द्रो ह वै नाम सुप्रसिद्धो लोके नन्विन्द्रो मायाभिरित्यादाविन्द्र इति प्रसिद्धो नत्विदन्द्र इत्यत आह तमेवसिति । तमेवमिदन्द्रं सन्तमिन्द्र इति परोक्षेण परोक्षाभिधानेता चक्षते ब्रह्मविदः परोक्षप्रियाः परोक्षनामग्रहणप्रियाः । इव ह्येव हि यस्माद्देवाः । द्विरुक्तिः प्रकृताध्यायसमाप्त्यर्था ।

इत्यैतरेयोपनिषत्तत्वप्रकाशिकाटीकायां द्वितीयारण्यके चतुर्थाध्याये तृतीयखण्डः ॥

द्वितीयोऽध्यायः

आरण्यक क्रमेण पञ्चमोध्यायः । तत्र प्रथमखण्डः ।

पुरुषे हवा अयमादितो गर्भो भवति यदेतद्रेतः । तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजःसम्भूतमात्मन्येवात्मानं विभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनञ्जनयति तदस्य प्रथमं जन्म । १ । तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा तस्मादेनां न हिनस्ति साऽस्यैतमामात्मानमत्र गतं भावयति ॥२॥ भावयित्री भावयितव्या भवतीति ॥

टीका—अयं जीवात्मा आदितः प्रथमतः पुरुषे पितृशरीरे गर्भो भवति । नचात्र स्त्रीगर्भवदुदरवृध्या सोऽभिव्यज्यते॥ किन्तु यदेतत् पितृशरीरे सप्तमधातुरूपं रेतोऽस्ति तदेव गर्भ इत्युच्यते तस्मिन्रेतसि जनिष्यमाणजीवस्य प्रविष्टत्वात् । स्वर्गाद्वा नरकाद्वा वृष्टिद्वारा भूमौ समागतो जीवो व्रीहियवाद्यन्नद्वारा पितृशरीरे प्रविशति । एतच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चाग्निविद्यायां प्रपञ्चेनाम्नातम् । तस्य गर्भस्य जन्मप्रकारं दर्शयति तदेतदित्यादिना । पुरुषे गर्भत्वेन व्यवस्थितं यद्रेतोऽस्ति तदेत त्तस्मिन् पुरुषशरीर आपादमस्तकं सर्वेभ्योऽवयवेभ्यः सारभूतं निर्गतं भवति तच्च सर्वावयवनिर्गतरेतोरूपमन्नं सारमात्मानं स्वस्यैव रूपान्तरभूतमात्मन्येव स्वशरीर एवासौ पुरुषो विभर्ति पोषयति तद्रेतो यदा यस्मिन्काले भार्यर्तुमती तस्यां योषाग्नौ स्त्रियां सिञ्चति । अथ तदैनद्रेत आत्मना गर्भभूतं जनयति पिता । तदस्य पुरुषस्य स्थानान्निर्गमनं रेतःसेककाले रेतोरूपेणास्य संसारिणः प्रथमं जन्म प्रथमावस्थाभिव्यक्तिः ॥ १ ॥ स्त्रीयोनौ प्रविष्टं तत्पुरुषरेतस्तस्याः स्त्रिया आत्मभूयं स्वशरीरभावं गच्छति यथा स्वमङ्गं हस्तादिकं शरीरात् न पृथग्भूतं तद्वत् तस्मात्स्वशरीरत्वेनैकीभावात कारणादेनां स्त्रियं न हिनस्ति उदरलग्नवाणवद्धिंसां न करोति ॥ तद्गर्भद्वारेण स्त्रीपुरुषयोः परस्परमुपकार्योपकारकाभावं दर्शयति सेति । सा गर्भ धारिणी स्त्र्यत्र गतं स्वशरीरे प्रविष्टमस्य पुरुषस्य रेतःसेक्तृ रेतसमात्मानं पुत्ररूपं भावयति परिपालयति यस्मात् सा स्त्री गर्भपरिपालनेन भावयित्री पुरुषस्यैव पालयित्री तस्मात् कारणात् तेन पुरुषेण सा भावयितव्याऽभीष्टान्नपानवस्त्रादिप्रदानेन पालयितव्या भवति ॥

स्त्री पुरुषयोरुभयोरपि पुत्रम् प्रत्युपकारकत्वं दर्शयति ।

तं स्त्री गर्भं विभर्ति सोऽग्र एव कुमारं जन्मनाग्रेऽधि-
भावयति ।

टीका—पुत्ररूपं गर्भं मातृरूपा स्त्र्यत्यन्तं प्रयासं सोढ्वा नव दश वा मासानुदरे धारयित्वा पोषयति स च पिताऽग्र एव प्रसवात्पूर्वमेव निष्पन्नं कुमारं जन्मनोऽग्रे प्रसवादूर्ध्वममि भावयति अधिकत्वेन शास्त्रीयजातकर्मादिना संस्कारं करोति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म ॥ ३ ॥ सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते । अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयत्नेन पुनर्जायते तदस्य तृतीयं जन्म ॥ ४ ॥

टी०—कुमारसंस्कारेण पितुरुपयोगं दर्शयति स यत्कुमारमिति । पुत्रसंस्कार इति यदस्ति तेन पिता स्वस्यैव संस्कारं करोति पुत्रस्य स्वदेहरूपत्वात् । पुत्रपौत्राद्य इमे जना लोकास्तेषामविच्छेदाय संस्कृतपुत्रोत्पादनम्, एवंपुत्रोत्पादनादिकर्माविच्छेदेनैव ते सन्तताः प्रबन्धरूपेण वर्त्तन्ते अन्यथा विच्छिद्येरन् । मातृशरीरान्निर्गमनस्य पूर्वोक्तजन्मापेक्षमद्वितीयत्वं दर्शयति तदस्येति । जनकस्य पुत्रप्रयुक्तमुपयोगं दर्शयति सोऽस्यायमात्मेति । अस्य पितुर्द्वावात्माना देहौ तयोर्मध्येऽयमात्मा पुत्ररूपो देहः पुण्येभ्यः कर्मभ्यः शास्त्रोक्तकर्मनिष्पादनार्थं प्रतिधीयते स्वस्य प्रतिनिधित्वेन गृहेऽवस्थाप्यते । ननु किमनेन प्रतिनिधिना स्वयमेव कुतो न करोतीत्यतआहऽ अथास्यायमितर इति । अस्य पितुरितर आत्मा स्थाविरो देहः कृतकृत्यः कृतान्येत जन्मप्रयुक्तानि कृत्यानि कर्माणि येनासौ कृतकृत्यः । वयोगतो वयसा पूर्वकर्मसम्पादितेनाऽऽयुषा हीनः प्रैति म्रियते । पूर्वोक्तजन्मद्वयमपेक्ष्य जन्मान्तरं दर्शयति स इतइति । स वृद्धपितेतोऽस्माज्जरठदेहात्प्रयत्नेन निर्गच्छन्नेव स्वर्गे नरके मनुष्यलोके वा स्वकर्मानुसारेण जायते । तदस्य तृतीयं जन्म । अनेन जन्मत्रयोपवर्णनेन संसाराद्विरक्तिरुपजायते- नहि मातृपितृमलद्वयरूपदेहस्य निरन्तरं धारणादन्यदधिकं जुगुप्सितं वैराग्यकारणमुदाहर्तुं शक्यम् । अतएव विष्णुपुराणे पठ्यते । स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् । विरागकारणं तस्य किमन्यदुपदिश्य वै ॥ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदुक्तमृषिणा। गर्भे नु सन्नेषाम वेदमहं देवानां जनिमानि विश्वाशतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एव मुवाच ॥ ५ ॥

टी०—प्रागुदाहृतप्रबन्धेन संसारस्य यत्कष्टत्वमुपवर्णितं यश्च संसारनिवर्तकोपायो विवक्षितः तदुभयमप्यर्थजातं केनचिन्मन्त्रेणाभिहितं तन्मंत्रं पठति गर्भइति। अहं वामदेवाख्यो मुनिः गर्भे नु वितर्के मातुः गर्भ एवावस्थितः सन्नेषामग्निवाय्वादित्यदेवतानां विश्वा जनिमानि सर्वाण्यपि जन्मान्यन्ववेदमनुक्रमेण विदितवानस्मि ॥ औपनिषदात्मज्ञानं मम सम्पन्नमित्यर्थः। अथैतस्मा ज्ज्ञानोदयादधस्तान्मां वामदेवमायसीर्लोहनिर्मितश्रृङ्खलासमानाः शतं पुरः शतसङ्ख्याकानि शरीराण्यरक्षन् यथा कारागृहेऽवस्थापितं तस्करं प्रबलं बद्धश्रृङ्खलाः पलायना द्रक्षन्त्येवं शतसङ्ख्योपलक्षिता न्यनन्तानि शरीराणि। यथा मुक्तो न भवामि तथैवारक्षन्। इदानीं गुरुशास्त्रप्रसादाल्लब्धतत्वविद्यायुक्तो संसाराच्छ्येन इव जालं भित्वा जवसा त्वरया निरदीयं निर्गतोऽस्मि। अहो गर्भ एव शयानो वामदेव ऋषिरेवमुवाचैतत्। इतिशब्दो मन्त्रसमाप्त्यर्थः।

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् ॥६॥

इत्यैतरेयोपनिषद्यात्मषट्के चतुर्थः खण्डः ॥४॥

उपनिषत्क्रमेण द्वितीयाध्याये प्रथमखण्डः ॥

ऐतरेयोपनिषदि द्वितीयोध्यायः ॥ २ ॥

टी०—ज्ञानस्याव्यभिचरितफलज्ञापनाय वामदेवेन ज्ञानस्य फलं प्राप्तमिति वक्तुमाह सएवमिति। स वामदेवो महर्षिः। एवं प्रागुदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृतप्रकारेणात्मतत्वं विद्वान् प्रारब्धकर्मणि क्षीणे सत्यस्मात् पाञ्चभौतिकाच्छरीरभेदादूर्ध्वमुत्तरकालेऽवस्थितः सर्वस्मात्संसारबन्धादुत्क्रम्यामुष्मिन् स्वर्गे लोके ब्रह्मलोके सर्वान्कामान् आनन्दानाप्त्वाऽमृतः मरणरहितः समभवत् मुक्तोऽभूदिति यावत्। समभवदित्यभ्यासोऽध्यायसमाप्त्यर्थः ॥ इत्यैतरेयोपनिषत्तत्वप्रकाशिकाटीकायां द्वितीयोऽध्यायः ॥

कोयमात्मेति वयमुपास्महे कतरःस आत्मा येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादुचास्वादु च विजानाति ॥ १ ॥

टी०—प्रतिदिनं प्रतिक्षणमात्मेति यमुपास्महे स कतरः, कोसावित्यर्थः। पुमान् नीलपीतादि रूपं पश्यति अतो येन वाचा। चक्षुषा चैतन्येन पश्यति तच्चैतन्यं किमात्मेत्येका कोटिः ॥ येन श्रोत्रचैतन्येन शब्दं शृणोति तत किमात्मेति द्वितीया कोटिः। एवं घ्राणवाग्जिह्वादिषु योज्यम् ॥ १ ॥

यदेतत् हृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः। सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति॥२॥

टी०—हृदयमन्तःकरणम् बुद्धिः। तद्विशिष्टस्य कर्त्तुरात्मनो रूपादिविषयसंकल्पविकल्पादिसाधनं मन इत्युच्यते। संज्ञानं सम्यगिदं वस्त्विति ज्ञप्तिः। अज्ञानमज्ञप्तिः विज्ञानमिदमस्माद्विशिष्टमित्येवमादिविवेकः। प्रज्ञानं प्रज्ञता। मेधा ग्रन्थतदर्थधारणा। दृष्टिश्चक्षुर्द्वारा रूपोपलब्धिहेतुर्मनोवृत्तिः। धृतिर्धारणमवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति। मतिर्मननं राजकार्याद्यालोचनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनीषा तत्रास्वातन्त्र्यम् । जूतिर्जवः प्राप्तकार्येषु मनसो व्यग्रता । स्मृतिरनुभूतार्थवस्तुस्मरणम् । सङ्कल्पः एवं करिष्यामीत्याकारकः । क्रतुरवश्यंकरिष्यामीत्यध्यवसायः । असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः । कामोऽसंनिहितविषयाकाङ्क्षा । वशः अभीष्टवस्त्वभिलाषः । येन वा पश्यतीत्यादिना क्रतुरसुकामोवश इत्यन्तेन ग्रन्थेनदाहृतानि सर्वाणि प्रज्ञानस्य ब्रह्मणः नामधेयानि संपद्यन्ते ।

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्चमहाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानिच क्षुद्र मिश्राणीव । बीजानीतराणि चेतराणि चाण्डजानिच जरायुजानि च स्वेदजानिचोद्भिज्जानिचाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमञ्च पतत्रि च यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम् । प्रज्ञानेत्रो लोकः। प्रतिज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥३॥ स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्राम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् । इति पञ्चमः खण्डः ॥ इत्यैतरेयारण्यकेषष्ठोऽध्यायः। उपनिषत्सु तृतीयोऽध्यायः ॥३॥ इत्यैतरेयोपनिषत्सम्पूर्णा ॥

टीका—एष ब्रह्मा चतुर्मुख इन्द्रो देवराजः । प्रजापतिः कश्यपः । सर्वे देवा अग्न्यादयः । पृथिव्यादीनि पञ्चमहाभूतानि प्रसिद्धानि । इमानि पञ्च महाभूतानीत्येतस्य वाक्यस्य पृथिवीत्यारभ्येत्येतानीत्यन्तं विवरणम् । इमानि चान्यानि क्षुद्रैरल्पकैर्मशकपिपीलिकादिदेहैः मिश्राणि बीजानि कारणानि तेषां बीजानां नानाजातीयत्वमितराणि चेतराणिचेत्यनेन प्रतिज्ञायते । परस्परविलक्षणबहुभेदयुक्तानीत्यर्थः । प्रतिज्ञातं नानात्वं प्रपञ्च्यते । अण्डजानीति पक्षिसर्पादीन्यण्डजानि ।

२०५९३ मू० ३५/-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जारुजानि जरायुजानि मनुष्यगवादीनि। कृमिदंशादीनि स्वेदजानि। तरुगुल्मादीन्युद्भिज्जानि। यथोक्तेष्वेव जरायुजानामश्वा गावः पुरुषा हस्तिन इत्युदाहृत्य प्रदर्शनम्। उक्तानामनुक्तानाञ्च सङ्क्षेपेणोपसङ्ग्रहार्थं यत्किञ्चेत्यादि वाक्यम्। ब्रह्मादिस्थावरान्तं यज्जगदस्ति तत्सर्वं प्रज्ञानेत्रम् ब्रह्मात्मकमेव। प्रकृष्टा ज्ञप्तिः प्रज्ञा नीयते सर्वं जगदनेनेति सृष्टिस्थितिलयमूलकारणं नेत्रं प्रज्ञैव व नेत्रं यस्य तत् प्रज्ञानेत्रम्। अशेषजगतो मूलकारणभूतं ब्रह्मैवेति यावत्। सर्वस्यापि चेतनातनात्मनो वस्तुनः सर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्व सर्वाधारत्वादिना ब्रह्मणो भिन्नत्वं। ब्रह्मात्मकत्वतन्निम्यत्वतत्तन्त्रसत्वत्वपराधेयत्वादिना च तदभिन्नत्वमित्यर्थः। तदेव स्फुटयति। प्रज्ञाने प्रतिष्ठितमिति। प्रज्ञाने ब्रह्मणि। प्रतिष्ठितम् सम्बद्धम्। आश्रितमिति यावत्। सर्वजगदाधारभूतमिति भावः। लोकः प्राणिसमूहः। प्रज्ञानेत्रः प्रज्ञा ज्ञानसाधनं श्रुतिस्मृत्यादिकम् नेत्रं यस्यासौ प्रज्ञानेत्रः। तदुक्तं। श्रुतिस्मृती द्वे नेत्रे विप्राणां परिकीर्तित इति। प्रज्ञा प्रतिष्ठा सर्वस्य जगतः तस्मात्प्रज्ञानं ब्रह्म इत्यर्थः। एवं वेत्तुः फलं दर्शयति स एतेनेति। यः पुमान् प्रज्ञानं ब्रह्मेत्येवं जानाति स पुमान् अस्माल्लोकादुदुत्क्रम्य प्रज्ञेन ब्राह्मेण स्वरूपेणाविर्भवति। स्वर्गेलोके ब्रह्मलोके सर्वान् कामान् मनोऽभिलषितान् प्राप्यामृतः जन्ममरणरहितः सन्। समभवत् अवतिष्ठते। समभवदित्यभ्यासोऽध्यायसमाप्त्यर्थः।

अशेषरसिकचक्रचूडामणिश्रीस्वामिहरिदासपदाश्रिताश्रितानुगेनामोलकरामेण संगृहीतायामैतरेयोपनिषत्तत्वप्रकाशिकायां टीकायां षष्ठोऽध्यायः॥ समाप्तेयमैतरेयोपनिषट्टीका इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu